
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालय:

M-2955

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
श्रीमद्भागवत ~~अष्टमस्कंध~~ एकादश स्कंध द्वादश स्कंध	[illegible] महादेव	पुराण	अपूर्ण	-	3/12	46 + 38 = 84	मोडी	कागद	9	70		

॥ द्वादशस्कंध ॥ १२

धोमाहादेव रुपदे पुस्तकं ॥

श्रीगणेशायनमः ॐनमोभगवतेवासुदेवाय जयंतिश्रीपरानंदकृपापांगलसद्दृशः यानित्यमनुवर्त्तंतेसंपदोविगताद्दृशः १
उक्तस्मिन्द्वादशाध्यायैर्द्वादशेत्वाश्रयःसतः अधिष्ठानावधित्वाभ्यामाश्रयश्चेश्वरःसतः २ उक्तौत्वियावधित्वेनशास्त्रतात्पर्यंतिकेभयेअधिष्ठा
नतयाचोक्तोमहापुरुषवर्णने ३ तत्रादौषड्भिरध्यायैःशुकःप्राहपरीक्षिते शेषैस्त्रत्रखिलाध्याहसूतःपृष्टोथसत्रिभिः ४ स्वाश्रयाश्र
वणेकार्योनविलंबोमनीषिणा इत्यध्यात्कालवैषम्यंचतुर्भिस्तावदुच्यते ५ तत्रतत्रप्रथमेभाविमागधान्वयभूमिपान् कलिप्र
भावतःप्राहसंकरादिमलीमसान् ६ एवंभूतेसोमवंशेमुकुंदस्वैरक्रीडावर्णिताध्यासएव वंशोभावीवर्ण्यतेकृष्णभक्तिमुक्ता
मुक्तौयेवर्त्मनास्मीतिवक्तुं ७ तदेवंवैवस्वतमनुवंशेसोमवंशप्रसंगेनश्रीकृष्णावतारचरितानिसप्तपंचमनुवर्णितानि ८ अथे
दानींभाविसोमवंशःकलौविजातीयसंकरादिमलीमसोवैराग्यद्वाराश्रीकृष्णैकभक्तिनिगमनायानुवर्ण्यते तत्रतुसोम
वंशशाखासुचिरकालानुवर्त्तितयामागधवंशोनुक्रम्यते तत्रपूरोर्वंशेउपरिचरोवसुस्तस्यपुत्रोबृहद्रथःतस्यजरासंधःतस्य
सहदेवःपुत्रोभूदितिउक्तंनवमस्कंधे तत्रैवसहदेवान्मार्जारिस्ततःश्रुतश्रवाःइत्यादयोरिपुंजयांताःविंशतिभोविनोराजानोनि
रूपिताः ॥१॥

तदुपरितनं वंशं संकरादिदोषैः प्रपंचयति। योंत्य इति। रिपुंजयएव पुरंजयः। स्वामिनं पुरंजयं हत्वा स्वपुत्रं प्रद्योतं राजानं करिष्यति। यस्य पालको नाम सुतो भवि
ष्यति २ ३ प्रद्योतनाः प्रद्योतसंज्ञाः ४ ७ नंदो नामकश्चिन्महापद्मसंख्यायाः सेनायाः धनस्य वा पतिर्भविष्यति। अतएव महापद्म इत्यपि तस्य नाम ८ एकी

श्री जो व स्वधामानुगते कृष्णे पडुवंशविनाशने। कस्य वंशो भवत्पृथ्व्यामेतदाचक्ष्व मे मुने १ श्रीशुक उवाच योंत्यः पुरंजयो नाम भविष्यो
बारहद्रथः। तस्यामात्यस्तु शुनको हत्वा स्वामिनमात्मजं। प्रद्योतसंज्ञं राजानं कर्ता यत्पालकः सुतः २ विशाखयूपस्तत्पुत्रो भविता राजकस्ततः। नं
दिवर्द्धनस्तत्पुत्रः पंच प्रद्योतना इमे। अष्टत्रिंशोत्तरशतं भोक्ष्यंति पृथिवीं नृपाः ३ शिशुनागस्ततो भाव्यः काकवर्णस्तु तत्सुतः। क्षेमधर्मा तस्य
सुतः क्षेत्रज्ञः क्षेमधर्मजः ४ विधिसारः सुतस्तस्याजातशत्रुर्भविष्यति। दर्भकस्तत्सुतो भावी दर्भकस्याजयः स्मृतः ५ नंदिवर्द्धन आजे
यो महानंदिः सुतस्ततः। शिशुनागा दशैवैते षष्ट्युत्तरशतत्रयं ६ समा भोक्ष्यंति पृथिवीं कुरुश्रेष्ठ कलौ नृपाः। महानंदिसुतो राजन् शूद्रीगर्भो
द्भवो बली ७ महापद्मपतिः कश्चिन्नंदः क्षत्रविनाशकृत्। ततो नृपा भविष्यंति शूद्रप्रायास्त्वधार्मिकाः ८ स एकच्छत्रां पृथिवीमनुल्लंघितशास
नः। शासिष्यति महापद्मो द्वितीय इव भार्गवः ९ तस्य चाष्टौ भविष्यंति सुमाल्यप्रमुखाः सुताः। य इमां भोक्ष्यंति महीं राजानः स्म शतं समाः
१० नव नंदान् द्विजः कश्चित्प्रपन्नानुद्धरिष्यति। तेषामभावे जगतीं मौर्या भोक्ष्यंति वै कलौ ११ स एव चंद्रगुप्तं वै द्विजो राज्येभिषेक्ष्यति। तत्सुतो वा
स्तु रिसारस्तु ततस्त्वशोकवर्द्धनः १२ सुयशा भविता तस्य संगतः सुयशःसुतः। शालिशूकस्ततस्तस्य सोमशर्मा भविष्यति १३

मेवच्छत्रं यस्यां तां पृथिवीं शासिष्यति पालयिष्यति। क्षत्री सा इति नेदृशं ततः। भार्गवः परशुराम इव ९ समाः संवत्सरान् १० नव नंदान् नंदं तत्पुत्रांश्चाष्टौ एवं नव। प्रपन्नान् वि
श्वासान् विख्यातान् वा द्विजः कौटिल्य वात्स्यायनादिपर्यायश्चाणक्य उद्धरिष्यति। उन्मूलयिष्यति। मौर्याः मौर्यसंज्ञाः ११ कथं भोक्ष्यंति। तदाह। स एवेति। चंद्रगु

भा॰द्वा
२

तेषां प्रथमो दशरथः पराशरादिभिरुक्तो ऽत्रापन्न संधेयस्तेन सह मौर्या दश सप्तत्रिंशदुत्तरं सप्तत्रिंशदुत्तरं शतं समाः १४ ६ वृहद्रथश्च सेनापतिः पु
ष्यमित्रो नाम स्वामिनं हत्वा राज्यं करिष्यति । स च शुंगानां प्रथमः ततो ऽग्निमित्रादयो नव ते पि वंशुंगाः दश । वर्षशताधिकं द्वादशाधिकं वर्षशतं १७ कथं कण्वा

शतधन्वा ततस्तस्य भविता तद्वृहद्रथः । मौर्या ह्येते दश नृपाः सप्तत्रिंशच्छतोत्तरं । समा भोक्ष्यंति पृथिवीं कलौ कुरुकुलोद्वह १४ अ
ग्निमित्रस्ततस्तस्मात्सुज्येष्ठो भविष्यति । वसुमित्रो भद्रकश्च पुलिंदो भविता सुतः १५ ततो घोषः सुतस्तस्माद्वज्रमित्रो भवि
ति
ष्यति ॥ ततो भागवतस्तस्माद्देवभूतिरिति श्रुतः १६ शुंगा दशैते भोक्ष्यंति भूमिं वर्षशताधिकं । ततः कण्वानियं भूमिर्यास्यत्यल्पगुणान्न
नृप । १७ शुंगं हत्वा देवभूतिं कण्वो ऽमात्यस्तु कामिनं । स्वयं करिष्यते राज्यं वसुदेवो महामतिः १८ तस्य पुत्रस्तु भूमित्रस्तस्य नारायणः
सुतः । काण्वायना इमे भूमिं चत्वारिंशच्च पंच च ॥ शतानि त्रीणि भोक्ष्यंति वर्षाणां च कलौ युगे १९ हत्वा काण्वं सुशर्माणं तद्भृत्यो
वृषलो बली ॥ गां भोक्ष्यत्यंध्रजातीयः कंचित्कालमसत्तमः २० कृष्णनामाथ तद्भ्राता भविता पृथिवीपतिः । श्रीशांतकर्णस्तत्पु
त्रः पौर्णमासस्तु तत्सुतः २१ लंबोदरस्तु तत्पुत्रस्तस्माच्चिबिलको नृपः ॥ मेघस्वातिश्चिबिलकादटमानस्तु तस्य च २२ अनिष्टकर्मा
हालेयस्तलकस्तस्य चात्मजः । पुरीषभीरुस्तत्पुत्रस्ततो राजा सुनंदनः २३

राम
२

न्यास्पतितान्दाहाच्छुंगमिति । परस्त्रीकामिनं देवभूतिनामानं शुंगं हत्वा तदमात्यो वसुदेवनामा काण्वो राज्यं करिष्यति १८ काण्वानां चतुर्थः सुशर्मा ऽइमे च
वसुदेवादयः काण्वायनाः वर्षाणां त्रीणि शतानि पंचचत्वारिंशद्वर्षाणि च भूमिं भोक्ष्यंति १९ काण्वानामंतिमं सुशर्माणं हत्वा वलिहिकनामा तद्भृत्यो गां भो
क्ष्यति २० ३

यत्रपेषु वङ्गसंज्ञेषु शुङ्गेषु सुतनवमः शिवस्वातिनामा भवेपिता २४ ६ आवशृत्याः श्रवत्तिर्गोमतीतद्दात्मजः २२ ऐतेत्राभीराद्योमौनयतिरिक्ताः पंचषष्टिनृपाए
कोनशताधिकं वर्षसहस्रं पृथिवीं मोक्ष्यंति। ततः पूर्वोक्ता एवैकादशमौनाः श्री श्यद्दशतानि हिणिं भोक्ष्यंति। तैः संछिन्नेतेषु मौनेषु भूतेषु किलिकिलायां
पुर्यां नृपा तयो भविष्यंती त्वन्तरे ण्णाव यः २८ अधिकानि वषट्वर्षाणि ३० तेषां भूतनंदादीनां यथा यथं वाल्हिकनामानस्त्रयोदश सुताः भविष्यंति। पुष्यमित्रोना
वक्रोरोवटकोपत्रशिवस्वातिरविंद मातथ्यापिगोमतीपुत्रः पुरीमाद्रभवितााततः २४ मेदशिराः शिवस्कंदोपत्रश्रीस्नसुतस्ततः। विजयस्तसुतोमा
यश्चंडविज्ञः सुलोमधिः २५ एते त्रिंशत्रृपतयः चत्वार्यद्दशतानि षट् पंचाशच्च पृथिवीं भोक्ष्यंति क्रुरुनंदन २६ सप्ताभीराश्चावभृत्याद्दशगर्दभि
नोनृपाः। कंकाः षोडशनृपाला भविष्यंति वलोभुपाः २७ ततोष्टौ यवना भाव्याश्चतुर्दशतवत्तुष्कराः। त्रयोदशगुरुंडाश्च मौना एकादशैव तु २८
एते मोक्ष्यंति पृथिवीं दशवर्षशतानि च नवाधिकां च नवतिं मौना एकादशक्षितिं। भोक्ष्यंत्यद्दशतान्यंग त्रीणि तैः संछिन्नेततः २९ किलिकि
लायां नृपतयो भूतनंदोथ वंगिरिः। शिशुनंदिश्च तद्भ्राता यशोनंदिः प्रवीरकः। इत्येते वैवर्षशतं भविष्यन्त्यधिकानि षट् ३० तेषां त्रयोदशसुताभ
वितारश्च वाल्हिकाः। पुष्यमित्रोथ राजन्यो दुर्मित्रोस्य तथैव च ३१ एककाला इमे भूपाः सप्तांध्राः सप्तकौशलाः। विदूरपतयो भाव्या नैषधास्तत

वै २

एवहि ३२ रामापनमः

मान्योराजन्यः। अस्य वडुर्मित्रोन्यपुत्रः ३१ तथांध्राः कौशलाः वैदूरपतयः निषधाश्च। एतेवत्तत्तदेशनामभिः प्रख्यातास्तुल्यकालाः खंडमंडलेभुज
पाः। तत एते भोवाल्हिके भूप एव भाव्या भविष्यंति ३२ नारायणं नमः नमो नमस्ते॥ ॥७॥ ॥७॥ ॥ ॥ १११

भा·द्वा·
३

ततश्च मागधानां तु राजा विश्वस्फूर्जिर्नाम भविता। स च पुरंजयात्परः पुरंजय इति प्रसिद्धः सन् ब्राह्मणादीन् पुलिंदयदुमद्रकसंज्ञान् म्लेच्छप्रायान् करिष्यति। अपरानिति पाठे अन्यान् पुलिंदादीन् इमें ज्ञान् वर्णान् करिष्यतीत्यर्थः ३३ स च एवं कृत्वा अब्रह्मभूयिष्ठाः ये वर्णाः प्रचुराः मतीः प्रजाः स्थापयिष्यति पालयिष्यति। स च पद्मवत्यां पुरि। अनुगंगं गंगाद्वारमारभ्य प्रयागपर्यंतं गुप्तां पालितां मेदिनीं भोक्ष्यति ३४ तदनंतरं च सौराष्ट्रादिदेशवर्त्तिनो द्विजाः व्रात्याः उपनयन

मागधानां तु भविता विश्वस्फूर्जिः पुरंजयः॥ करिष्यत्यपरो वर्णान् पुलिंदयदुमद्रकान् ३३ प्रजाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः॥ वीर्यवान्
क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि। अनुगंगमाप्रयागं गुप्तां भोक्ष्यति मेदिनी ३४ सौराष्ट्रावंत्याभीराश्च शूद्रा अर्बुदमालवाः॥ व्रात्या द्विजा भविष्यं
ति शूद्रप्राया जनाधिपाः ३५ सिंधोस्तटं चंद्रभागां कौंतीं काश्मीरमंडलं॥ भोक्ष्यंति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः ३६ तुल्यकाला इमे रा
जन् म्लेच्छप्रायाश्च भूभृतः। एतेऽधर्मानृतपराः फल्गुदास्तीव्रमन्यवः ३७ स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः। उदितास्तमितप्रायाश्चाल्प
सत्वाल्पकायुषः ३८ असंस्कृताः क्रियाहीना रजसा तमसावृताः॥ प्रजास्ते भक्षयिष्यंति म्लेच्छा राजन्यरूपिणः ३९ तन्नाथास्ते जनपदास्त
च्छीलाचारवादिनः॥ अन्योन्यतो राजभिश्च क्षयं यास्यंति पीडिताः ४० इ श्री ग ते हा रा द्वा श धे थ ध्या ॥१॥

३प्रा

राम
३

रहिता भविष्यंति ३५ अब्रह्मवर्चसः। वेदाचारशून्याः ३६ इमे च म्लेच्छप्रायाः क्षत्रतुल्यकाला भविष्यंति। किंच। एते सर्वे अधर्मानृतपराः अधर्मे अनृते च परिनिष्ठि
ताः। फल्गुदाः अल्पदातारः ३७ उदितास्तमितप्रायाः हर्षशोकादिव्याकुलाः ३८ असंस्कृताः गर्भाधानादिसंस्काररहिताः प्रजाः भक्षयिष्यंति धनाद्यपहारादि
ना पीडयिष्यं ३९ किंच तन्नाथाः तेनाथा येषां ते जनपदाः देशवर्त्तिनो मनुष्याः तच्छीलाचारवादिनः तेषामिव शीलमाचारो वादश्च तद्वत्तः ४० इति द्वादशे प्रथमः १

क्षितीपेत्रकालेदैंसहृद्धोकल्क्यवतारतः॥ अधर्मिष्ठेजनेनष्टेपुनः कृतयुगागमः॥ कलिमिधर्मोत्रपंचप्रतितितस्रेत्यादिना १ धर्मन्यायव्यवस्थायांबलमेव २ दांपत्ये
पतिभावेअभिरुचिरेवहेतुः नकुलगोत्रादिः॥ व्यावहारिकेक्रयविक्रयादौ॥ स्त्रीत्वेपुंस्त्वेचरतिः श्रेष्ठारतिकौशलमेवहेतुर्नकुलमाचारोवा ३ आश्रमाणांख्यातौचाने
लिंगमेवदंडाजिनादिकंहेतुर्नत्वाचारविशेषः॥ अन्योन्यापत्तिकारणंचआश्रमादाश्रमांतरप्राप्तौचकारणं॥ यद्वा॥ बहूदककुटीचकहंसादीनामन्योन्यापत्तौनमस्कारादिव्यव

श्री क वा ततश्चानुदिनंधर्मःसत्यंशौचंक्षमादया॥ कालेनबलिनाराजन्नंक्ष्यत्यायुर्बलंस्मृतिः १ वित्तमेवकलौनॄणांजन्माचा
रगुणोदयः॥ धर्मन्यायव्यवस्थायांकारणंबलमेवहि २ दांपत्येभिरुचिर्हेतुर्मायैवव्यावहारिके॥ स्त्रीत्वेपुंस्त्वेचहिरतिर्विप्रत्वेसूत्रमेवहि ३
लिंगमेवाश्रमख्यातावन्योन्यापत्तिकारणं॥ अवृत्त्यान्यायदौर्बल्यंपांडित्येचापलंवचः ४ अनाढ्यतैवासाधुत्वेसाधुत्वेदंभएवतु॥ स्वीकारए
वचोद्वाहेस्नानमेवप्रसाधनं ५ दूरेवार्ययनंतीर्थंलावण्यंकेशधारणं॥ उदरंभरतास्वार्थःसत्यत्वेधार्ष्ट्यमेवहि ६ दाक्ष्यंकुटुंबभरणंय
शोर्थेधर्मसेवनं॥ एवंप्रजाभिर्दुष्टाभिराकीर्णेक्षितिमंडले ७ ब्रह्मविट्क्षत्रशूद्राणांयोबलीभवितानृपः॥ प्रजाहिलुब्धैराजन्यैर्निर्घृणैर्दस्यु
धर्मभिः ८ आछिन्नदारद्रविणायास्यंतिगिरिकाननं॥ शाकमूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः ९ अनावृष्ट्याविनंक्ष्यंतिदुर्भिक्षकर
पीडिताः॥ शीतवातातपप्रावृड्हिमैरन्योन्यतःप्रजाः १०

हारेकारणं॥ अवृत्त्यादारिद्र्येणादिदानासमर्थोन्यायदौर्बल्यंपराजयः॥ चापलंवचःवक्रभाषणं ४ असाधुत्वेह्यभियोगे॥ प्रसाधनंअलंकारः ५ दूरेवर्तमानंवार्य
यनंजलाशयस्तीर्थंनतुगुर्वादिस्वार्थःपुरुषार्थः ६ ८ आछिन्नाअपहृतादाराद्रविणंचयासांताः अष्टिर्बीजं ९ १० ॥छ॥ ॥छ॥ ॥ ॥ ॥

चौर्या२

११ क्षीयमाणेष्वित्यादीनां इत्थं कलौ गतप्राय इति पंचमेनान्वयः॥ क्षीयमाणेषु अल्पप्रायेषु १२ दस्युप्रायेषु चौरतुल्येषु। चौर्यानृतवृथाहिंसा नानावृत्तयो येषां तेषु
१३ छागप्रायासु अप्रमाणतः क्षीरतश्च अजावदल्पासु १४ स्थास्नुषु वृक्षेषु। विद्युत्प्रायेषु तडिद्वत्क्षणिकेषु। शून्यप्रायेषु धर्माद्विरहितेषु। सद्मसु गृहेषु १५ जनेषु खरवद्ध
र्मिणि दुःसहचेष्टिते कलौ॥ गतप्राये समाप्तप्राये १६ एतत्प्रपंचयति त्रिभिः चराचरगुरोः ईश्वरस्यैव। धर्मत्राणे हेतुः गुरुत्वेश्वरत्वयोरुपपादनं। अखिलस्य विश्व

क्षुत्तृड्भ्यां व्याधिभिश्चैव संतापेन च चिंतया। त्रिंशद्विंशति वर्षाणि परमायुः कलौ नृणां ११ क्षीयमाणेषु देहेषु देहिनां कलिदोषतः। वर्णाश्रमव
तां धर्मे नष्टे वेदपथे नृणां १२ पाषंडप्रचुरे धर्मे दस्युप्रायेषु राजसु। चौर्यानृतवृथाहिंसानानावृत्तिषु वै नृषु १३ शूद्रप्रायेषु वर्णेषु छागप्रायासु
धेनुषु। गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बंधुषु १४ अणुप्रायास्वोषधीषु शमीप्रायेषु स्थास्नुषु। विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु १५
इत्थं कलौ गतप्राये जनेषु खरधर्मिणि। धर्मत्राणाय सत्वेन भगवानवतरिष्यति १६ चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः॥ धर्मत्राणाय
साधूनां जन्म कर्मापनुत्तये १७ शंभलग्राममुख्यस्य ब्राह्मणस्य महात्मनः। भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति १८ अश्वमाशुगमारु
ह्य देवदत्तं जगत्पतिः। असिनासाधुदमनमष्टैश्वर्यगुणान्वितः १९ विचरन्नाशुना क्षौण्यां हयेनाप्रतिमद्युतिः। नृपलिंगच्छदो दस्यून्कोटिशो निहनि
ष्यति २०

लिं१

स्यात्मनः कारणस्येति॥ एवंभूतस्य विष्णोर्जन्म साधूनां धर्मत्राणाय। धर्मत्राणप्रयोजनमाह। कर्मोपनुत्तये मोक्षाय १७ शंभलग्रामे मुख्यस्य प्रधानस्य नाम्ना वि
ष्णुयशसो ब्राह्मणस्य भवने गृहे १८ धर्मत्राणप्रकारमाह। अश्वमिति। अस्याश्वो देवदत्तः तेन तमश्वमारुह्य। असिना दस्यून्कोटिशो हनिष्यतीत्यनंतरेणान्वयः। असा
धुदमन इति पाठे कल्किविशेषणं १९ तत्प्रपंचः। आशुना शीघ्रगामिना तेन हयेन क्षौण्यां विचरन्। अणिमाद्यष्टैश्वर्याणि गुणाश्च सत्यसंकल्पादयः तैरन्वितः नृप
लिंगच्छदः राजवेषच्छन्नः २०

स्रो

ततश्च पुनः कृतयुगप्रवृत्तिं वक्तुमाह। अथेति सार्द्धाभ्यां।। तेषां पौरजानपदानां मनांसि विशदानि भविष्यंति। तत्र हेतुः। वासुदेवस्यांगरागेण चंदनादिना।। तिष्यपुण्यगं
धो निलसंस्पर्शं तीति तथा तेषां २१ स्थविष्ठः स्थूलः २२ कृतयुगप्रवृत्तिमाह यदा अवतीर्ण इति प्रजानां प्रसूतिः प्रसूतिः २३ तदवतारकालोपलक्षणमाह।।
यदा चंद्रश्चेति। तिष्यः पुष्यः। अथ मर्थेः। चंद्रसूर्यबृहस्पतीनां यदा पुष्यनक्षत्रे योगः तदा तत्कृतयुगं भविष्यतीति।। यद्यपि प्रतिद्वादशाब्दं कर्कराशौ बृहस्प
तौ वर्तमाने द्विमासममावास्यासु तेषां त्रयाणां [illegible] पुष्ये योगः संभवति। तथापि तेषां सह प्रवेशोत्र विवक्षितः। समेष्यंतीति वचनात् अतो नातिप्रसंगः २४

अथ तेषां भविष्यंति मनांसि विशदानि वै।। वासुदेवांगरागाति पुण्यगंधानिलस्पृशां।। पौरजानपदानां वै हतेष्वखिलदस्युषु २१
तेषां प्रजाविसर्गश्च स्थविष्ठः संभविष्यति।। वासुदेवे भगवति सत्वमूर्तौ हृदि स्थिते २२ यदावतीर्णो भगवान् कल्किर्धर्मपतिर्हरिः। कृ
तं भविष्यति तदा प्रजासूतिश्च सात्विकी २३ यदा चंद्रश्च सूर्यश्च तथा तिष्यबृहस्पती।। एकराशौ समेष्यंति तदा भवति तत्कृतं २४
येतीता वर्तमाना ये भविष्यंति च पार्थिवाः।। ते त उद्देशतः प्रोक्ता वंशीयाः सोमसूर्ययोः २५ आरभ्य भवतो जन्म यावन्नंदाभिषेचनं
।एतद्वर्षसहस्रं तु शतं पंचदशोत्तरं २६

एवं नवमस्कंधमारभ्योक्तांतं वैवस्वतमनोर्वंशद्वयं निगमयति येतीता इति। उद्देशतः संक्षेपतः २५ कलियुगावांतरविशेषं वक्तुमाह।। आरभ्येत्यादिना
वर्षसहस्रं पंचदशोत्तरं शतं चेति कथाः प्रविवक्षया अवांतरसंख्येयं। वस्तुतः परीक्षिन्नंदयोरंतरं द्वाभ्यां न्यूनं वर्षाणां सार्द्धसहस्रं भवति।। यतः परीक्षित्सम
कालं मागधमार्जारिमारभ्य रिपुंजयांता विंशती राजानः सहस्रं संवत्सरं भोक्ष्यंतीत्युक्तं नवमस्कंधे। ये बार्हद्रथभूपाला भाव्याः साहस्रवत्सरमिति
तः परं च प्रद्योतना अष्टत्रिंशदुत्तरं। शिशुनागाश्च षष्ठ्युत्तरशतत्रयं भोक्ष्यंति पृथिवीमित्यत्रैवोक्तत्वात् २६

भा॰द्वा

५

कलेः प्रवृत्तिं दृढयितुं निरूपयितुं कालज्ञानोपलक्षणमाह। सप्तर्षीणां त्विति। अयमर्थः॥ प्रागग्रशकटाकारं ताराः सप्तकं सप्तर्षिमंडलं। तत्र किंचिदुन्नते पाश्चस्थानीये म
रीचिः ततः स्वाग्रानम्रयुगकंधराकारो वसिष्ठः सभार्यः। ततः पश्चादीषदुन्नते पार्श्वस्थानीयोऽङ्गिराः। ततः पश्चादवनतरस्तताराचतुष्कोर्ध्वे ईशान्येऽत्रिः। ततो दक्षिणतः पुलस्त्यः
। पुलस्त्यात्पश्चिमतः पुलहः। ततउत्तरतः क्रतुः। एवं स्थिते तेषां मध्ये यौ पूर्वौ उदयसमये प्रथमं दृश्येते तौ पुलहक्रतू तयोः क्रमध्ये तयोस्तु पूर्वयोस्तु मध्ये यत्समं दक्षिणतः
समदेशावस्थितमश्विन्यादिषु यदन्यतमं नक्षत्रं दृश्यते ७ तेन तथैव युक्ता नृणामब्दशतं तिष्ठंति ते त्वद्द्विजा त्वदीये काले अधुना मघामाश्रिता वर्त्तंते २८ यदा विष्णोर्भानुः

सप्तर्षीणां तु यौ पूर्वौ दृश्येते उदितौ दिवि। तयोस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि २७ तेनैव ऋषयो युक्तास्तिष्ठंत्यब्दशतं नृणां। ते त्वदीये द्विजाः
काले अधुना चाश्रिता मघाः २८ विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवं गतः। तदाविशत्कलिर्लोकं पापे यद्रमते जनः २९
यावत्स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः। तावत्कलिर्वै पृथिवीं पराक्रांतुं न चाशकत् ३० यदा देवर्षयः सप्त मघासु विचरंति हि। त
दा प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः ३१ हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे॥ ॥श्री॥ ॥

भातीति भानुः शुद्धसत्वात्मको देहः दिवं वैकुंठं गतः॥ तदा कलियुगमविशत्। यत्र यस्मिन्युगे जनः पापे रमते। इति कलियुगस्य लक्षणं २९ ननु श्रीकृष्णे पृथिव्यां व
र्त्तमानेऽपि संध्यास्वरूपेण कलिः प्रविष्ट एवासीत्॥ सत्यं। तथापि तद्वर्त्तनस्य पराक्रमो नाभवदित्याह यावदिति। पराक्रांतुं अभिभवितुं ३० अतो यथोक्त एव कलिप्रवेश
काल इत्याह यदा देवर्षय इति द्वादशाब्दशतात्मक इति दिव्येन मानेन संध्यांशाभ्यां सह यो द्वादशाब्दशतात्मकः स कलिः तदा संध्यामतिक्रम्य प्रविष्ट इत्यर्थः ३१

तौ॰टी॰

राम

५

कलेः प्रवेशकालमुक्त्वा तस्य वृद्धिकालमाह यदेति। प्रद्योतनात्प्रभृति वृद्धिं गच्छन्नं नन्दात्प्रभृत्यतिवृद्धिं गमिष्यतीत्यर्थः ३२ ननु यदा कलेर्लिंगमुपलब्धं तदैव प्रविष्ट इति युक्तं ततः पूर्वमेव प्रवेशः ततः परं वृद्धिरित्यत्र किं प्रमाणं तत्राह॥ यस्मिन्निति। प्रतिपन्नं प्रविष्टमिति ज्ञातं। पुराविदः सर्वज्ञातारः ३३ कलेरनंतरं कृतयुगप्रवेशमाह। दिव्यस्याब्दानामिति। चतुर्थे कलौ॥ प्रवेशनादपरिमितेनांशेनापि महातीते सतीत्यर्थः। कृतयुगप्रवेशचिह्नमाह। यदा नृणां मनः आत्मप्रकाशकं भविष्यति। त

यदा मघाभ्यो यास्यंति पूर्वाषाढां महर्षयः॥ तदा नंदात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति ३२ यस्मिन्कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि। प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः ३३ दिव्यस्याब्दसहस्रांते चतुर्थे तु पुनः कृतम्। भविष्यति यदा नृणां मनश्चात्मप्रकाशकं॥ इत्येष मानवो वंशो यथा संख्यायते भुवि। तथा विट्शूद्रविप्राणां तास्ता ज्ञेया युगे युगे ३५ एतेषां नामलिंगानां पुरुषाणां महात्मनाम्॥ कथामात्रावशिष्टानां कीर्तिरेव स्थिता भुवि ३६ देवापिः शंतनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः। कलापग्राममास्थाते महायोगबलान्वितौ ३७ ताविहेत्य कलेरंते वासुदेवानुशिक्षितौ॥ वर्णाश्रमयुतं सर्वं पूर्ववत्स्थापयिष्यतः ३८ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम्॥ अनेन क्रमयोगेण भुवि प्राणिषु वर्त्तते ३९ राजन्नेते मया प्रोक्ता नरदेवास्तथापरे। अस्मीयममत्वं कृत्वा ते हि विमानिधनं गताः ४०

देति ३४ राजवंशोक्तां स्थितिं ब्राह्मणादिवंशेष्वप्यतिदिशति। इत्येष इति। यथा याभिरुच्चनीचावस्थाभिः। ताभ्यास्ता अवस्थाः। वंश्याः इति च पाठः ३५ एतत्कीर्तनस्य वैराग्योपयोगितामाह। एतेषामिति। नामैव लिंगं ज्ञापकं येषां तेषां कथामात्रेणैवावशिष्टानां कीर्तिरेव स्थिता नतु राज्यपुत्रादयो वा ३६ कलावसन्नानां राजवंशादीनां पुनः प्रवृत्तिप्रकारमाह। देवापिः सोमवंशजः॥ मरुस्तु सूर्यवंशजः। कलापग्रामो नाम योगिनामावासः प्रसिद्धः ३७ ८ इममेव प्रकारं प्रतियुगं दर्शयति कृतमिति ३९ यत्तेषां नामलिंगानामित्यादि यदुक्तं तत्प्रपंचयति पंचभिः ४०

भा॰टी॰

६

मम त्वं ज्ञात्वेत्यनेन स्वचितां ज्ञातजोहं द्वन्द्वं निंदति क्रमीति। राजन्नाम्नः राजेति नाम यस्य तस्यापि हे हर्यांते ज्ञामयो विष्ठा मस्मेति वा संज्ञामविष्यंति। ततस्तानि तदर्थे पो
भूतस्तु ज्ञस्ते थ्योड्वत्यति स किं स्वार्थं वेदाज्ञात इत्यपेक्षायां हो त्वत्वेन ज्ञातजोहं विशिनष्टि यतो ज्ञातजोहान्निरयो भवतीति ४१ ममत्वप्रकारं प्रपंचयति। कथमिति
सेयमखंडा भूः। मेपूर्वजैः पुरुषैः धृतासती इदानीं मत्पूर्वावसतीमत्तद्वादेः कथं स्यादित्येवं ४२ उभौ मही कायं च अदर्शनं प्रहस्य ४३ उपसंहरति। येयेइति। ज्ञेस
र्वैवाकथा स्तु क्रियमाणा स्तु कथामात्राः कालेन कृताः ४४ ॥ ॥ द्वादशो द्वितीयः॥ ॥ तृतीये न्यं मिगीतैश्च राज्यदोषादि विरुप्यते॥ कलौ च दोषं स्वपिष्टे दोषं

ज्ञामि विड्भस्म संज्ञांते राजनाम्नोऽपि यस्य वा स्वतद्युक्त तज्ञातेस्वार्थे किं वेद निरयो यतः ४१ कथं सेयमखंडा भूः पूर्वैर्मे पुरुषैर्धृता। मत्पु
त्रस्य च पौत्रस्य मत्पूर्वा वंशजस्य वा ४२ तेजोऽवन्नमयं कायं गृहीत्वात्मनयाऽबुधाः। महीं ममतया चोभौ हित्वांतेऽदर्शनं गताः ४३ येये भू
पतयो राजन्भुंजंति भुवमोजसा। कालेन ते कृताः सर्वे कथामात्राः कथासु च। ४४ ॥ छ॥ ॥ इ श्री ग ते द्वा रा द्वा श धे
ती ध्या य श्चु ग ३ व दृष्ट्वात्मनि जये व्यग्रान्नृपान्हसति भूरियम्। अहो मां विजिगीषंति मृत्योः क्रीडनकान्नृपाः १ काम एष
नरेंद्राणां मोघः स्याद्विदुषामपि॥ येन फेनोपमे पिंडे येऽतिविश्रंभिता नृपाः २ पूर्वं निर्जित्य षड्वर्गं जेष्यामो राजमंत्रिणः॥ ततः सचिवपौराप्त
करींद्रान्स्यकंटकान् ३ राम

त्रीहर्येनेतिः। देहेऽहंताममतां कुर्वत्यतोऽस्य मत्स्य क्रांतदेव न्यं मिगीतैः प्रपंचयति। दृष्ट्वेत्यादिना। आत्मनि पृथिव्याः जये व्यग्रानुग्रफलान्हासप्रकारमेवाह। अहो इति।
येन कामेन फेनोपमे पिंडे देहे विश्रंभिता विश्वासं नीता ये तेषां नरेंद्राणां स एष कामो मोघः स्यात् २ काममेव दर्शयति द्वाभ्यां। पूर्वमिति। इंद्रियार्थलंपटस्य नराज्य प्राप्तिः स्या
दिति प्रथममिंद्रियषड्वर्गं निर्जित्य राजमंत्रिणो जेष्यामः वशीकरिष्यामः॥ सचिवाश्च मात्याः॥ करींद्राहस्तिपाः॥ तांश्च जेष्यामः॥ कंटकान्प्रतिपक्षात्॥ अस्याग्रपाठस्याग्रपा
कंटकानिति वा पाठः ३

राम

६

इति एवंके विदाशावद्धहृदयाः ४ एवंकेवित्तु नमां जित्वाथतितत्स्मयाब्धिं विशंति। तदेवमिंद्रियजयेन येराज्यं साधयितुमिच्छंति तेषां तिमंदाइत्याह किय
दिति ५ यतः यं तकं न पश्यंतीत्युक्तं तदेवाह यामिति। कुरूद्वहेति शुकमिगीतं कथयन् शुकः संबोधयति। कुलोद्वहा इति पाठः सुगमः ६ अवुद्धयः इत्युक्तं त
त्प्रपंचयति मत्कृत इति ७ ८ रामो नाम कश्चिद्राजा यद्वा। लोकदृष्ट्या दाशरथिरेव निर्दिष्टः ९ १० लोकं रावयति रोदयतीति लोकरावणः ११ १२ ममेति

एवं क्रमेणाजेष्यामः पृथ्वीं सागरमेखलां। इत्याशावद्धहृदया न पश्यंत्यंतिकेंतकं ४ समुद्रावरणां जित्वा मां विशंत्यब्धिमोजसा। कियदात्मजयस्यै
तन्मुक्तिरात्मजये फलं ५ यां विसृज्यैव मनवस्तत्सुताश्च कुरूद्वह। गता यथा गतं युद्धे तां मां जेष्यंत्यवुद्धयः ६ मत्कृते पितृपुत्राणां भ्रातॄणां
चापि विग्रहः। जायते ह्यसतां राज्ये ममतावद्धचेतसां ७ ममैवेयं मही कृत्स्ना न ते मूढेति वादिनः। स्पर्द्धमाना मिथो घ्नंति म्रियंते मत्कृते
नृपाः ८ पृथुः पुरूरवा गाधिर्नहुषो भरतोऽर्जुनः। मांधाता सगरो रामः खट्वांगो धुंधुहा रघुः ९ तृणविंदुर्ययातिश्च शर्यातिः
शंतनुर्गयः। भगीरथः कुवलयाश्वः ककुत्स्थो नैषधो नृगः १० हिरण्यकशिपुर्वृत्रो रावणो लोकरावणः। नमुचिः शंवरो भौमो हिरण्या
क्षोथ तारकाः ११ अन्ये च वहवो दैत्या राजानो ये महेश्वराः। सर्वे सर्वविदः शूराः सर्वे सर्वजितोजिताः १२ ममतां मय्यवर्त्तंत कृत्वोच्चैर्मर्त्यधर्मि
णः। कथावशेषाः कालेन ह्यकृतार्थाः कृता विभो १३ कथा इमास्ते कथिता महीयसां विताय लोकेषु यशः परेयुषां। विज्ञानवैराग्यविवि
क्षया विभो वचोविभूतीर्न तु पारमार्थ्यं १४

उच्चैर्मे ममतां कृत्वा ये अवर्त्तंत ते कालेन कथावशेषाः कृताः। विभो इति संबोधनं कुरूद्वहेतिवत् १३ राजवंशानुकथा इमा इति। विज्ञानविषयासारतां ज्ञानं।
ततो वैराग्यं तत्पौर्विवक्षया। परेयुषां मृतानां। वचोभूतीः वाग्विलासमात्ररूपाः। पारमार्थ्यं परमार्थमुक्तं कथनं न भवतीत्यर्थः १४

कस्मिन्हि युरुषाणामुपादेयः परमार्थः। तमाह यस्त्विति। नित्यं प्रत्यहं। तत्राप्यभीक्ष्णं १५ कलिदोषोपशये सति भक्तेः संभवं मंन्यमानः पृच्छति केनोपायेनेति। वि
धमिष्यंति नाशयिष्यंति। यथा यथावत् १६ कलियुगे कः परमो धर्म इति युग्मस्य पृच्छति युगानीति। ब्रूहीत्यनुषंगः। आत्यंतिकजिज्ञासया पुनः पृच्छति॥।
प्रलयकल्पयोः संहारस्थितिकालयोः। न वायं बहिर्भूतः परमेश्वरस्याहकालस्येति १७ तत्र युगधर्मांस्तावदाह कृत इति। तज्जनैस्तत्कालीनैर्धृतैः। दानं चरागद्वेष

यस्तूत्तमश्लोकगुणानुवादः संगीयतेऽभीक्ष्णममंगलघ्नः। तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः १५ रा उ वा
केनोपायेन भगवन्कलेर्दोषान्कलौ जनाः। विधमिष्यंत्युपचितांस्तन्मे ब्रूहि यथा मुने १६ युगानि युगधर्मांश्च मानं प्रलयकल्पयोः
। कालस्येश्वररूपस्य गतिं विष्णोर्महात्मनः १७ शु उ वा कृते प्रवर्त्तते धर्मश्चतुष्पात्तज्जनैर्धृतः। सत्यं दया तपो दानमिति पा
दा विभोर्नृप १८ संतुष्टाः करुणा मैत्राः शांता दांतास्तितिक्षवः॥ आत्मारामाः समदृशः प्रायशः श्रमणा जनाः १९ त्रेतायां धर्मपादा
नां तुर्यांशो हीयते शनैः॥ अधर्मपादैरनृतहिंसासंतोषविग्रहैः २० तदा क्रियातपोनिष्ठा नातिहिंस्रा न लंपटाः। त्रैवर्णिकास्त्रयीवृद्धा व
र्णा ब्रह्मोत्तरा नृप २१ तपःसत्यदयादानेष्वर्द्धं ह्रसति द्वापरे॥ हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः २२

तपश्चमयदानां तद्देवप्रथमस्कंधे शौवशब्देनोक्तं। विभोः संपूर्णस्य धर्मस्य १८ तदानींतनजनानाह संतुष्टा इति। मैत्राः सूनृतमैत्रीयुक्ताः। श्रमणीः। आत्माराम्यासंव
तः १९ २० ब्रह्मोत्तराः ब्राह्मणाधिकाः २१ अनृतेन सत्यं। हिंसया दया। असंतोषेण तपः॥। विग्रहेण दानमिति यथासंख्यं योज्यं। हिंसातुष्ट्यनृतद्वेषैरित्यपक्रमे
वावबन्धितः। धर्मस्यार्द्धं ह्रसति क्षीयते। अधर्मस्य लक्षणैः चिह्नैः

यशस्विनः।कीर्त्तिप्रियाः।क्षत्रद्विजोत्तमाः।क्षत्रियब्राह्मणप्रधानाः २३ कलौधर्म्मपादानांतुर्यांशः चतुर्थांशः षोडशोऽवशिष्यते २४ शूद्रादाशोत्तराःशूद्रकैवर्त्तादिप्रधा
नाः २५ युगानामेवंस्वतत्वैषम्यकारणमाहसत्वमितिपंचभिः २६ मनश्चबुद्धिश्चेंद्रियाणिचसत्वेयदाप्रसमवंतिश्चातिशयेनवर्त्तंते २७ यदाकर्मादिषुभक्तिःप्रीतिर्म्मद
रजोवृत्तिप्रधानंत्रेतायुगमितिजानीहि २८ काम्यानांकर्म्मणांविषयेयदाप्रीतिः।तत्तदाराजसतमःप्रधानंद्वापरंजानीहि २९ विषादनंदुःखं ३० कलि

यशस्विनोमहाशालाःस्वाध्यायाध्ययनेरताः।आढ्याःकुटुंबिनोहृष्टावर्णाःक्षत्रद्विजोत्तमाः २३ कलौतुधर्म्महेतूनांतुर्यांशोऽधर्म्महेतु
भिः।एधमानैःक्षीयमाणोह्यंतेसोऽपिविनंक्ष्यति २४ तस्मिन्लुब्धादुराचारानिर्दयाःशुष्कवैरिणः।दुर्भगाभूरितर्षाश्चशूद्रदाशोत्तराःप्रजाः
२५ सत्वंरजस्तमइतिदृश्यंतेपुरुषेगुणाः।कालसंचोदितास्तेवैपरिवर्त्तंतआत्मनि २६ प्रभवंतियदासत्वेमनोबुद्धींद्रियाणिवा।तदाकृतयुगं
विद्याज्ज्ञानेतपसियद्रुचिः २७ यदाकर्मसुकाम्येषुभक्तिर्भवतिदेहिनां।तदात्रेतारजोवृत्तिरितिजानीहिबुद्धिमन् २८ यदालोभस्त्वसंतो
षोमानोदंभोऽथमत्सरः।कर्म्मणांचापिकाम्यानांद्वापरंतद्रजस्तमः २९ यदामायानृतंतंद्रानिद्राहिंसाविषादनं।शोकोमोहोभयंदैन्यं
सकलिस्तामसःस्मृतः ३० यस्मात्क्षुद्रदृशोमर्त्याःक्षुद्रभाग्यामहाशनाः।कामिनोवित्तहीनाश्चस्वैरिण्यश्चस्त्रियोऽसतीः ३१

दोषात्प्रपंचयतियस्मादित्यादिना।यस्मात्कलेर्हेतोः क्षुद्रदृशः मंदमतयः।क्षुद्रभाग्याः।अल्पभाग्याः।महाशनाबह्वाहाराः वित्तहीनाश्चपि
कामिनः।स्वैरिण्यःपुंश्चल्यः।असतीः असत्यः ३२ रामायनमः कृष्णायनमः गोपालायनमः भवानीशंकराभ्यांनमः ॥ ॥छ॥ ॥ ॥

भा॰टी॰
८

दस्यवः उच्छास्त्राः प्रवृत्तायेश्रुते ३२ अव्रताविहिताचाररहिताः अशौचाः शौचरहिताः स्त्रवढयोऽब्रह्मचारिणो भविष्यंति। ऊटं विना स्वयं गृहस्थाः स्वयं भिक्षाटनपरा भविष्यंति
नत्तु भिक्षां दास्यंति। तपस्विनो वनस्थाः वनं हित्वा ग्रामवासा भविष्यंति। न्यासिनोपतयः अतिलोलुपा भविष्यंति। ३३ पुनरपि स्त्रीणां स्वभावमाह रूक्षकाया इति। कटु
कभाषिण्यः। अप्रियवादिन्यः। चौर्यंच। मायावकपटं। उरुत्वसाहसं यासां ताः ३४ किंच। किराटाः वणिजः पणयिष्यंति क्रयविक्रयादिव्यवहारं प्रवर्त्तयिष्यंति किंच।

दस्यूत्कृष्टा जनपदा वेदाः पाखंडदूषिताः॥ राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ३२ अव्रता वटवोऽशौचा भिक्षवश्च कुटुंबिनः॥ तपस्वि
नो ग्रामवासा न्यासिनोत्यर्थलोलुपाः ३३ ह्रस्वकाया महाहारा भूर्यपत्यागतह्रियः॥ शश्वत्कटुकभाषिण्यश्चौर्यमायोरुसाहसाः ३४ पण
यिष्यंति वै क्षुद्राः किराटाः कूटकारिणः॥ अनापद्यपि मंस्यंते वार्त्तां साधुजुगुप्सितां ३५ पतिं त्यक्ष्यंति निर्द्रव्यं भृत्या अप्यखिलोत्तमं॥ भृत्यं
विपन्नं पतयः कौलं गाश्चापयस्विनीः ३६ पितृभ्रातृसुहृज्ज्ञातीन्हित्वा सौरतसौहृदाः॥ ननांदृश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः
३७

राम
८

सर्वे जनाः अनापद्यपि जुगुप्सितां निंदितां वार्त्तां वृत्तिं साधुं मंस्यंते ३५ सर्वोत्तममपि तं द्रव्यहीनं भृत्यास्त्यक्ष्यंति। पतयश्च विपन्नं रोगादिभिर्व्यापारासमं। कौलं
कुलपरंपरायातं त्यक्ष्यंति। अपयस्विनीरदुग्धदोहाः ३६ सौरतं सुरतनिमित्तं सौहृदं येषां ते। अत एव ननंदारो भार्याभगिन्यः। श्यालाः भार्याभ्रातरः तैः
संवादो मंत्रालोचनं येषां ते। ननंदृ इति पाठः ३७

३९ पिशाचसंदर्शाः पिशाचसदृशाः ४० काकणिके विंशतिवराटकमात्रेऽप्यर्थे विषयकृते विगृह्य वैरं कृत्वा ४१ २ महांतमनर्थमाह । द्वाभ्यां कलाविति । त्रिलोकनाथैरवनतं नमस्कृतं पादपद्मं यस्य तं न यक्ष्यंति न याजयिष्यंति । पाषंडैर्विभिन्नमप्याहृतं चेतो येषां ते ४३ विवशोपि गृणन् । विमुक्ताः कर्मरूपाः अर्गलाः प्रति

शूद्राः प्रतिग्रहीष्यंति तपोवेषोपजीविनः ॥ धर्मं वक्ष्यंत्यधर्मज्ञा अधिरुह्योत्तमासनं ३८ नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्शिताः ॥ निरन्ने भूतले राजन्ननावृष्टिभयातुराः ३९ वासोऽन्नपानशयनव्यवायस्नानभूषणैः ॥ हीनाः पिशाचसंदर्शा भविष्यंति मनुजाः स्थविरौ पितरा कलौ प्रजाः ४० कलौ काकिणिकेप्यर्थे विगृह्य त्यक्तसौहृदाः ॥ त्यक्ष्यंति हि प्रियान्प्राणान्हनिष्यंति स्वकानपि ४१ न रक्षिष्यंति मनुजाः स्थविरौ पितरावपि ॥ पुत्रान्सर्वार्थकुशलान्क्षुद्राः शिश्नोदरंभराः ४२ कलौ न राजन्जगतां परं गुरुं त्रैलोक्यनाथानतपादपंकजं ॥ प्रायेण मर्त्या भगवंतमच्युतं यक्ष्यंति पाषंडविभिन्नचेतसः ४३ यन्नामधेयं म्रियमाण आतुरः पतन्स्खलन्वा विवशो गृणन् पुमान् ॥ विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यंति न तं कलौ जनाः ४४ पुंसां कलिकृतान्दोषान्द्रव्यदेशात्मसंभवान् ॥ सर्वान्हरति चित्तस्थो भगवान्पुरुषोत्तमः ४५ श्रुतः संकीर्तितो ध्यातः पूजितश्चादृतोपि वा ॥ नृणां धुनोति भगवान्हृत्स्थो जन्मायुताशुभं ४६

बंधा यस्य सः ४४ तदेवं कलिदोषान्प्रपञ्च्य प्रस्तुतं तन्निस्तारोपायमाह । पुंसामिति षड्भिः ॥ द्रव्यदेशात्मभिः संभवो येषां तान् । चित्तस्थः चित्ते स्फुरितः ४५ ६

भा॰द्वा
९

अथ मेवोपायो नास्तीति संदेहे दृष्टांतमाह यथेति। धातुजं ताम्रादिसंश्लेषजातं हेम्नो दुर्वर्णं मालिन्यम्। तत्र स्थितो वह्निरेव हरति न तु तोयादि। एवं योगिनामपि विष्णुरेव न तु योगादिकमित्यर्थः ४७ एतदेव विवृणोति। विद्येति। विद्या देवतोपासना। आत्मभावं स्वरूपं ४८ ५० इदानीं कलिं स्तौति साभ्यां। कलेर्दोषनिधे राजन्निति। तत्सर्वं हरिकीर्त्तनादेव कलौ भवति ५१ द्वादशे तृतीयः चतुर्थे चतुर्द्धा कालयाने मित्तिकादयः तत्र संसारनिस्तारो हरिकीर्त्तनाद्वर्ण्यते। कलि

यथा हेम्नि स्थितो वह्निर्दुर्वर्णं हंति धातुजं॥ एवमात्मगतो विष्णुर्योगिनामशुभाशयम् ४७ विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः॥ नात्यंतशुद्धिं लभतेंऽतरात्मा यथा हृदिस्थे भगवत्यनंते ४८ तस्मात्सर्वात्मना राजन्हृदिस्थं कुरु केशवं॥ म्रियमाणो ह्यवहितस्ततो यासि परां गतिम् ४९ म्रियमाणैरभिध्येयो भगवान्परमेश्वरः॥ आत्मभावं नयत्यंग सर्वात्मा सर्वसंश्रयः ५० कलेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः॥ कीर्त्तनादेव कृष्णस्य मुक्तबंधः परं व्रजेत् ५१ कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः॥ द्वापरे परिचर्यायां कलौ तद्धरिकीर्त्तनात् ५२ इ श्री भा ग ते हा पु रा द्वा श धे ती ध्या
श्री कृ ष्णा कालस्ते परमाण्वादिर्द्विपरार्द्धावधिर्नृप। कथितो युगमानं च शृणु कल्पलयावपि १

दोषनिवर्त्तकं हरिनामसंकीर्त्तनादिकं स एव च कलौ परमधर्म इति प्रस्तुतं पेयेद्योऽन्तरमुक्तम्। पश्चात्प्राप्ताद्युपस्थितं यतः कल्पयोर्मानं ब्रूहीति। तदिदानीं चतुर्द्धा योक्तकालान्नुवादपूर्वकं निरूपयति। काल इति। स कालः परमाण्वादिर्द्विपरार्द्धांतो परमाणुतामित्यादिना कालः कथितः चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं। संख्यातानि सहस्राणि द्विगुणानि शतानि चेति युगमानं च कथितम् १

राम
९

तत्रकल्पमानमाहचतुर्युगेति।।यत्रयत्रदेशमनवःक्रमेणभवंति।प्रलयस्तुचतुर्विधः २ नैमित्तिकःप्राकृतिकश्चात्यंतिकोनित्यश्चेति।तत्रनैमित्तिकंप्रलयंप्रमान
सहितमाह।तदंतइतिद्वाभ्यां।तावान्चतुर्युगसहस्रप्रमाणःसैवब्राह्मीरात्रिः ३ नैमित्तिकत्वंदर्शयति।तत्रयदाविश्वसृक्श्रीनारायणःविश्वमात्मसात्कृत्यप्रसुप्ति
इउपसंहृत्यशेते।आत्मभूःब्रह्माचतस्मिन्शेतेतयोरभेदविवक्षयावाब्रह्मणएवानंतासनत्वमुक्तं।ब्रह्मणोनिद्रानिमित्तीकृत्यप्रवर्त्तमानोलोकत्रयप्रलयोनै

चतुर्युगसहस्रंचब्रह्मणोदिनमुच्यते।।सकल्पोयत्रमनवश्चतुर्दशविशांपते २ तदंतेप्रलयस्तावान्ब्राह्मीरात्रिरुदाहृता।।त्रयोलोका
इमेयत्रकल्पंतेप्रलयायहि ३ एषनैमित्तिकःप्रोक्तःप्रलयोयत्रविश्वसृक्।शेतेनंतासनोविश्वमात्मसात्कृत्यचात्मभूः ४ द्विपरार्द्धेत्वति
क्रांतेब्रह्मणःपरमेष्ठिनः।।तदाप्रकृतयःसप्तकल्पंतेप्रलयायवै ५ एषप्राकृतिकोराजन्प्रलयोयत्रलीयते।।आंडकोशस्तुसंघातो
विघातउपसादिते ६ पर्जन्यःशतवर्षाणिभूमौराजन्नवर्षति।।तदानिरन्नेह्यन्योन्यंभक्ष्यमाणाःक्षुधार्दिताः।क्षयंयास्यंतिशनकैःका
लेनोपद्रुताःप्रजाः ७ सामुद्रंदैहिकंभौमंरसंसांवर्त्तकोरविः।।रश्मिभिःपिबतेघोरैःसर्वंनैवविमुंचति ८ ।। ।।८।। ।।

मित्तिकइत्यर्थः ४ प्राकृतिकंप्रलयमाहद्वाभ्यां।द्विपरार्द्धेइतिब्रह्मणआयुषि।सप्तप्रकृतयःमहदहंकारपंचतन्मात्राणि ५ संघातः।महदादिकार्यभूतः।प्रकृती
नांतत्कार्यब्रह्मांडस्यप्रलयात्प्राकृतिकइत्यर्थः।विघातेविघातकारणेउपसादितेसति ६ तदेवाहपर्जन्यइत्यादिना।।वृद्धीक्षयादिरूपेणोत्पतःशाक्तेनेन
ग्रंथेन ७ सामुद्रादिकंसर्वंरसंरविःपिबतेआकर्षति ८

रा॥
१०

अनिलवेगोत्थः वायुवेगोद्भूतः। अनिलवेगो वाः इति पाठे अनिलेन वेगो यस्य सः। वाः रविणा रश्मिभिः पीतमुदकं च दहतीत्यर्थः। अनिलवेगो वैः इति
त्पाठः सुगमः॥ भूविवरात्॥ पातालादीनष्टान्पातालरविणादैहिकरसाकर्षणात्प्राणिरहितात् ९ शिखाभिर्ज्वालाभिः १० किंचिदधिकं वर्षाणां शतं

ततः संवर्तको वह्निः संकर्षणमुखोत्थितः॥ दहत्यनिलवेगोत्थः शून्यान्भूविवरानथ ९ उपर्यधः समंताच्च शिखाभिर्वह्निसूर्य
योः॥ दह्यमानं विभात्यंडं दग्धगोमयपिंडवत् १० ततः प्रचंडः पवनो वर्षाणामधिकं शतं। परः संवर्तको वाति धूम्रं खं रजसावृतं
वाति धूम्रं खं रजसावृतं ११ ततो मेघकुलान्यंग चित्रवर्णान्यनेकशः। शतं वर्षाणि वर्षंति नदंति रभसस्वनैः। तत एकोदकं विश्वं
ब्रह्मांडविवरांतरं १२ तदा भूमेर्गंधगुणं ग्रसंत्याप उदप्लवे ग्रस्तगंधा तु पृथिवी प्रलयत्वाय कल्पते १३ अपां रसमथो तेजस्ता लीयंते
ऽथ नीरसाः। ग्रसते तेजसो रूपं वायुस्तद्रहितं तदा १४ लीयते वानिले तेजो वायोः खं ग्रसते गुणं। स वै विशति खं राजंस्ततश्च नभसो
गुणं १५ शब्दं ग्रसति भूतादिर्नभस्तमनु लीयते॥ तैजसश्चेंद्रियाण्यंग देवान्वैकारिको गुणैः १६ महान्ग्रसत्यहंकारं गुणाः
सत्वादयश्च तं। ग्रसतेऽव्याकृतं राजन्गुणान्कालेन नोदितं १७

राम
१०

संवर्तकः परः वायुर्वाति तदा रजसावृतं खं धूम्रं भवति ११ रभसस्वनैः तीव्रगर्जितैः॥ ब्रह्मांडविवरांतरं ब्रह्मांडविवरमध्यगतं विश्वं। एकोदकं एकार्णवो
दकव्याप्तं भवति १२ उदप्लवे उदकेनाप्लावितेसति। प्रलयत्वाय प्रभावाय १३ ५ भूतादिः तामसोऽहंकारः॥ गुणैर्वृत्तिभिः सह १६ अव्याकृतं प्रधानम् १७

तस्य तु लयो नास्तीत्याह । नतस्येति । कालावयवैः अहोरात्रादिभिः ॥ गुणाः भावविकाराः । परिणामः । विपरिणामः । अथ्युक्तं अस्ति तु विकारः शून्यं नित्यं सर्वदैकरू
पं षड्विरहितमित्यर्थः । अव्ययं पंचप्रपंचरूपं शून्यं । सर्वंच हेतुः कारणमिति १८ किंच । बाह्यारिगोचरस्य सविशेषस्य विकारा भवंति इदं तु न तथेत्याह । नयत्रेति । द्वाभ्यां । लो
ककल्पः लोकरूपः । संनिवेशो रचनाविशेषः १९ स्वप्नजाग्रत । स्वप्नजागरावस्थायुक्तः स । संसुषुप्तवत् इंद्रियाभावात् । शून्यसादृश्ये हेतुः अप्रतर्क्यं । नतु नः शून्यमे
वेत्याह । तदिति २० उपसंहरति लय इति । शक्तयः सत्वादयः २१ आत्यंतिकलयमाह । बुद्धींद्रियेति द्वादशभिः । आत्यंतिकलयो मोक्षः सवब्रह्मज्ञानेन सर्वप्र

न तस्य कालावयवैः परिणामादयो गुणाः । अनाद्यनंतमव्यक्तं नित्यं कारणमव्ययं १८ न यत्र वाचो न मनो न सत्वं तमो रजो वा महदादयोऽ
मी ॥ न प्राणबुद्धींद्रियदेवता वा न सन्निवेशः खलु लोककल्पः १९ न स्वप्नजाग्रन्न च तत्सुषुप्तं न खं जलं भूरनिलोऽग्निरर्कः ॥ संसुप्तवच्छून्य
वदप्रतर्क्यं तन्मूलभूतं पदमामनंति २० लयः प्राकृतिको ह्येष पुरुषाव्यक्तयोर्यदा ॥ शक्तयः संप्रलीयंते विवशाः कालविद्रुताः २१
बुद्धींद्रियार्थरूपेण ज्ञानं भाति तदाश्रयं ॥ दृश्यत्वाव्यतिरेकाभ्यामाद्यंतवदवस्तु यत् २२

५

पंचलयात्मकः न तु प्रपंचस्यात्मवस्तुत्वे लयः संभवति ॥ विज्ञानरूपात् ब्रह्मणः पृथग्भूतस्यासत्वमुपपादयति । बुद्धिश्च इंद्रियाणि च अर्थाश्चैतेषां ॥
ग्राहककरणग्राह्यरूपेण तेषामाश्रयं ज्ञानमेव भाति न पृथक् । तत्र हेतुमाह । दृश्यत्वाव्यतिरेकाभ्यामिति । अतो यदाद्यंतवत्तद्वस्तु । अत्रैवं प्रयोगः ॥ विम
तं मिथ्या भवति दृश्यत्वात् कारणाव्यतिरेकात् आद्यंतवत्वाच्च रज्जुसर्पादिवदिति २२

भा०टी० नत्राव्यतिरेकं दृष्टं तेन प्रपंचयति दीप इति। दीपचक्षूरूपाणां तेजो विशेषाणां यथा तेजसो न व्यतिरेकः। तथा धीः कर्त्री। खानि करणानि॥ मात्राः
विषयाः। ऋतात् ब्रह्मणः पृथक् न स्युः ब्रह्मकार्यत्वात्। ननु एवं कार्यकारणयोरत्यंतैक्ये कार्यासत्त्वे कारणस्याप्यसत्त्वं प्रसज्येत तत्राह। अन्यतमादिति कार्यदृशं
११ तद्व्यतिरिक्ताद्ब्रह्मणः प्रपंचाद्ब्रह्मणोऽव्यतिरेकः। प्रपंचस्य तु ततो नान्यव्यतिरेक इत्यर्थः २३ यदा तु बुद्धेरसत्त्वं तदा तदवस्था नास्तु तत्रामसत्त्वमि
त्याशयेनाह बुद्धेरिति। ननु विश्वतैजसप्राज्ञानां एतावदवस्था न तु बुद्धेरित्याशंक्याह। मायामात्रमिति। इदं विश्वतैजसप्राज्ञरूपं २४ आद्यंतवत्त्वादित्यस्य

दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथग्भवेत्॥ एवं धीः खानि मात्राश्च न स्युरन्यतमादृतात् २३ बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति चो
च्यते॥ मायामात्रमिदं राजन्नानात्वं प्रत्यगात्मनि २४ यथा जलधरा व्योम्नि भवंति न भवंति च। ब्रह्मणीदं तथा विश्वमवयव्यु ११
दयाप्ययात् २५ सत्यं ह्यवयवः प्रोक्तः सर्वावयविनामिह॥ विनार्थेन प्रतीयेरन् पटस्येवांग तंतवः २६

हेतोरसिद्धिमाशंक्य सावयवत्वेन साधयति यथेति। अवयवीति यः सावयवं तदाद्यंतवत् घटादिवदित्यर्थः। अतउदयाप्ययात् आद्यंतवत्त्वाद्धि शंसन्न भवतीप
र्थः। यद्वा। पृथगेवागमापायित्वाद्विश्वं मिथ्या। ब्रह्म तु तदवधित्वात् सत्यमित्यनेन साध्यते। दृष्टांतस्तु पूर्वोक्त एव। यथा जलधरा व्योम्नीति दृष्टांतस्यागा
मापायितदवधित्वमात्रे। ननु मिथ्यात्वे इति २५ अन्यतमादृतादिति प्रतिज्ञातकारणस्य सत्यत्वमुपपादयति। सत्यं हीति। अवयवः कारणं प्रोक्तः। वाचारंभ
णं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतिभिः अत्र युक्तिमपि दर्शयति। विनेति। अंग हे राजन् हि यस्मात्। अर्थेन अवयविना। विना पृथगेव अवयव
वाः प्रतीयेरन्। यथा पटस्यावयवाः तंतवः पटात् पृथक् प्रतीयं

नन्वकार्याभावे कारणत्वं ब्रह्मणः कुतो घटेत। सत्यं। तदपि नातीवसत्यमित्याह॥ यदिति॥ सामान्यात्। कारणं विशेषः कार्यं एतद्रूपेणान्योन्याध्यासात्परस्पर
स्परापेक्षत्वेन निरूपणात् सहत्वादित्यर्थः। अतः कारणत्वमवधित्वं व्यापकत्वमित्यादि क्रममपि परस्परापेक्षत्वादाद्यंतवत्तत्सर्वमवस्त्वित्यर्थः। यद्वा। तदेव हेतुत्वं तरमे
वतत्। यदुपलभ्येत सभ्रमः सामान्यविशेषरूपत्वात्। अन्योन्याध्यासादितीदमपि हेतुत्वं तत्संयुणणुणि विशेषणविशेष्यव्याप्यव्यापकत्वादिरूपेण परस्परा
धीनसिद्धत्वात् तथाभूतस्वप्नवदिति। निगमनं अतो यदाद्यंतवत्तत्सर्वमवस्त्विति २७ तदेवमनेकहेतुभिः प्रपंचस्यासत्त्वं प्रसाधितं। तत्र शंका ननु प्रपंचस्यापि प्रका

यस्मात्सामान्यविशेषाभ्यामुपलभ्येत सभ्रमः। अन्योन्यापाश्रयात्सर्वमाद्यंतवदवस्तु यत् २७ विकारः ख्यायमानोऽपि प्रत्यगा

न त्मानमंतरा। न निरूप्योऽस्त्यणुरपि स्याच्चेद्विसमश्चात्मवत् २८ नहि सत्यस्य नानात्वमविद्वान्परिमन्यते। नानात्वं भिन्नयोर्यद्व

त्ज्योतिषोर्वातयोरिव २९ यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु। एवं वचोभिर्भगवानधोक्षजो व्याख्या

यते लौकिकवैदिकैर्जनैः ३० ॥छ॥

शमानत्वादात्मवत्सत्यत्वं किं न स्यादिति। तत्राह। विकार इति। ख्यायमानः प्रकाशमानोऽपि विकारः प्रपंचः प्रत्यगात्मप्रकाशं विना अणुमात्रोऽपि न निरूप्योऽस्ति। तं विना निरू
प्यः स्याच्चेत्। तर्हि सोऽपि विसमः स्यात्। विरूपेणात्मना समः स्वप्रकाशो भवेत्। तथा च सति सोऽप्यात्मवद्रूपात् एकरूपः स्यादित्यर्थः २८ कुत इत्यत आह। नहीति
ननु सत्यस्याप्यात्मनो जीवब्रह्मरूपनानात्वमस्त्येव तत्राह॥ यद्येवं नानात्वं मन्यते तर्ह्यविद्वान्। कथं तर्हि तयोर्भेदव्यवहारः उपाधिकृत इत्याह॥ नानात्वमिति
तत्र भिन्नयोर्घटाकाशमहाकाशयोरिवेति। परिच्छेदापरिच्छेदे दृष्टांतः। ज्योतिषोः आकाशजलस्थसूर्ययोरिव तूपाधिकृतविकारसद्भावे। वातयोर्वा त्वं
शरीरस्थवाह्ययोरिवेति क्रियाभेदे २९ ब्रह्मण एवं प्रपंचव्यवहारालंबनत्वं दृष्टांतेन स्पष्टयति। क्रियाभिन्नत्वे नरवन भेदैर्बहुधा कटककुंडलादिरूपेण॥ लौकि
कवैदिकैर्वचोभिः जनैः अहंकारोपहितैः ३०

नन्वहंकारस्य कथं ब्रह्मस्वरूपावरणेन भेदग्राहकत्वं तस्य प्रकाश्यत्वाद्ब्रह्मावरकत्वासंभवात् आवरणेऽपि स्वस्यापि प्रकाशाभावादित्याशंक्य सदृष्टांतमाह। यथेति॥ अर्कः सूर्य एव मेघरूपेण परिणतो वर्षतीति॥ अमौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इत्यादिवचनात्॥ तस्मादर्कप्रभवः॥ अर्केणैव दर्शितः प्रकाशितः स्यात् तमः स्वरूपभूता अर्कदर्शनप्रतिबंधको भवति ३१ अहं अहंकारः ब्रह्मगुणः ब्रह्मकार्यभूतः तदीक्षितस्तेनैव प्रकाशितश्च। आत्मनो जीवस्य आत्मबंधनः ब्रह्मस्वरूपदर्शनप्रतिबंधको भवति ३२ अत एवाहंकारनाशे स्वरूपदर्शनं भव

यथा घनोऽर्कप्रभवोऽर्कदर्शितो ह्यर्कांशभूतस्य च वस्तुतः तमः। एवं त्वहं ब्रह्मगुणस्तदीक्षितो ब्रह्मांशकस्यात्मन आत्मबंधनः ३१
घनो यदार्कप्रभवो विदीर्यते स्वस्वरूपं रविमीक्षते तदा। यदा त्वहंकार उपाधिरात्मनो जिज्ञासया नश्यति तर्ह्यनुस्मरेत् ३२
मया यदैवं मतेन विवेकहेतिनामायाहंकरणात्मबंधनः छित्वाऽच्युतात्मानुभवेन वर्तते तमाजरात्यंतिकमंग संप्लवम् ३३ नित्य
दाः सर्वभूतानां ब्रह्मादीनां परंतप। उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रचक्षते ३४ कालस्रोतोजवेनाशु ह्रियमाणस्य नित्यदा
। परिणामिनामवस्थास्ता जन्मप्रलयहेतवः ३५

तीति तेनैव दृष्टांतेनाह। घन इति॥ आत्मन उपाधिः। जिज्ञासया विचारेण तर्हि तदा ह्यनुस्मरेत्। ब्रह्माहमिति पश्यतीत्यर्थः ३२ सोऽयमात्यंतिकः प्रलय इत्युपसंहरति यदैवमिति। विवेकहेतिना ज्ञानशस्त्रेण अहंकरणमेवात्मबंधनं॥ अच्युतं परिपूर्णमात्मानं अनु अनुभवतीत्यर्थः ३३ नित्यप्रलयमाह। नित्यदेति ३४ कुत इत्यत आह। कालेति॥ परिणामिनां नदीप्रवाहप्रदीपज्वालादीनां या उच्चनीचावस्थाः ताः कालरूपेण स्रोतसो वेगेनाशु ह्रियमाणस्य देहादेः दृश्यमानाः तदेव नित्यदा जन्मप्रलयहेतवो भवंति ३५

देहःप्रतिक्षणंप्रध्वंसी।प्रतिक्षणंअवस्थाभेदस्यविद्यमानत्वात्।प्रदीपादिवदित्यनुमानं।यदिप्रतिक्षणंअवस्थांतराणिभवंतितर्हिकिंनदृश्यंतेअतोहेत्वसिद्धस्तत्राशं
क्याह।अनाद्यंतवताकालेनजायमानाअवस्थानैवलक्ष्यंते।आकाशेगच्छतांज्योतिषांवेगादीनांगमनावस्थाविशेषाःयथानैवलक्ष्यंतेतद्वत्।अतोयथाते
षांप्रदेशांतरप्राप्त्याप्रतिक्षणंगत्यवस्थाःकल्प्यंते।तद्वदत्रापिवाल्यतारुण्यादिदर्शनेनमध्यवर्तिन्योऽवस्थाःकल्प्यंतइतिनहेत्वसिद्धइत्यर्थः ३६

अनाद्यंतवतानेनकालेनेश्वरमूर्तिना।अवस्थानैवदृश्यंतेवियतिज्योतिषामिव ३६ नित्योनैमित्तिकश्चैवतथाप्राकृतिको
लयः।आत्यंतिकश्चकथितःकालस्यगतिरीदृशी ३७ एताःकुरुश्रेष्ठजगद्विधातुर्नारायणस्याखिलसत्वधाम्नः।ली
लाकथास्तेकथिताःसमासतःकार्त्स्न्येननाजोऽप्यभिधातुमीशः ३८ संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्नान्यःप्लवो
भगवतःपुरुषोत्तमस्य।।लीलाकथारसनिषेवणमंतरेणपुंसोभवेद्विविधदुःखदवार्दितस्य ३९ पुराणसंहितामेतामृषि
र्नारायणोऽव्ययः।नारदायपुराप्राहकृष्णद्वैपाय

नुपसंहरति।नित्यइति ३७ पुराणार्थमुपसंहरति।लीलाविषयाःकथाः।।अजोब्रह्मापिकार्त्स्न्येनाभिधातुंनेशः ३८ ननुयदिसाकल्येनाभिधातुंनश
क्यंतेतर्हिकिंतदभिधानेनेत्यतआह।संसारेति।विविधंदुःखमेवदवोदावानलस्तेनार्दितस्यपीडितस्यअतएवउत्तितीर्षोःपुंसःभगवतोयालीलास्तासांक
थाःतासांरसस्तन्निषेवणमंतरेणान्यःप्लवस्तरणसाधनंनभवेत्।।उपायांतरासंभवात्तत्कथाश्रवणमेवयथाशक्तिनिषेव्यमित्यर्थः ३९ श्रोतृ
गौरवदार्ढ्यायसंप्रदायप्रवृत्तिमाह।पुराणसंहितामितित्रिभिः ४०

नवैवादरायणःप्रोक्तःमन्मात्वाश्रिमांसंहितांप्राहेतिपूर्वेणान्वयः ४१ असौसूतइतिसूतःस्थितमंगुल्यानिर्दिशन्नाहनैमिषालयेनैमिषारण्यस्थाने ४२
द्वादशस्कंधेवक्तव्यर्थः पंचमेतुसमासेनपरब्रह्मोपदेशतः॥राज्ञःश्मरुककमंदंशात्त्वत्सभीतिनिवारणम् १ एतत्पुराणंश्रुत्वैतन्मयंप्राप्नोतीत्यभिप्रे
त्यभिप्रेत्यपुराणार्थमनुस्मारयति।अत्रेति॥अयंभावः॥जगतःकर्त्ताब्रह्मापियस्यप्रसादजः।प्रसादोत्रजोरजोदृत्तिर्हर्षः॥ततोजातत्वात्स्मरतंतव्रजःस

सवैमत्र्यंमहाराजभगवान्बादरायणः॥इमांभागवतींप्रीतःसंहितांवेदसंमिताम् ४१ एतांवक्ष्यत्यसौसूतऋषिभ्योनैमि
षालये।दीर्घसत्रेकुरुश्रेष्ठसंपृष्टःशौनकादिभिः ४२ इ श्री भा ग व ते म हा पु रा णे पा र मं हं स्यां सं हि ता यां द्वा द
श स्कं धे च तु र्थो ऽ ध्या यः ४ श्री शु क उ वा च अत्रानुवर्ण्यतेभीक्ष्णंविश्वात्माभगवान्हरिः॥यस्यप्रसादजोब्रह्मारु
द्रःक्रोधसमुद्भवः १ त्वंतुराजन्मरिष्येतिपशुबुद्धिमिमांजहि॥नजातःप्रागभूतोद्यदेहवत्त्वंननंक्ष्यसि २

दिसंहर्त्तारुद्रश्चयस्यक्रोधसंभवोनतुस्वतंत्रः।सविश्वस्यात्मानियंताभगवानत्रानुवर्ण्यते॥अतएवंभूतंभगवंतंस्मरतःकुतोमृत्युभयशंकेतिति १
त्वंपुनःकृतार्थएवेत्यनुस्मारयतित्वंत्विति॥पशुबुद्धिंप्रविवेकं।यस्मात्त्वंनंक्ष्यसि।कुतइत्यतआह॥नजातइति।यथादेहःप्रागभूतएवाद्यजातोनंक्ष्य
तितथात्वंवैवंपूर्वंनाभूर्नाद्यजातोसिअतोननंक्ष्यसि॥

नन्वबीजांकुरवत्स्वस्मात् पुत्ररूपेणास्वयमेवभवति। यथाहश्रुतिः॥ अंगादंगात्संभवसि हृदयादभिजायसे। आत्मा वै पुत्रनामासि सजीवशरदः शतमिति॥ तत्र पुनरं
कुराद्बीजमिवपौत्ररूपेणापिस्वयमेवभवति। पिता पुत्रेणपितृमान्योनियोनावितिश्रुतेः। अतस्त्वं पुनस्पस्तकथंननंक्ष्यामीतिचेत्तत्राह न नभविष्यसीति। स्वत्वा पुत्रपौ
त्रादिरूपवान्बीजांकुरवन्नभविष्यसि। यस्माद्देहादेर्व्यतिरिक्तास्त्वम्॥ यथानलः काष्ठात्॥ देहाद्देहेजायेते नात्मेतिभावः ३ जन्मादीनां देहधर्मत्वं दृष्टांते न प्र
पंचयति। स्वप्ने यथात्मनः शिरःछेदं स्वयं पश्यति॥ एवंजागरणेपि। यस्माद्देहस्यपंचत्वादिकं पश्यसीति॥ तत्तस्माद्देहेगात्मन इदंश्च मे मा भूत्॥ वस्तुतस्त्वात्मा जोऽमरश्चेत

नभविष्यसि स्वात्वं पुत्रपौत्रादिरूपवान्॥ बीजांकुरवद्देहादेर्व्यतिरिक्तो यथाऽनलः ३ स्वप्ने यथा शिरश्छेदं पंचत्वाद्य
द्यात्मनः स्वपश्य॥ यस्मात्पश्यसि देहस्य ततस्त्वात्मा ह्यजोऽमरः ४ घटे भिन्ने यथाकाश आकाशः स्याद्यथा पुरा एवं देहे
मृते जीवो ब्रह्मसंपद्यते पुनः ५ मनः सृजति वै देहान् गुणान्कर्माणि चात्मनः तन्मनः सृजते माया ततो जीवस्य संसृतिः ६

र्थः॥ तदुक्तं॥ आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ। न भवस्य पवस्तूनामभिज्ञोऽद्वयलक्षणइत्यादि ४ यस्माद्देहोपाधिकोऽयमात्मनोजन्मादिसंसारभ्र
मः। तस्मादुपाधिनिवृत्तौ मुच्यतइतिसदृष्टांतमाह॥ घटइति। यथापुराघटोपाधेः पूर्वमिवपुनर्घटेभिन्नेतदंतर्वर्त्यवकाशः आकाशएवस्याद्यथा॥ एवंदेहेमृते
तत्वज्ञानेनलीनेसति ५ ज्ञानेनलयंसंभावयितुंमायात्कृतमात्मनोदेहाद्युपाधिसंबंधप्रकारमाह। मनइति॥ मनआत्मनोदेहादीन्सृजति॥ तच्चमनोमा
याकृजति। ततोमायाद्युपाधिसद्भावात् ६

२५

भा॰टी॰
१४

एतदेवसदृष्टांतमाहसार्द्धेनमेहेति।दीपस्यज्योतिषः।दीपत्वंज्वालारूपःपरिणामः।तत्रतैलस्थानीयंकर्म्म।तदधिष्ठानस्थानीयंमनः।वह्निस्थानीयोदेहः
।अग्निसंयोगस्थानीयश्चैतन्याध्यासः।दीपस्थानीयःसंसारइतियोज्यम्।देहस्थतःदेहनिबंधनः।यद्वादेहस्थतोमनसःनत्वात्मनः २ अतोदीपवत्संसारएव
नश्यतिनत्वात्माज्योतिर्वदित्याह॥नेति॥नतुतत्रप्रतीयमानःआत्मा।कुतस्तत्रतथाहयतः॥व्यक्ताव्यक्तयोःस्थूलसूक्ष्मदेहयोःपरःअर्थः।अतःस्वयंज्योतिः
॥परत्वंप्रपंचयति॥आकाशइवेति॥आधारोदेहादेःप्रपंचस्य।ध्रुवोनिर्विकारः।नास्त्यंततउपमायस्यसोनंतोपमः॥ततोविभुः ८ अतस्तमेनंचिंतयेत्याह

मेहाधिष्ठानवन्मोग्निसंयोगोयावदीयते।ततोदीपस्यदीपत्वमेवंदेहकृतोभवः ७ रजःसत्वतमोवृत्त्याजायतेथविनश्यति।
नतत्रात्मास्वयंज्योतिर्योव्यक्ताव्यक्तयोःपरः॥आकाशवत्सर्वाधारोध्रुवोनंतोपमस्मृतः ८ एवमात्मानमात्मनैवास्तशाश्रमे॥
बुद्ध्याऽनुमानगर्भिण्यावासुदेवानुचिंतया ९ चोदितोविश्ववाक्येननत्वांधक्ष्यतितद्रूपकः॥प्रत्यग्वोनोपधिर्द्वंतिप्रत्यग्नांप्रा
त्मीश्वरं १० अहंब्रह्मपरंधामब्रह्माहंपरमंपदं।एवंसमीक्ष्यचात्मानमात्मन्याधायनिष्कले ११ रामकृष्णः॥ ॥ध॥

एवमिति॥आत्मस्थंदेहाद्युपाधिभिश्चितम्।आत्मशक्तिवारय॥अनुमानगर्भिण्यापादृष्टदृष्टदृशप्राप्तपद्यतिरेकयुक्त्याया ९ एवंचसतित्वांतत्कृतकोनदहेदित्याह॥चो
दितइति॥तत्रहेतवः।स्वत्परइतिस्वस्तुहेतवः १० विमर्शप्रकारंदर्शयन्नत्तत्फलंदर्शनंदर्शयतिद्वाभ्याम्॥योऽहंसब्रह्मैव।यद्ब्रह्मतदहमेवेतिसमीक्ष्य॥त
त्राहंब्रह्मेतिभावनयाजीवस्यशोकादिनिवृत्तिः॥ब्रह्माहमितिभावनयाचब्रह्मणःपारोक्ष्यनिवृत्तिर्भवतीतिद्योतयितुंहारोदर्शितः॥निष्कलेनिरुपाधौ॥

न ७
नमारल
राम
१४

विषयुक्तैराननैर्दशंतं ग्रसंतं तक्षकं। लेलिहानं सर्प्पं। पन्नगा लोलिहानं जिव्हाभिरोष्ठप्रांतं मलिखेषमा आदयंतं। आत्मनः पृथङ्‌ १२ हरेश्चेष्टां। आत्मा त्वं। यत्स्वष्ट
वान्। तदेतत्ते कथितं। शिष्यस्य कृतार्थतापरीक्षणं पृष्टवानिति किमिति १३ द्वादशस्कंधे पंचमो ध्यायः षष्ठे परीक्षितो मोक्षः सर्प्पहोमादितत्त्वतान्। वेदशाखा
विभागोक्तौ त्रिवेदिव्यासवर्णनं॥ एतत्करणं निशम्य निखिलात्मा हरिस्तं पश्यति निखिलं वात्मनि पश्यतीति तथा तेन॥ अतः समेन॥ ततेन अवनतेन मूर्ध्ना

दशंतं तक्षकं पादे लेलिहानं विषाननैः॥ न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः १२ एतत्ते कथितं तात यथात्मा पृष्टवान्नृप। हरे
र्विश्वात्मनश्चेष्टां किं भूयः श्रोतुमिच्छसि १३ इतिश्री ग ते हा रा द्वा श धे मा ल णं च ध्या श्री कृ
वा एतन्निशम्य मुनिनाऽभिहितं परिक्षिद्व्यासात्मजेन निखिलात्मदृशा समेन। तत्पादमूलमुपसृत्य नतेन मूर्ध्ना बद्धांज
लिस्तमिदमाह स विष्णुरातः १ रा वा सिद्धोस्म्यनुगृहीतोस्मि भवता करुणात्मना। श्रावितो यच्च मे साक्षादनादिनि
धनो हरिः २ नात्यद्भुतमहं मन्ये महतामच्युतात्मनां। अज्ञेषु तापतप्तेषु भूतेषु यदनुग्रहः ३ पुराणसंहितामेतामश्रौष्म भव
तो वयं। यस्यां खलूत्तमश्लोको भगवाननुवर्ण्यते ४ भगवंस्तक्षकादिभ्यो मृत्युभ्यो न बिभेम्यहं। प्रविष्टो ब्रह्मनिर्वाणमभयं द
र्शितं त्वया ५

तत्पादं तलमुपसृत्य तस्य पादौ शिरसि निधायेत्यर्थः १ सिद्धः कृतार्थोऽस्मि॥ यतः अनुगृहीतोस्मि॥ अनुग्रहमेवाह॥ यत् यस्मात् श्रावितः॥ वशादान्वाभि
साधनं च। २ करुणात्मतामभिनंदति॥ द्वाभ्यां॥ नात्यद्भुतमिति ३ अश्रौष्म श्रुतवंतः भवतः सकाशात्‌ ४ सिद्धोस्मीत्युक्तं तदेवाविः करोति भगवन्नि
ति। यतः त्वया दर्शितं ब्रह्म प्रविष्टः॥ कथंभूतं॥ अभयं। यतो निर्वाणं। कैव

किं त्वं यः श्रोतुमिच्छसीति पृष्टः तत्र भिद्ये अहं न किं विद्धि तत्र भिद्यामि केवलामनुज्ञां देहीत्याह । अनुजानीहीति ॥ वाचमित्युपलक्षणं सर्वेंद्रियाणां ॥ वाचं नि
यच्छ किं करिष्यामि तदाह ॥ मुक्ताः कामाशया स्मिन्द्राः समनायेन तर्ह्यतः श्र भेक्षुजे प्रवेश्य ब्रह्म विसृजामि ६ नतु किं प्राणत्यागेनकं विकालं ज्ञाननिष्ठो भवे
ति वेत ॥ तत्राह ॥ अज्ञानं चेति ॥ चकारात् संस्काराश्च ॥ तच्च तत्रूपपयैवेत्याह ॥ भवते ति ७ आत्मना बुद्ध्या आत्मानं मनः ॥ आत्मनि प्रत्यक्रूपप्रकाशे समा

अनुजानीहि मां ब्रह्मन्वाचं यच्छाम्यधोक्षजे । मुक्तकामाशयं चेतः प्रवेश्य विसृजाम्यसून् ६ अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठ
या ॥ भवता दर्शितं क्षेमं परं भगवतः पदं ७ सू उ व इत्युक्तस्तमनुज्ञाप्य भगवान्बादरायणिः ॥ जगाम भिक्षुभिः साकं न
रदेवेन पूजितः ८ परीक्षिदपि राजर्षिरात्मन्यात्मानमात्मना ॥ समाधाय परं दध्यावस्पंदासुर्यथा तरुः ९ प्राक्कूले बर्हिष्यासी
नो गंगाकूल उदङ्मुखः ॥ ब्रह्मभूतो महायोगी निःसंगः छिन्नसंशयः १० तक्षकः प्रहितो विप्राः क्रुद्धेन द्विजसूनुना हंतुकामो नृपं
गच्छन्ददर्श पथि कश्यपम् ॥ ११ तं तर्पयित्वा द्रविणैर्निवर्त्य विषहारिणम् ॥ द्विजरूपप्रतिच्छन्नः कामरूपो ऽदशन्नृपम् १२

उ
राम
१५

धाय परमात्मानं दध्यौ ॥ अस्पंदासुः लीनप्राणः ॥ यथा तरुः स्थाणुः ९ तमेव विशिनष्टि ॥ प्राक्कूले प्रागग्रे ॥ बर्हिषि दर्भे ॥ तदेवं ब्रह्मभूते तस्मिन् तक्षका
गमनादिकं पिदृष्टयेषणमिवाभवदिति ॥ तक्षक इति त्रिभिः १० हे विप्राः ॥ तं विषचिकित्सया परीक्षिद्रक्षणेन द्रव्यार्जनाय गच्छंतं ११ तत्रस्थालीढवद्वृ
क्षस्य भस्मीभूतस्य पुनरंकुरादिक्रमेणोत्थापनात्तद्विषहारिणं ॥ तदपेक्षितं द्रविणैः संतर्प्य ततो निवर्त्य द्विजरूपेण प्रतिरोहितः सन्नदशत् १२

तव पुत्र क्रतुमिव ज्ञातमित्याह॥ ब्रह्मन्नतस्येति १३ तत्क्षणं सर्वे पांडुः खं वततः परस्तु सत्रं वा हद्वाद्यो हाहाकार इति १४ प्रासंगिकमाह। जनमेजय इत्यादि॥ सर्पाभिचारसत्रे द्विजैः सहवर्तमानः पथावद्राज्ञ्हाव ज्जुहावेति वा॥ सर्वसर्पावाहनेकारणमाह॥ संक्रुद्ध इति १६ ७ कस्मन्नतकोनदत्येतेत फलाः संतोद्विजाः जुहुः

न २

ब्रह्मन्नतथा राजर्षेर्दह्यो हि गरलाग्निना॥ बभूवनस्म मासाद्यः पश्यतां सर्वदेहिनां १३ हाहाकारो महानासीत्तत्र्वविरेवे दिक्रुमर्द्धतः। विस्मितात्यभगौवत्र सर्वदेवाः सुरर्षयः शादयः १४ देवदुंदुभयो नेदुर्गंधर्वाप्सरसो जगुः॥ ववर्षुः पुष्पवर्षाणि विबुधाः साधुवादिनः १५ जनमेजयः स्वपितरं श्रुत्वा तक्षकभक्षितम्॥ यथाज्जुहाव संक्रुद्धो नागाग्निसत्रे सह द्विजैः १६ सर्पसत्रे समिद्धाग्नौ दह्यमानान्महोरगान्॥ दृष्ट्वेंद्रं भयसंविग्नस्तक्षकः शरणं ययौ १७ अपश्यंस्तक्षकं तत्र राजा पारिक्षितो द्विजान्। उवाच तक्षकः कस्मान्न दह्येतोरगाधमः १८ तं गोपायति राजेंद्र शक्रः शरणमागतम्॥ तेन संस्तंभितः सर्पस्तस्मान्नाग्नौ पतत्यसौ १९ पारिक्षित इति श्रुत्वा प्राहर्त्विज उदारधीः॥ सहेंद्रस्तक्षको विप्रा नाग्नौ किमिति पात्यते २० तच्छ्रुत्वाजुहुवुर्विप्राः सहेंद्रं तक्षकं मखे॥ तक्षकाशु पतस्वेह सहेंद्रेण मरुत्वता २१ इति ब्रह्मोदिताक्षेपैः स्थानादिंद्रः प्रचालितः॥ बभूव संभ्रांतमतिः सविमानः सतक्षकः २२ तं पतंतं विमानेन सह तक्षकमंबरात्॥ विलोक्यांगिरसः प्राह राजा

तमिति॥ तेन इंद्रेण॥ असौ सर्पः १९ ऋत्विजः प्रतिप्राह॥ सहेंद्रः इंद्रसहितः किमिति न पात्यते २० तदा ते ओवदः श्रुत्वा आजुहुवुः॥ साक्षेपमाकानंदर्शयति॥ तक्षकेति॥ इहाग्नावाशु पत मरुत्वता मरुद्गणवता इंद्रेण सह २१ ब्राह्मणैरुक्तैराक्षेपैः परुषवाक्यैः॥ स० तक्षकः २२ अंगिरसः पुत्रो बृहस्पतिः प्राह २३

भाग्व
१६

२४ भवत्वनामा जरामरः॥ तथापि पितृमारकं धक्ष्यामीति चेत्तत्राह॥ जीवितमिति॥ गतिः परलोकः॥ अतोऽत्र कर्मणा निमित्तेन पितुर्दुर्गतिरनेन कृतेत्य
पि न शंकनीयमित्यर्थः २५ कथमन्यः सुखदुःखप्रदाता नास्ति॥ सर्पादीनामुपलभ्यमानत्वादिति चेत्तत्राह॥ सर्पादिनाशेत्तुः पवनं स्पृष्टं तिष्ठाप्नो
तीति पत्ततदा स्वकर्मैव भुंक्ते। स्वकर्मप्रयुक्ता एव सर्पादयो न स्वतंत्रा इति भावः २६ संक्षीयेत समाप्यताम्॥ आभिचारकं हिंसाफलम्॥ दिष्टं प्राचीनं कर्म॥

पु २ रा १

नैष त्वया मन्त्रिश्रेष्ठ वधमर्हति सर्पराट्॥ अनेन पीतममृतं न मथं वा अजरामरः २४ जीवितं मरणं जन्तोर्गतिः स्वेनैव कर्मणा॥ राजन्नतोऽस्यो नान्यस्य प्रदाता सुखदुःखयोः २५ सर्पचौराग्निविद्युद्भ्यः क्षुत्तृड्व्याध्यादिभिर्नृप॥ प्राप्तं तस्य हि तज्जंतुर्भुंक्ते प्रारब्धकर्मतः २६ तस्मात्सत्रमिदं राजन्संक्षीयेताभिचारकम्॥ सर्पाग्निनागसोऽदग्धा जनैर्दिष्टं हि भुज्यते २७ इत्युक्तः स तथेत्याह महर्षेर्मानयन्वचः॥ सर्पसत्रादुपरतः पूजयामास वाक्पतिं २८ सैषा विष्णोर्महामायाऽबाध्याऽलक्षणा यया॥
मुह्यंत्यस्यैवात्मभूता भूतेषु गुणवृत्तिभिः २९

राम
१६

अतः सर्पो दृष्टप्रयुक्तः स तवाप्यपेनापराध इति भावः २७ वाक्पतिं बृहस्पतिं २८ ननु कथं विदुषामप्येवं संमोहः॥ यतो बालकोपात्परीक्षितोऽपि सुतः जनमेजयकोपात्सर्पाणामित्यादि। तत्राह॥ सैषेति॥ तस्या महत्त्वं दर्शयति अलक्षणा न लक्ष्यत इत्यलक्षणा अप्रतर्क्येत्यर्थः॥ कस्मादित्यत आह॥ यया अस्य विष्णोरेवांशभूताः आत्मांशभूताः प्राणिनः गुणवृत्तिभिः क्रोधादिभिः भूतेषु देहेषु मुह्यंति बाध्यबाधकतां भजंतीत्यर्थः॥ ननु श्रवणादिना बाधितया कृतो मोहः स्या
न्नत्राह॥ अबाध्यया बाधितुमशक्यया २९

कथं तर्हि मायातत्कार्ये निवृत्तिरित्याशंक्य श्रीविष्णुस्वरूपनिरूपणपूर्वकं तद्भजनात् सर्वानर्थनिवृत्तिरिति शास्त्रार्थमुपसंहरति ॥ नयत्रेति पंचभिः ॥ दंभीति या माया ॥ कपटवानयं भ्रमानित्येवं भूता या बुद्ध्यावसक्तुड्यद्भिरथ्यमाना या मायेत्यर्थः ॥ सा चात्मवादे क्रियमाणे ह्यात्मवादिभिर्यत्राभयान विराजिता न च काशिता ॥ किंतु भीतेव स्वकार्यं मोहादिकमकुर्वती कथं चित्तत्वज्ञं न शक्नोति प्रतिपादितेत्यर्थः ॥ तदुक्तम् ॥ तस्मै नमो भगवते वासुदेवाय धीमहि । यन्मायया दुर्जयया मां वदंति जगद्गुरुम् ॥ विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया ॥ विमोहिता विकत्थंते ममाहमिति दुर्धियः इति ॥ किंच यस्मिन् ॥ तदाश्रयो मायाश्रयो

आत्मस्वरूपे =

नयत्र दंभीत्यभया विराजिता मायात्मवादे सकृदात्मवादिभिः ॥ न यद्विवादो विविधस्तदाश्रयो मनश्च संकल्पविकल्पवृत्ति यत्
३० न यत्र सृज्यं सृजतोभयोः परं श्रेयश्च जीवस्त्रिभिरन्वितस्त्वहम् ॥ तदेतदुत्सादितबाध्यबाधकं निषिध्य चोर्मीन्विरमेत्स्वयं मुनिः ३१

विविधो वादोपि नास्ति विशेषविषयत्वाद्विवादानां ॥ तस्य च विशेषातीतत्वादिति भावः ॥ संकल्पविकल्पात्मवृत्तिर्यस्य तन्मनोपि यत्र नास्ति ॥ संकल्पविकल्पानामपि विशेषविषयत्वात् ३० सृज्यं कर्म स्रजनं कारकवर्गेण सह ॥ उभयोः सृज्यस्रष्ट्रोः परं साध्यं श्रेयः फलमपि यत्र ॥ तत्र सृज्यस्रष्टृफलैरन्वितो जीवश्चाहंकारात्मकोपि यत्र नास्ति ॥ यत उत्सादितौ निरस्तौ बाध्यबाधकौ यस्मिन् तत्तदेतत् ॥ स्वयं आत्मस्वरूपमित्यर्थः ॥ तस्मिन्नूर्मीनहंकारादीन्निषिध्य विरमेत् विशेषेण क्रीडेदित्यर्थः ३१

भा॰द्वा

१७

यतस्तद्वैष्णवंपरमामनंतीत्याह॥परमितितद्यदेतत्तदेवपरंवैष्णवंपदंस्वरूपमामनंति।कोऽसौअतदात्मव्यतिरिक्तंउत्सिसृक्षवःत्यक्तुमिच्छवः॥यतःअनन्यसौहृदाः नास्तिअन्यस्मिन्सौहृदंयेषांते।कुतः॥दौरात्म्यंदेहाद्यहंभावंविसृज्यदेहेअहंकाराभावादन्यत्रसौहृदंनास्ति।अतस्त्यक्तुमिच्छवइत्यर्थः॥कथंनेतीत्येवं॥अ नविद्यदत्तमवमपिअमाणयतिहृदोपगुत्यध्यानादिना॥ततःसमाहितैरेवमितंनिश्चितं॥यद्वा।अवसितंअवंद्यआत्मतयागृहीतमित्यर्थः ३२ एवंप्रासाव

परंपदंवैष्णवमामनंतितद्यन्नेतिनेतीत्यतदुत्सिसृक्षवः॥विसृज्यदौरात्म्यमनन्यसौहृदाहृदोपगुह्यावसितंसमाहितैः ३२ तएतद धिगच्छंतिविष्णोर्यत्परमंपदम्॥अहंममेतिदौर्जन्यंनयेषांदेहगेहजम् ३३ अतिवादांस्तितिक्षेतनावमन्येतकंचन॥नचैवंदेहमा श्रित्यवैरंकुर्वीतकेनचित् ३४ नमोभगवतेतस्मैकृष्णायाकुंठमेधसे॥यत्पादांबुरुहध्यानात्संहितामध्यगामिमाम् ३५ शौ क॰ वा॰ पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः॥वेदाश्चकथिताव्यस्ताएतत्सौम्याभिधेहिनः ३६ सू॰ उ॰ वा॰ समाहितात्मनो ब्रह्मन्ब्रह्मणःपरमेष्ठिनः॥हृदाकाशादभून्नादोवृत्तिरोधाद्वि

धिकारिणोदर्शयतितएतदितिदेहजमहमितिगेहजंममेति ३३ शास्त्रमुपायमाह।अतिवादानीति ३४ शास्त्रसमाप्तौगुरुंप्रणमतिनमइति॥कृष्णायव्यासा य॥अध्यगांअधिगतवानिति ३५ इमांसंहितामध्यगामित्युक्तम्॥तत्रपुराणसंहिताविभागंविशेषतोऽनुक्त्वावेदविभागमपिसंगात्पृच्छतिपै लादिभिरिति॥हेसौम्य ३६ तत्रप्रथमंवेदाविर्भावप्रकारमाहसमाहितात्मनस्तस्यपष्टिभिः॥ब्रह्मणोहृदयआकाशात्मनाद्वादोऽभूत्॥यःकर्णौपुटपिधाने श्रोत्रवृत्तिनिरोधादस्मदादिभिरपिविभाव्यतेवितर्क्यते ३७

१७

षसंगात्त्रारोपासकानां मोक्षफलमाह॥ यस्य नादस्योपासनयात्मनो मलं धूत्वापुनर्भवं यांति। कथंभूतं मलं तमाह। द्रव्यमधिभूतम्॥ क्रियाध्यात्मम्॥ कारकमधिदैवम्॥ एवंविधाख्या यस्येति तथा तम् ३८ त्रिवृत्त्रिमात्रः॥ कंठोष्ठादिभिः उच्चार्यमाणस्योंकारस्याकारस्मात्रायांतर्भावात्॥ स्वस्मात्प्रातं विशिनष्टि॥ अव्यक्तः प्रभवो यस्य सः॥ तदेवाह। स्वराट् स्वत एव हृदि प्रकाशमानः॥ तमेव कार्येण लक्षयति यत्तदिति॥ नपुंसकत्वं लिंगशब्दविशेषणत्वात्॥ लिंगं गमकम् ३९ कोऽसौ परमात्मा तमाह। शृणोतीति। इमं स्फोटं अव्यक्तमोंकारम्॥ ननु जीव एव तं शृणोति तत्राह। सुप्तश्रोत्रे कर्णपिधानादिना अवृत्तिकोऽपि श्रोत्रे सति

यदुपासनया ब्रह्मन् योगिनो मलमात्मनः॥ दग्ध्वा क्रियाकारकाख्यं धूत्वा यांत्यपुनर्भवम् ३८ ततोऽभूत्त्रिवृदोंकारो योऽव्यक्तप्रभवः स्वराट्॥ यत्तल्लिंगं भगवतो ब्रह्मणः परमात्मनः ३९ शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक्॥ येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः ४० स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः॥ स सर्वमंत्रोपनिषद्वेदबीजं सनातनम् ४१

।जीवस्तु करणाधीनज्ञानत्वात् न तदा श्रोता॥ तदुपलब्धिस्तु तस्य परमात्मद्वारिकैवेति भावः॥ ईश्वरस्तु नैवम्। यतः शून्यदृक् शून्येऽपींद्रियवर्गे दृक् ज्ञानं यस्य॥ तथा हि सुप्तो यदा शब्दं श्रुत्वा प्रबुध्यते न तदा जीवः श्रोता लीनेंद्रियत्वात्॥ अतो यस्तदा शब्दं श्रुत्वा जीवं प्रबोधयति स यथा परमात्मैव तद्वत्॥ कोऽसावोंकारः तं विशिनष्टि सार्धेन॥ येन वाक् बृहती व्यज्यते॥ यस्य च हृदयाकाशे आत्मनः सकाशात् व्यक्तिः अभिव्यक्तिः ४० किंच। परमात्मनो ब्रह्मणः समस्तदेवतावाचकोऽपीत्याशये नाहमस्मीति॥ सर्वमंत्राणामुपनिषदां रहस्यं ब्रह्मरूपमित्यर्थः॥ तत्र हेतुः वेदानां बीजं कारणं॥ बीजत्वेऽप्यविकारित्वमाह॥ सनातनं सदैकरूपं॥ तस्य ब्रह्मरूपत्वात् ४१

भा॰द्वा॰
१८

इदानीं ततः सर्ववेदप्रपंचोत्पत्तिप्रकारमाह। तस्येति। त्रयस्त्रिसंख्यायुक्ताः भावाः यैरकारोकारमकारैर्धार्यंते तत्कारणत्वात्॥ तानेवाह गुणाः सत्वादयः॥
नामानि ऋग्यजुःसामानि॥ अर्था भूर्भुवःस्वर्लोकाः॥ वृत्तयो जाग्रदाद्याः ४० ततस्तेभ्यो वर्णेभ्यः अक्षराणां समाम्नायं समाहारम्॥ तमेवाह। अंतस्थाः यर
लवाः ऊष्माणः शषसहाः॥ स्वराः अकाराद्याः॥ स्पर्शाः कादयः॥ ह्रस्वदीर्घाश्च। आदिशब्दात् जिह्वामूलीयादयः॥ तत एव लक्षणं स्वरूपं यस्य तम् ४१
विभुः चतुर्मुखस्वरूपो भगवान् अपहृतजरादिर्निःपूर्वस्यैवा प्रसंगः॥ चातुर्होत्रविवक्षया चत्वारो होत्रोपलक्षिता ऋत्विजश्चातुर्होत्राः तैरनुष्ठेयं हौत्राध्वर्यव

तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह। धार्यंते यैस्त्रयो भावा गुणनामार्थवृत्तयः ४० ततोऽक्षरसमाम्नायमसृजद्भगवानजः॥
अंतस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणं ४१ तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः॥ सव्याहृतिकान्सोंकारांश्चातुर्होत्रवि
वक्षया ४२ पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन्ब्रह्मकोविदान्। ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ४३ ते परंपरया प्राप्तास्
तत्तच्छिष्यैर्धृतव्रतैः॥ चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ४४ क्षीणायुषः क्षीणसत्वान्दुर्मेधान्वीक्ष्य कालतः॥ वेदान्ब्रह्म
र्षयो व्यस्यन्हृदिस्थाच्युतचोदिताः ४५

दिकं कर्म चातुर्होत्रम्॥ तद्विवक्षया ४२ पुत्रान्मरीच्यादीन्॥ तान्वेदान्॥ ब्रह्मकोविदान्॥ वेदोच्चारणादिनिपुणान्
न् ४३ एवं चतुर्युगेषु प्राप्ताः द्वापरादौ द्वापरमादिर्यस्य तदंशलक्षणस्य तस्मिन्द्वापरांते वेदविभागप्रसिद्धेः॥ शंतनुसमकालव्यासावतारप्रसिद्धे
श्च॥ व्यस्ता विभक्ताः ४४ तत्र हेतुः क्षीणायुषो जनान्॥ तर्हि पुरुषबुद्धिप्रभवत्वात् अनादरणीयः स्यादित्याशंक्याह हृदिस्थेति ४५ रामो जयति ॥८॥

राम
१८

एवंसामान्यतोवेदविभागक्रममुक्त्वावैवस्वतमन्वंतरेविशेषतोनिरूपयितुमाह।अस्मिन्नपीति ४६ अंशांशोमायातस्यांशांशःसन्वांतस्यकलयाअंशेनअवती
र्णःसन् ४७ चातुर्विध्यमेवाह।ऋगिति।ऋगादिमंत्राणांराशीन्।।वर्गशःतत्तत्प्रकरणभेदेनउद्धृत्यथाऽनेकविधमणिराशीन्मणिगणःपद्मरागादि
योविविच्योद्धियंतेतद्वदुद्धृत्य।।तैर्मंत्रैश्चतस्रःऋगादिसंहिताश्चक्रे ४८ तासांसंहितानांमध्येएकैकां ४९ ऋक्समुदायरूपत्वात्बह्वृचाख्यां।नितरां

अस्मिन्नप्यंतरेब्रह्मन्भगवान्लोकभावनः।।ब्रह्मेशाद्यैर्लोकपालैर्याचितोधर्मगुप्तये ४६ पराशरात्सत्यवत्यामंशांशकलयाविभुः।
अवतीर्णोमहाभागवेदंचक्रेचतुर्विधं ४७ ऋगथर्वयजुःसाम्नांराशीनुद्धृत्यवर्गशः।चतस्रःसंहिताश्चक्रेमंत्रैर्मणिगणाइव ४८ ता
सांसचतुरःशिष्यानुपाहूयमहामतिः।।एकैकांसंहितांब्रह्मन्एकैकस्मैददौविभुः ४९ पैलायसंहितामाद्यांबह्वृचाख्यामुवाच
ह।वैशंपायनसंज्ञायनिगदाख्यंयजुर्गणं ५० साम्नांजैमिनयेप्राहतथाछंदोगसंहितां।।अथर्वांगिरसीनामस्वशिष्यायसुमंत
वे ५१ पैलःस्वांसंहितामूचेइंद्रप्रमितयेमुनिः।बाष्कलायचसोप्याहशिष्येभ्यःसंहितांस्वकां ५२ चतुर्धाव्यस्यबोध्याययाज्ञवल्क्या
यभार्गवपाराशरायाग्निमित्रेइंद्रप्रमितिरात्मवान् ५३ अध्यापयत्संहितांस्वांमांडूकेयमृषिंकविं।तस्यशिष्योदेवमित्रःसौभर्यादिभ्यऊचि
वान् ५३

प्रश्लेषेणगद्यमानत्वान्निगदाख्यं ५० छंदस्तुगीयमानत्वात्छंदोगाख्यांसंहितां ५१ तत्रऋग्वेदशाखाविभागमाह।।पैलइति।स्वसंहितांद्वेधाविभज्य
इंद्रप्रमितयेबाष्कलायचऊचे ५२ सबाष्कलोपिस्वसंहितांचतुर्धाव्यस्यबोध्यादिभ्यःशिष्येभ्यःप्राह।हेभार्गव ५२ इंद्रप्रमितिरपिस्वांसंहितांस्वसुतंमां
डूकेयमध्यापयामासतस्यमांडूकेयस्यशिष्योदेवमित्रः ५३

भा॰द्वा॰
१८

तत्सुतः मांडूकेयसुतः। शाकल्यो वात्स्यादिषु पंचसु व्यधात्। तानध्यापयामासेत्यर्थः ५४ तच्छिष्यः शाकल्यशिष्यः। स्वसंहितां त्रेधा विभज्य। चतुर्थं वैदिकपदार्थ
व्याख्यानरूपं निरुक्तं च कृत्वा बलाकादिभ्यश्चतुर्भ्यो ददौ ५५ वाष्कलिः पूर्वोक्तस्य वाष्कलस्य पुत्रः। प्रतिशाखाभ्यः। उक्तसर्वशाखाभ्यः। बालायन्यादयस्तामा
दधुः। अधीतवंतः ५६ ऋक्शाखोपसंहारपूर्वकं तच्छ्रवणफलमाह। बह्वृचा इति। एतच्छंदसां एतेषां छंदसां ५७ यजुर्वेदे तैत्तिरीयशाखोत्पत्तिप्रस्तावमाह।

शाकल्यस्तु ततः प्रांतु पंचधा व्यस्य संहितां। वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् ५४ जातूकर्णोश्च तच्छिष्यः सनिरुक्तां
स्वसंहिताम्। बलाकपैजवैतालविरजेभ्यो ददौ मुनिः ५५ वाष्कलिः प्रतिशाखाभ्यो वालखिल्याख्यसंहितां। चक्रे बालायनिर्भ
ज्यः काशारश्चैव तां दधुः ५६ बह्वृचाः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः। श्रुत्वैतच्छंदसां व्यासं सर्वपापैः प्रमुच्यते ५७ वैशंपायनशि
ष्या वै चरकाध्वर्यवोऽभवन्। यच्चेरुर्ब्रह्महत्यांहःक्षपणं स्वगुरोर्व्रतम् ५८ याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन् कियत्। चरितेनाल्प
साराणां चरिष्येहं सुदुश्चरं ५९ इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया। विप्रावमंत्रा शिष्येण मदधीतं त्यजाश्विति ६० देवरातसु
तः सोपि छर्दित्वा यजुषां गणं। ततो गतोथ मुनयो ददृशुस्तान्

वैशंपायनशिष्या इत्यादिना। चरकनामनिरुक्तिमाह। यस्माच्चेरुरिति। ब्रह्महत्यारूपमंहः क्षपयतीति तथा। तत्स्वगुरोस्तुष्टेर्यद्व्रतं तच्चरणाच्चरका इत्यर्थः ५८
तच्छिष्यः वैशंपायनशिष्यः। अल्पसाराणामेतेषां चरितेन कियत्। सुदुश्चरमहं चरिष्यामीति ५९ विप्राणामवमंत्रा अवज्ञाकर्त्ता। मत्तोऽधीतमाशु त्य
जेति ६० देवरातसुतो याज्ञवल्क्यः ६१

हृदि तस्यादानं विश्वरूपेणाऽऽवृत्तमिति तित्तिराः पक्षिविशेषाः भूत्वाऽग्राददुः ॥ ततस्ते तैत्तिरीया इति प्रसिद्धाः सुपेशलाः अतिरम्याः ६२ वक्ष्यमाणमर्थं तस्य भेदवि
वक्षया ॥ काण्वमाध्यंदिनादिशाखाप्रसंगमाह ॥ याज्ञवल्क्यस्यादिना ॥ गुरोर्वैशंपायनस्य व्यासेन विभज्याध्यक्तानादविद्यमानानि ॥ अधिश्रधिकानि गवेषयन्
मृगपन्नसूपतस्थे सम्यक्ज्ञात ष्टाव ॥ ईश्वरं वेदानां ॥ तथा वक्ष्यति कस्मिं स्वर्णाहि दिविदे वद्यते षड्जर्वैदेन तिष्ठति मध्ये अङ्गः ॥ सामवेदेनाप्तमपमे महीयते वेदैर स्तूयथि

यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाऽऽददुः ॥ तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः ६२ याज्ञवल्क्यस्ततो ब्रह्मन् छंदांस्य
धिगवेषयन् ॥ गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरं ६३ याज्ञवल्क्य उवाच ॐ नमो भगवते आदित्यायाखिलजगतामा
त्मस्वरूपेण कालस्वरूपेण चतुर्विधभूतनिकायानां ब्रह्मादिस्तम्बपर्यन्तानामन्तर्हृदयेषु बहिरपि वाकाश इवोपाधिनाऽव्य
वधीयमानो भगवानेक एव क्षणलवनिमेषावयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमां लोकयात्रामनुवहति

५६

मिरेति सूर्यस्य इति ६३ नमो भगवते तत्र्यंशआदित्याय यो भवानेक एवेमां लोकयात्रामनुवहतीत्यन्वयः ॥ तदेव दर्शयति ॥ अखिलजगतामात्मस्वरूपेणान्तर्हृदयेषु
कालस्वरूपेण च बहिरपि वर्त्तमान इति ॥ अखिलजगतामित्यस्य प्रपंचः ॥ चतुर्विधेति ॥ हृदयान्तर्वर्त्तित्वे ॥ पि जीववत्तेनोपाधिनाऽव्यवधीयमानः अनाच्छाद्यमा
नः ॥ कालस्वरूपेणेत्यस्य प्रपंचः ॥ क्षणेति ॥ क्षणलवादयो ये ऽवयवास्तैरुपचिताः संवत्सरास्तेषां गणेन प्रत्यहमपामादानं शोषणं विसर्गो वृष्टिस्ताभ्यां ॥ अनेन
गायत्रीप्रथमपादोक्तवरेण्यता ऽनुवर्णिता ६४

द्वितीयपादार्थोऽनुवर्णनेन स्तौति॥ यद्वहेति विबुधर्षभ हे सवितः॥ यदस्य देवभगवतस्तवमंडलं तपति तत्समभिधीमहि मस्य गामित्युरव्येन ध्यायेम॥ पुनस्तत्स्वरूपं संबं
बोधनं॥ अत्यहं त्रिषवणं वैदिककर्ममार्गेण स्तुवतां भक्तानां पापाख्यखिलानि दुरितानि तत्फलानि वृजिनानि दुःखानि तेषां बीजमज्ञानं चैतेषामवभज
नविनाशकहे तपनेति॥ इत्थं तृतीयपादेन स्तौति यद्धेति॥ यो भवानस्थावरजंगमसमूहानां स्वाश्रयाणां जीवानां मनइंद्रियासुगणानां॥ अनात्मनो

यद्दु ह वाव विबुधर्षभ सवितरदस्तपत्यनुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखिलदुरितवृजिनबीजावभर्जन
भगवतः समभिधीमहि तपन मंडलम् ६५ य इह वाव स्थिरचरनिकराणां निजनिकेतनानां मनइंद्रियासुगणाननात्मनः
स्वयमात्मांतर्यामी प्रचोदयति ६६ य एवेमं लोकमतिकरालवदनांधकारसंज्ञाजगरग्रहगिलितं मृतकमिव विचेतनम
वलोक्यानुकंपया परमकारुणिक ईक्षयैवोत्थाप्याहरहरनुसवनं श्रेयसि स्वधर्माख्यात्मावस्थाने प्रवर्तयत्यवनिपतिरि
वासाधूनां भयमुदीरयन्नटति ६७ परित आशापालैस्तत्र तत्र कमलकोशांजलिभिरुपहृतार्हणः ६८

जडान्स्वयमात्मैवांतर्यामी सन्प्रचोदयति प्रवर्तयति ६६ तृतीयपादमेवं मंडलस्थपरतया व्याचष्टे य एवेति॥ य एक एव भवान् अतिकरालवदनोऽपि अंधकारसं
ज्ञोऽजगरग्रहस्तेन गिलितं ग्रस्तमत एव मृतकमिव विचेतनं स्वधर्माख्यं परात्मावस्थानं प्रत्यक्प्रवणत्वं तदेव श्रेयस्तस्मिन् प्रवर्तयति॥ किंच॥ यो भवानवनिपतिरिवा
टति॥ गच्छति ६७ आशापालैरिंद्रादिभिः कमलकोशयुक्तैरंजलिभिरुपहृतार्हणः ६८

यत एवं स्तुतस्त्वं अथ ये अतः। हस्करं॥ अयातयामानि अर्यैर्यथावदविज्ञाताः निःयजूंषि तान्यहं उपसरामि न जानामि॥ ह्रर्णे॥ एवं स्तुतः प्रसादितस्तु॥ ७॥ पंच
दश शाखाः॥ याः शतैरपरिमितैर्यजुर्भिरकरोत् तत्स्मृतेरिति पाठे मत एष याज्ञवल्क्यः तैर्यजुर्भिरकरोदिति॥ जगृहुः अधीतवंतः॥ रविणाश्वरूपेण वाज
भ्यः केशरेभ्यः॥ वाजेन वेगेन वा सम्यग्सृष्टाः त्यक्ताः शाखाः वाजसनी संज्ञाः॥ स्तु॥ शाखा इति वा॥ ७॥ साम शाखा विभागमाह॥ जैमिनेरिति। तस्तुतः स्तुमं

अथाह भगवन्नवरणानलिप्तगात्रं त्रिभुवनगुरुभिर्वंदितमहमयातयाम यजुःकाम उपसरामीति॥ ह्रर्णे स्तुत उवाच॥ ॥एवं स्तुतः
स भगवान्वाजिरूपधरो हरिः॥ यजूंष्ययातयामानि मुनयेऽदात्प्रसादितः॥ ७॥ यजुर्भिरकरोच्छाखा दश पंच शतैर्विभुः॥ जगृहुर्वाज
सन्यस्ताः काण्वमाध्यंदिनादयः॥ ७॥ जैमिनेः सामगस्यासीत्सुमंतुस्तनयो मुनिः॥ सुत्वांस्तु तत्सुतस्ताभ्यामेकैकां प्राह संहिता
म्॥ ७२॥ सुकर्मा वापि तच्छिष्यः सामवेदतरोर्महान्॥ सहस्रसंहिताभेदं चक्रे साम्नां ततो द्विजाः॥ ४३॥ हिरण्यनाभः कौशल्यः पौ
ष्यंजिश्च सुकर्मणः॥ शिष्यैर्जगृहतुश्चान्ये आवंत्यो ब्रह्मवित्तमः॥ ७४॥ ॥ ॥ ॥

तस्तुतः॥ ताभ्यां सुत्वपौत्राभ्यां क्रमेणैकैकां प्राह॥ ७२॥ तच्छिष्यः जैमिनेः शिष्यः॥ महान् अतिमेधावी॥ सहस्रं संहितारूपं भेदं चक्रे। साम्नां तैः संहिताभेदं
ततस्तदनंतरं ७३ सुकर्मणः शिष्यौ एकः कौशल्यो हिरण्यनाभः पौष्यंजिनामैकस्तौ जगृहतुः॥ आवंत्यस्त्वान्यः तस्यैव शिष्यः सोऽपि जग्राह ॥७४॥

-वां

भाग
२१

पौष्यंज्यावंत्ययोः शिष्यकाराद्धिरण्यनाभस्यापि पंचशतानि शिष्याश्चासन्॥ ते तावतीः शाखा यथायथं जगृहुः॥ तासूदीच्यानसौ ततः कालतः कांश्चित्तथा
प्राच्यां स्वप्रवक्तृत्वत्यर्थः। यथोक्तं वैष्णवे॥ उदीच्याः सामगाः शिष्यास्तस्य पंचशतं स्मृताः॥ हिरण्यनाभात्तावंत्यः संहिता यैः द्विजोत्तमैः। गृहीतास्तेऽपि
चोच्यंते पंडितैः प्राच्यसामगा इति॥७५॥ पुनरयोते षां च पाणां स्वकर्मणः शिष्याणां शिष्यांतरैः शाखा बाहुल्यं दर्शयति। लोकाक्षिरिति द्वाभ्यां

उदीच्याः सामगाः शिष्या आसन्पंचशतानि वै॥ पौष्यंज्यावंत्ययोश्चापि तांश्च प्राच्यान्प्रचक्षते॥७५॥ लोकाक्षिर्मांगलिः
कुल्यः कुशीदः कुक्षिरेव च। पौष्यंजिशिष्या जगृहुः संहितास्ते शतं शतं॥७६॥ कृतो हिरण्यनाभस्य चतुर्विंशति संहिताः।
शिष्याः ऊचे स्वशिष्येभ्यः शेषा आवंत्य आत्मवान्॥ ॥इति श्रीभागवते महापुराणे द्वादशस्कंधे वेदशाखाप्रणयनं षष्ठोऽध्यायः॥
॥सूत उवाच॥ ॥अथर्ववित्सुमंतुश्च शिष्यमध्यापयत्स्वकाम्। संहितां सोऽपि पथ्याय वेददर्शाय चोक्तवान्॥१॥ ॥८॥

॥७६॥ कृतो नाम हिरण्यनाभस्य शिष्यः स्वशिष्येभ्यः ऊचे। शेषाः अन्याश्च पियाः पृथिव्याः शाखाः ताश्चावंत्यः स्वशिष्येभ्यः ऊचइति॥७७॥ ॥द्वादशे षष्ठः॥ ॥
सप्तमे अथर्वविस्तारः पुराणव्यसनं ततः॥ पुराणलक्षणादीनि फलं भागवतस्य च॥१॥ क्रमप्राप्तमथर्ववेदविभागमाह॥ शिष्यं कबंधनामानं स्वां स्व
कीयां संहितां। सोऽपि शिष्योऽपि तां द्विधा विभज्य॥ तदुक्तं वैष्णवे। अथर्ववेदं स मुनिः सुमंतुरमितद्युतिः॥ शिष्यमध्यापयामास कबंधं सोऽपि तं द्विधा॥ कृ
त्वा तु वेददर्शाय तथा पथ्याय दत्तवानिति॥१॥

राम
२१

तत्र वेददर्शः स्वसंहितां चतुर्द्धा विभज्य चतुरः शिष्यानध्यापयामास पथ्यश्च त्रिधा विभज्य त्रीनिति सार्द्धेनाह शौल्कायनिरिति ॥१॥ आंगिरसः शुनकस्य शि
ष्यो बभ्रुः सैंधवायनश्च तदुक्तं। शुनकस्तु द्विधा कृत्वा ददावेकां तु बभ्रवे। द्वितीयां संहितां प्रादात् सैंधवायनसंज्ञिने इति। सावर्ण्याद्याः सैंधवायनादी
नां शिष्याः ॥३॥ नक्षत्रकल्पः शांतिकल्पश्चेति द्वौ ॥ तदुक्तं ॥ नक्षत्रकल्पो वेदानां संहितानां तथैव च ॥ चतुर्थः स्यादांगिरसः शांतिकल्पश्च पंचम इति ॥

शौल्कायनिर्ब्रह्मबलिर्मोदोषः पिप्पलायनिः ॥ वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु ॥१॥ शाकमदः शुनको ब्रह्मन् जाजलिश्चाथ
थर्ववित् ॥२॥ बभ्रुः शिष्योथांगिरसः सैंधवायन एव च ॥ अधीयितां संहिते द्वे सावर्ण्याद्यास्तथापरे ॥३॥ नक्षत्रकल्पः शांतिश्च कश्यपां
गिरसादयः ॥ एते वाथर्वणाचार्याः शृणु पौराणिकान् मुने ॥४॥ त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः ॥ शिंशपायनहारीतौ षडेते
पौराणिका इमे ॥५॥ अधीयंत व्यासशिष्यात् संहितां मत्पितुर्मुखात् ॥ एकैकामहमेतेषां शिष्यः सर्वाः समध्यगाम् ॥६॥ कश्यपोऽहं च सा
वर्णी रामशिष्योऽकृतव्रणः ॥ अधीमहि व्यासशिष्यात् चतस्रो मूलसंहिताः ॥७॥ पुराणलक्षणं ब्रह्मन् ब्रह्मर्षिभिर्निरूपितं ॥ शृणुष्व
बुद्धिमाश्रित्य वेदशास्त्रानुसारतः ॥ ॥८॥

नक्षत्रकल्पादीनां कर्त्तारस्तन्नाम अभिरुच्यंते ॥४॥ मत्पितृमुखादिति प्रथमं व्यासः षट् संहिताः कृत्वा मत्पित्रे रोमहर्षणाय प्रादात्। तस्य पितुर्मुखादेते त्रय्या
रुण्यादयः एकैकां संहितामधीयंत। एतेषां षण्णां शिष्योऽहं ताः सर्वाः समधीतवान् ६ रामशिष्यो योऽकृतव्रणः ॥ एवं चत्वारो वयं। मूलसंहिता अल्पेनेन
गतः संहितावाजल्पेषु वितत ॥७॥ शुकपरीक्षित्संवादे निरूपितमपि पुराणलक्षणं तद्भेदकथनाय दर्शयति ॥ पुराणेति ॥८॥

श्रयस्य विश्वस्य ॥ अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ॥ मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥ इत्यत्रोक्तेः स्थानपोषणे वृत्तिरक्षाशब्दाभ्यामुच्येते ॥ अन्तराणि मन्वन्त
राणि वंशो वंशानुचरितमिति ईशानुकथा ॥ संस्था निरोधः ॥ अनेनैवात्यन्तिकलयरूपा मुक्तिरप्युक्ता ॥ हेतुशब्देन जीव आश्रयवासनो शब्दवाच्या ऊतयो गृहीताः ॥
र्णः ॥ दशभिरेतैर्लक्षणैर्युक्तं महापुराणं विदुः ॥ केचित्पञ्चविधं ॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ॥ वंशानुचरितं चेति पुराणं पञ्चलक्षणमिति महत्पुराणं
अल्पं चेति व्यवस्थया ॥ यत्र दशापि लक्षणानि स्पष्टं निरूप्यन्ते तन्महापुराणं ॥ यत्र त्वन्येषां पञ्चस्वेवान्तर्भावस्य विवक्षा तदल्पमिति व्यवस्थयेत्यर्थः ॥१०॥ सर्गादि

सर्गोऽस्याथ विसर्गश्च वृत्ती रक्षान्तराणि च ॥ वंशो वंश्यानुचरितं संस्था हेतुरपाश्रयः ॥ दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ॥ केचित्पं
चविधं ब्रह्मन्महदल्पव्यवस्थया ॥१०॥ अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः ॥ भूतसूक्ष्मेन्द्रियार्थानां संभवः सर्ग उच्यते ॥११॥ पुरुषा
ता नुगृहीतानामेतेषां वासनामयः ॥ विसर्गोऽयं समाहारो बीजाद्बीजं चराचरं ॥१२॥ वृत्तिर्भूतानि भूतानां चराणामचराणि च ॥ कृता स्वेन नृ
णां तत्र कामाच्चोदनयापि च ॥१३॥ ॥

लक्षणानि व्याचष्टे ॥ अव्याकृतेत्यादिना ॥ प्रधानस्य गुणानां क्षोभात् ॥ यो महान् ॥ तस्माद्यस्त्रिवृदहंकारस्तस्मात् भूतमात्राणां सूक्ष्माणां ॥ इंद्रियाणां च तदर्था
नां स्थूलानां ॥ तद्देवतानां च संभवः सर्गः ॥ कारणसृष्टिः सर्ग इत्यर्थः ॥ उच्यत इति यथापेक्षमुत्तरत्राप्यनुषंगः ॥११॥ विसर्गं व्याचष्टे ॥ पुरुषेणेश्वरेणानुगृही
तानां एतेषां महदादीनां पूर्वकर्मवासनाप्रधानोऽयं समाहारः ॥ कार्यभूतश्चराचरप्राणिरूपो बीजाद्बीजमिव प्रवाहापन्नो विसर्ग उच्यत इत्यर्थः ॥१२॥ चराणां
भूतानां सामान्यतोऽचराणि चकाराच्चराणि च कामाद्वृत्तिः ॥ तत्र तु नृणां स्वेन स्वभावेन कामाच्चोदनयाऽपि वा या नियता वृत्तिर्जीविका कृता सा वृत्तिरित्य
तदित्यर्थः ॥१३॥ ॥

तिर्यङ्मर्त्यर्षिदेवेषुयेऽच्युतावताराःतेषामीहालीलासाविश्वस्यरक्षोच्यतइत्यर्थः।यैरवतारैरितिसमासान्निःकृष्यकर्थंविसंबंधः॥त्रैयीद्विषोदैत्याः॥१४॥
षड्विधंमन्वंतरमुच्यते।षड्विधत्वमेवाह।मन्वादिरितिमन्वादयःषडेतेवर्गाःस्वस्वाधिकारेणयथावर्तन्तेतन्मन्वंतरमित्यर्थः॥१५॥वंशमाह॥ब्रह्मणःसकाशात्प्र
सूतिर्येषांशुद्धानामित्यर्थः।तेषामन्वयोवंशः।तेषांवृत्तंयेचतद्वंशधरास्तेषांवृत्तंवंशानुचरितमुच्यते॥१६॥अस्यविश्वस्यस्वभावतोमायातोनिष्पन्नस्यपद्या
मायातश्चतुर्विधोलयइति॥१७॥अस्यजगतःसर्गादेर्हेतुःनिमित्तंजीवःसोऽत्रहेतुरुच्यतइत्यर्थः।तस्यनिमित्ततामाह॥अविद्याकर्मकारकःकर्मकर्ता॥

रक्षाच्युतावतारेहाविश्वस्यानुयुगेयुगे॥तिर्यङ्मर्त्यर्षिदेवेषुहन्यंतेयैस्त्रयीद्विषः॥१४॥मन्वंतरंमनुर्देवामनुपुत्राःसुरेश्वराः॥ऋषयों
शावतारश्चहरेःषड्विधमुच्यते॥१५॥राज्ञांब्रह्मप्रसूतानांवंशस्त्रैकालिकोन्वयः॥वंश्यानुचरितंतेषांवृत्तंवंशधराश्चये॥१६॥नैमि
त्तिकःप्राकृतिकोनित्यआत्यंतिकोलयः॥संस्थेतिकविभिःप्रोक्ताश्चतुर्धास्यस्वभावतः॥१७॥हेतुर्जीवोस्यसर्गादेरविद्याकर्म
कारकः॥यंचानुशायिनंप्राहुरव्याकृतमुतापरे॥१८॥व्यतिरेकान्वयोयस्यजाग्रत्स्वप्नसुषुप्तिषु॥मायामयेषुतद्ब्रह्मजीववृत्तिष्वपाश्रयः॥१९॥

जीवादृष्टप्रयुक्तत्वाद्विश्वसर्गादेः।सतत्रहेतुरित्यर्थः।नन्वनुशायीनिमित्तमितिकेचिदाहुरव्याकृतमित्यपरेतत्राहयमिति॥चैतन्यप्राधान्येनानुशायिनं॥उ
पाधिप्राधान्यविवक्षयाअव्याकृतं॥१८॥अपाश्रयमाहव्यतिरेकेति॥जाग्रदादिष्ववस्थासु॥जीवतयावर्तन्तइतिजीववृत्तयोविश्वतैजसप्राज्ञास्तेषुमायामयेषु
मायामयेषुसाक्षितयान्वयःसमाध्यादौव्यतिरेकोयस्यतद्ब्रह्म॥संसारप्रतीतिबाधयोरधिष्ठानावधिभूतमपाश्रयउच्यतइत्यर्थः॥१९॥

भा०द्वा०

२२

जदेवमदृष्टांतेषु पंचपतति॥ परार्थेषु घटादिष्विदं इत्थं इति यथा अनुगतं अन्वितं अनुगतं च बहिरप्यवस्थानात् तारूपनामसु वर्णमात्रं सन्मात्रं तत्पथा॥ एवं वीजं गर्भो यानमा
दिर्यासां पंचतांता त्रेते व्यासां तासु देहावस्थासु। नवत्र पित्र्यधिष्ठानत्वेन साक्षित्वेनुवृत्तमनुवृत्तं च यत॥ तदपाश्रय इति॥२०॥ एवं दशापि लक्षणानि व्याख्याय वर्णयं
यंति महात्मान इति यदुक्तं तदाह विरमेतेति॥ यदा सर्गादीनां मायामयत्वानुसंधानेन वा मद्देवादेशित्वस्वयमेव चित्तं विरमेत॥ इहैवानुष्ठितेन योगेन वा देवज्ञ

पदार्थेषु यथा द्रव्यं सन्मात्रं रूपनामसु॥ वीजादिपंचतांतासु ह्यवस्थासु युतायुतं॥२०॥ विरमेत यदा चित्तं हित्वा वृत्तित्रयं स्वयं॥ योगेन
वा तदात्मानं वेदेहाया निवर्त्तते॥२१॥ एवं लक्षणलक्ष्याणि पुराणानि पुराविदः॥ मुनयोष्टादश प्राहुः क्षुल्लकानि महांति च॥२२॥
ब्राह्मं पाद्मं वैष्णवं च शैवं लिंगं सगारुडं॥ नारदीयं भागवतमाग्नेयं स्कंदसंज्ञितं॥२३॥ भविष्यं ब्रह्मवैवर्त्तं मार्कंडेयं सवामनं। वाराहं
मात्स्यं कौर्मं च ब्रह्मांडाख्यमिति त्रिषट्॥२४॥ ब्रह्मन्निदं समाख्यातं शाखाप्रणयनं मुनेः॥ शिष्यशिष्यप्रशिष्याणां ब्रह्मतेजोविव
र्द्धनं॥२५॥ ॥इति श्रीभागवते महापुराणे द्वादशस्कंधे सप्तमोध्यायः॥ ॥

त्मादिवत्तातदाविक्षेपाभावादात्मानं वेदतदाः विद्यामिवृत्तेरीहायाः संसाररूपायाः निवर्त्तनं स्यात् थेः॥२१॥ पुराणविभागप्रसावेन तल्लक्षणादिसंगिकमुक्त्वा
प्रस्तुतमाह। एवंविधैर्लक्षणैर्लक्ष्याणि॥२२॥२३॥ त्रिषट् अष्टादश॥२४॥ ॥उपसंहरति ब्रह्मन्निति॥ मुनेर्व्यासस्य शिष्यादीनां च। ब्रह्मतेजो ब्रह्मवर्चसं त
द्विवर्द्धनं श्रीहरणमिति शेषः॥२५॥ इति द्वादशे सप्तमः॥ ॥अष्टमे तु तपश्चर्या मार्कंडेयस्य मोहकैः॥ कामादिभिरसंमोहो नरनारायणस्तुतिः ॥८॥

राम

२२

पुराणविभागप्रसंगेन पुराणकर्तृ मार्कंडेयस्य चरितं प्रस्तुतमाह॥ प्राज्ञेति॥ त्वमेव वक्तुं योग्य इत्याह॥ तमसि संसारे भ्रमतां पारदर्शनः सम्यक्निवर्तकः॥१॥ वक्तव्यमाह॥
आऊरिति॥ उर्वरितः अवशिष्टः येन कल्पांतेन॥ एतत्कथं घटत इत्येकः प्रश्नः॥२॥ प्रलयाभावाद्घ्येतन्न घटत इत्याह॥ सवा इति॥ यतो भार्गवर्षभः॥ कोऽपि प्राकृतो
नैमित्तिको वा॥३॥ अन्यदप्यद्भुतमेवेत्याह॥ एकमेवेति तोकं बालकम्॥४॥ कौतूहलं औत्सुक्यम्॥ तं संशयम्॥ न केवलं त्वं महायोगी किंतु पुराणेष्वपि

॥शौनक उवाच॥ ॥प्राज्ञत जीव चिरं साधो वद नो वदतां वर॥ तमस्यपारे भ्रमतां नृणां त्वं पारदर्शनः॥१॥ आख्याश्चिरायुष्टभृगुश्रेष्ठं
मृकंडुतनयं जनाः॥ यः कल्पांते ऊर्वरितो येन ग्रस्तमिदं जगत्॥२॥ स वा अस्मत्कुलोत्पन्नः कल्पेऽस्मिन्भार्गवर्षभः॥ नैवाधुनापि
भूतानां संप्लवः कोऽपि जायते॥३॥ एक एवार्णवे भ्राम्यन्ददर्श पुरुषं किल॥ वटपत्रपुटे तोकं शयानं त्वेकमद्भुतम्॥४॥ एष नः सं
शयो भूयान्सूत कौतूहलं यतः॥ तं नश्छिंधि महायोगिन्पुराणेष्वपि संमतः॥५॥ सूत उवाच॥ ॥प्रश्नस्त्वया महर्षेऽयं कृतो लोक
भ्रमापहः॥ नारायणकथा यत्र गीता कलिमलापहा॥६॥ प्राप्तद्विजातिसंस्कारो मार्कंडेयः पितुः क्रमात्॥ छंदांस्यधीत्य धर्मे
ण तपःस्वाध्यायसंयुतः॥७॥

ष्टत्वेन संमतः॥५॥ प्रश्नमभिनंदति॥ हे महर्षेऽयं प्रश्नः॥ तत्र हेतुः॥ नारायणेति॥ यत्र प्रश्नविषये॥६॥ तत्र मार्कंडेयस्तप
सा भगवंतमाराध्य मायाप्रदर्शनं वव्रे॥ ततस्तेनैव भगवन्मायया सप्तकल्पा दृष्टाः नान्यैरित्युत्तरं वक्तुमादित आरभ्य तस्य चरितमाह॥ प्राप्तेत्यादिना मार्कंडे
योऽष्टत्रिंशज्जीव इति पंचमश्लोकेनान्वयः॥ मध्यमग्रंथेन तस्य धर्मः कथ्यते॥ प्राप्तो द्विजातिसंस्कारः उपनयनाख्यो येन सः पितुः सकाशात् गर्भाधानादि

कमार्कपुटीका ॥

भा०स्का
२४

वृहद्व्रतधरः नैष्ठिकब्रह्मचारी सन्॥८॥ नियमर्द्धये यमेवद्वये॥ अम्या॥ दिभ्यं पंचसु हरिमर्चयन्॥९॥ मैक्ष्यं गुरुवर्थे माहृत्य नेनाज्ञातश्चेन्न हि भुजे नो वेत्स्यत्र कदाचि
ड्पोषितो भवति॥१०॥११॥ तेनस्त्वब्जजयेन॥१२॥ धन्नाः क्लेशारागादयो यस्य तेन ध्वंतरात्मना प्रत्याहृतेन मनसा॥१३॥१४॥ तस्य तपो निष्ठामितिहासेन वर्णयति

वृहद्व्रतधरः शांतो जटिलो वल्कलांबरः॥ बिभ्रत्कमंडलुं दंडमुपवीतं समेखलम्॥८॥ कृष्णाजिनं साक्षसूत्रं कुशांश्च नियमर्द्धये॥ अग्न्यर्कगुरुविप्रा
त्मस्वर्चयन्संध्ययोर्हरिम्॥९॥ सायंप्रातः स गुरवे भैक्ष्यमाहृत्य वाग्यतः॥ बुभुजे गुर्वनुज्ञातः संयतो नो चेदुपोषितः॥१०॥ एवं तपःस्वाध्यायपरो वर्षाणा
मयुतायुतम्॥ आराधयन्हृषीकेशं जिगाय त्रीन्सुदुर्जयम्॥११॥ ब्रह्मा भृगुर्भवो दक्षो ब्रह्मपुत्राश्च ये परे॥ नृदेवपितृभूतानि तेनासन्नति विस्मिताः॥
॥१२॥ इत्थं बृहद्व्रतधरस्तपःस्वाध्यायसंयमैः॥ दध्यावधोक्षजं योगी ध्वस्तक्लेशांतरात्मना॥१३॥ तस्यैवं युंजतश्चित्तं महायोगेन योगिनः॥ व्यतीयाय म
हान्कालो मन्वंतरषडात्मकः॥१४॥ एतत्पुरंदरो ज्ञात्वा सप्तमेऽस्मिन्किलांतरे॥ तपोविशंकितो ब्रह्मन्नारेभे तद्विघातनं॥१५॥ गंधर्वाप्सरसः
कामं वसंतमलयानिलौ॥ मुनये प्रेषयामास रजस्तोकमदौ तथा॥१६॥ ते वै तदाश्रमं जग्मुर्हिमाद्रेः पार्श्व उत्तरे॥ पुष्पभद्रा नदी यत्र चित्राख्या च शिला
विभो॥१७॥ तदाश्रमपदं पुण्यं पुण्यद्रुमलतांचितं॥ पुण्यद्विजकुलाकीर्णं पुण्यामलजलाशयम्॥१८॥ ॥ ॥ ॥

एतदित्यादिना अस्मिन्सप्तमे मन्वंतरे॥ तपसा मत्पदं यद्यहिष्यतीति विशंकितः॥१५॥ मुनये मुनिं भ्रंशयितुं॥ रजस्तोकं अतिप्रियमपत्यं लोभः मदश्चतौ॥१६॥१७॥ तदाश्र
मपदं प्रविष्टा वायुर्वचा विनिवेत्यतीयेनाव्यपः॥ पुण्यैर्द्रुमैर्लताभिश्च॥ चितं युजितं॥ पुण्यपक्षिजातीनाम् ऋषीणां कुलैः आकीर्णं पुण्यापात्रतपमला जलाशया यस्मिन्॥१८॥ ॥

राम
२४

मत्तभ्रमराणां संगीतं यस्मिन्॥ मत्तकोकिलानां कूजितं यस्मिन्॥ मत्तबर्हिणा एव नटाटोपः संभ्रमो यस्मिन्॥ मत्तद्विजानां पक्षिणां कुलैराकुलं यथास्यं
॥१९॥ एवंभूतं तदाश्रमपदं प्रविष्टः सन् वायुर्मलयानिलो ववावुपसमार॥ उत्तमं येन उद्दीपयन्॥ तत्र हृद्देषु प्रवेशान्मांद्यं॥ हिमनिर्झरकणानामादानात्त्वशैत्यं॥
पुष्पपरिष्वंगात्सौगंध्यं चोक्तम्॥२०॥ किंच॥ उद्यंश्चंद्रोदय॥ स्मिन्नंतं निशावक्त्रं रजनीमुखं यस्मिन् सः॥ प्रवालस्तवकानामालयः श्रेणयो येषु तैः॥ गुच्छंति विटपैः

॥ ॥ मत्तभ्रमरसंगीतं मत्तकोकिलकूजितम्॥ मत्तबर्हिनटाटोपं मत्तद्विजकुलाकुलं॥१९॥ वायुः प्रविष्टस्तत्रादाय हिमनिर्झरशीकरान्॥
पुष्पमनोभिः परिष्वक्तो ववावुत्तमपदस्मरं॥२०॥ उद्यच्चंद्रनिशावक्त्रैः प्रवालस्तवकालिभिः॥ गोपद्रुमलताजालैस्तत्रासीत्कुसुमाकरः॥२१॥
स्तूयमानो गंधर्वैर्गीतवादित्रयूथकैः॥ अदृश्यतान्नवायेषु शुःस्वःस्त्रीयूथपतिः स्मरः॥२२॥ हृत्वाग्निं सप्तपाणींदहत्सुःशक्रकिंकराः॥ मीलि
ताहं दुराधर्षमन्निर्मितमिवानलम्॥२३॥ नरउन्मयस्य पुरतः स्त्रियोऽथो गायका जगुः॥ स्वरं गवीणापणवैर्वाद्यं वक्रं मनोरमं॥२४॥ संदधे सुंप
धनुः पिकामः पंचपुरवं तदा॥ मधुर्मनोरजन्नोकंदं इष्टत्याप्यकंपयन्॥२५॥

संक्लिष्यंतीति गोपाद्रुमाः लताश्च तेषां जालैः समूहैः आविर्बभूव॥२१॥ किंच॥ तदा गीतवादित्रयूथकैः गायकादिसमुदायिभिः गंधर्वैः स्तूयमानः॥ तथा स्वःस्त्रियोऽप्स
रसस्तासां यूथस्य पतिः॥ अनंतं वा पमिपुत्वयेन सस्मर स्वात्तत्र दृश्यत॥ ॥२२॥ दुराधर्षमभिभवितुं अशक्यम्॥२३॥४॥ शोषणदीपनसंमोहनतापनोन्मादनाख्या
नि पंचसुरवानि यस्य तत्तादृक्षं संदधे॥ तदैव मधुर्वसंतः॥ रजन्नोकस्य पंचस्वमार्ग॥ अन्येवं दृष्ट्या तस्य मनो व्यकंपयन्॥२५॥ ॥ ॥ ॥

भा॰टी॰
२५

किंच॥ वायुर्मेलयानिलः पुंजिकस्थल्याः तत्स्तनद्वंद्वं वासो जहार॥२१॥ सर्वं ते षां कर्म्मेतत्र तस्मिन्नमोघं व्यर्थं॥ अनीशस्यानिर्दैवस्य॥२८॥ मुनेरपकर्षं ततः प्रतिकूलमा
चरंतः॥ हे मुने॥२९॥ अहमः अहंकारस्य भावं विकारं॥३०॥ निर्मज संज्ञानवदनम्॥ वराङ्गिः॥३१॥ नरनारायणरूपो हरिः॥३२॥ तावत्तुवर्णयति द्वाभ्यां॥ रौर

क्रीडंत्याः पुंजिकस्थल्याः कंदुकैः स्तनगौरवात्॥ भृशमुद्विग्नमध्यायाः केशविस्रंसितस्रजः॥१६॥ इतस्ततो भ्रमद्दृष्टेश्चलन्त्या अनुकंदुकम्॥
वायुर्जहार तद्वासः सूक्ष्मं त्रुटितमेखलम्॥१७॥ विससर्ज तदा बाणं मत्वा तं स्वजितं स्मरः॥ सर्वं तत्राभवन्मोघमनीशस्य यथोद्यमः॥१८॥
तइत्थमपकुर्वंतो मुनेस्तत्तेजसा मुने॥ दह्यमाना निववृतुः प्रबोध्याहिमिवार्भकाः॥१९॥ इतींद्रानुचरैर्ब्रह्मन्धर्षितोपि महामुनिः॥ य
न्नागादहमो भावं न तच्चित्रं महत्सु हि॥२०॥ दृष्ट्वा निस्तेजसं कामं सगणं भगवान्स्वराट्॥ श्रुत्वानुभावं ब्रह्मर्षेर्विस्मयं समगात्परं॥२१॥ त
मेवं युंजतश्चित्तं तपःस्वाध्यायसंयमैः॥ अनुग्रहायाविरासीन्नरनारायणो हरिः॥२२॥ तौ शुक्लकृष्णौ नवकंजलोचनौ चतुर्भुजौ रौ
रववल्कलाजिनांबरौ॥ पवित्रपाणी उपवीतकं त्रिवृत्कमंडलुं दंडमृजुं च वैणवं॥२३॥ पद्माक्षमालामुत जंतुमार्जनं वेदं च साक्षात्तप ए
व रूपिणौ॥ तपत्तडिद्वर्णपिशंगरोचिषा प्रांशू दधानौ

[illegible]

राम
२५

वं कृष्णाजिनं वल्कलं चांबरं ययोस्तौ॥ पवित्रे पाण्योर्ययोः तौ॥ त्रिवृत्त्रिगुणं नवतंतुकमिति वा॥ त्रिवृद्बहिः पवमानमित्यादौ नवतंतुत्वादिमयं॥२३॥ वेदं च दर्भ
मुष्टिं॥ किंच॥ साक्षात्तपएव तौ॥ तत्र हेतुः॥ तपत्तडिद्वर्णं दीप्यमानविद्युत्संकाशं पत्पिशंगरोचिस्तेन रूपिणौ मूर्तिमंतौ॥ तादृक्तु तेजोयुक्तौ मूर्तिभ्यां
तपोमयत्वेन प्रकाशमानावित्यर्थः॥ प्रांशू उन्नतौ॥२४

उच्चैर्महता चादरेण॥३५॥ तयोः संदर्शनेनैव यश्चानंदस्तेन निर्वृत्तात् उपशांतात्मेंद्रियाशया ईहेंद्रियमनोऽसि पश्यामः नमो हे नाथ क्षोऽत॥३६॥ आश्लिष्य तत्र आश्लि
ष्य तत्र आलिंगयन्निव॥३७॥ पादयोस्तयं निज्य पादौ प्रक्षाल्य॥ अर्हणेन अर्घेण॥३८॥ पादाभ्यां पादावानम्य गरिष्ठौ पूज्यतमौ तौ प्रति॥३९॥ अथ तयोर्मिणात्तस्ये
व प्रवर्त्तकवादात्मनस्तत्स्तुता क्ष्यात तं अंपशंपन्नाह किमिति॥ हे विभो तव त्वां किं अहं वर्णये कथं नौमि॥ यत्स्ये नवयवउदीरितः प्रेरितोः असुः प्राणः संस्पंदते प्रवर्त्त

तेवैलगतो रूपेण नरनारायणावृषी॥ दृष्ट्वोत्थायादरेणोच्चैर्नेनामांगेन दंडवत्॥३५॥ सतत्संदर्शनानंदनिर्वृत्तात्मेंद्रियाशयः॥ हृष्ट
रोमाश्रुपूर्णाक्षो न सेहे तावुदीक्षितुं॥३६॥ उत्थाय प्रांजलिः प्रह्वः औत्सुक्यादाश्लिषन्निव॥ नमो नम इतीशानौ बभाषे गद्ग
दाक्षरः॥३७॥ तयोरासनमादाय पादयोरवनिज्य च॥ अर्हणेनानुलेपेन धूपमाल्यैरपूजयत्॥३८॥ सुखमासनआसीनौ प्रसा
दाभिमुखौ मुनिः॥ पुनरानम्य पादाभ्यां गरिष्ठाविदमब्रवीत्॥३९॥ ॥मार्कंडेय उवाच॥ ॥किं वर्णये तव विभो यदुदीरितोऽसुः सं
स्पंदते तमनु वाङ्मन इंद्रियाणि॥ स्पंदंति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि भावबंधुः॥ ॥४०॥ ॥

ते॥ तमनु च वागादयः स्पंदंति॥ अत्र हेतुः वै अन्वयव्यतिरेकाभ्यां श्रोत्रस्य श्रोत्रमित्यादिश्रुतिभिश्चावगतप्रसिद्धमित्यर्थः॥ न केवलं प्राकृतानां तनुभृतां॥ किंत्वज
जशर्वयोश्च॥ अतः स्वस्य ममापि तथैव एवं यद्यपि न क्वचिदपि कस्यापि स्वातंत्र्यं॥ अथापि दारुमयं यंत्रवत्प्रवर्त्तितैरपि वागादिभिर्भजतां त्वं सांभावबंधुः आ
त्मबंधुरसि॥ न तु पित्रादिवद्देहमात्रबंधुः अहो कृपालुता तवेत्यर्थः॥ ४०॥ ॥

नन्वकथमावांप्राणादिप्रवर्त्तकौ धर्मेपुत्रवादादावयोरितिवेत्तत्राह स्त्रर्ज्जीति ॥ हे भगवन् हे भगवतस्तवश्मेस्त्रर्ज्जौ त्रिलोक्याः क्षेमाय पालनाय तापविरमाय च दुःखनि
वृत्त्यै ॥ मृत्युजित्यै मोक्षाय च ॥ नत्वं कस्यापिपुत्रइत्यर्थः ॥ अत्र दृष्टांतः ॥ यथेदं विश्वमवितुं भयात्तनूर्मे स्यकर्मादिलक्षणाः ॥ नानाअनेकप्रकारा विभर्षि तत्वद्वत् ॥
नकेवलं पालनादिमात्रं तवकर्म ॥ किंतु सृष्टिलयावपीत्याह ॥ सृष्ट्वेति ॥ तत्राप्यनपेक्षत्वे दृष्टांतः ॥ ऊर्णनाभिरिवेति ॥४१॥ यस्मादेवंभूतस्त्वं तस्मात्तवांघ्रिमू
लंभजामीत्याह तस्येति ॥ तस्याविदुः पालकस्य स्थावरजंगमानामीश्वरस्य भजामीति तत्र तीयश्लोकस्यान्वयः ॥ कथंभूतमंघ्रिमूलं ॥ यत्स्थं यत्राश्रितं क

ऊर्ज्जीश्मेभगवतोभगवंस्त्रिलोक्याः क्षेमायतापविरमायमृत्युजित्यै ॥ नानाबिभर्ष्यवितुमध्यातनूर्ये येदंसृष्ट्वापुनर्ग्रसतिसर्व
मिवोर्णनाभिः ॥४१॥ तस्याविदुःस्थिरचरेशितुरंघ्रिमूलं यत्स्थंनकर्मगुणकालरुजःस्पृशंति ॥ यद्वैस्तुवंतिनिनमंतियजंत्य
भीक्ष्णंध्यायंतिवेदहृदयामुनयस्तदाप्त्यै ॥४२॥ नान्यंतवांघ्र्युपनयादपवर्गमूर्तेः क्षेमंजनस्यपरितोभियईशविद्मः ॥ ब्रह्मा
बिभेत्यलमतोद्विपरार्द्धधिष्ण्यः कालस्यतेकिमुततत्कृतभौतिकानां ॥४३॥ ॥छ॥ ॥

र्म्मगुणकालानांरजोबलं ॥ अत्यैव स्थैर्यन्नाम्नापादयोनस्पृशंति ॥ रुजःशक्तिर्वापाठः ॥ यतः वेदोहृदयेयेषांतेवेदतात्पर्यविदोमुनयः यद्वै स्तुवंति नितरां नमंति
तत्र ॥ तत्राप्यपेएवंभवनादिकुर्वंति ॥४२॥ यतः अन्यः पुरुषार्थोनास्तीत्याह नान्यमिति ॥ अंघ्र्युपनयात्श्रीमच्चरणप्राप्तेः अन्यं क्षेमं न विद्मः ॥ परितः सर्वेष
पिलोकेषु भीर्यस्य जनस्य तद्देवारु ॥ द्विपरार्द्धधिष्ण्यं स्थानं यस्य सः ब्रह्मापिते कालस्य चक्र विर्जं भरूपात्कालाद लं बिभेति ॥ अतः किमुत वक्तव्यं तेन कृ
लणा कृतानां भौतिकानां प्राणिनां भयमिति ॥४३॥

यस्मादेवं तत्तस्मात्तव पादमूलं भजामि॥ कथंभूतस्य॥ ऋतधियः सत्यज्ञानस्वरूपस्य॥ यद्वा ऋतमाचीर्येस्य यस्मिन्न वा तस्य॥ आत्मगुरोर्जीवस्य नियंतुः॥ अतः कारणात्परस्य किं कृत्वा॥ आत्मच्छदिं आत्मावरकं॥ अपार्थं च निःफलं॥ असदंतवद्ध्वंसं तच्च नश्वरं॥ इदं देहादि हित्वा देहादिभजनं त्यक्त्वा॥ असद्वेतत्कथं प्रतीयते तत्राह अभिज्ञमात्रं न त्वय्यंतमसत्॥ किं वात्ममात्रं न तत्ततः पृथग् गम्भीर्थः न चापवर्गाय भवतः भजनं। फलं तत्रार्थं वश्यं भजनं कार्यमेवेत्याह॥ तर्हीति॥

तद्वै भजाम्यृतधियस्तव पादमूलं हित्वेदमात्मच्छदि चात्मगुरोः परस्य॥ देहाद्यपार्थमसदंत्यमभिज्ञमात्रं विंदेत ते तर्हि सर्वमनीषितार्थं॥४४॥ सत्त्वं रजस्तम इति श्रुतवात्मबंधो मायामयाः स्थितिलयोदयहेतवोस्य॥ लीला धृता यदपि सत्त्वमयी प्रशांतै नान्ये नृणां व्यसनमोहभियश्च याभ्यां॥४५॥ तस्मात्तवेह भगवन्नथ तावकानां शुक्लां तनुं स्वदयितां कुशला भजंति॥ यत्सात्वताः पुरुषरूपमुशंति सत्त्वं लोको यतो भयमुतात्मसुखं न चान्यत्॥४६॥ ॥

यदि त्वां भजति पुरुषः तर्हि ते त्वत्त एव सर्वमनीषितमर्थं विंदेतेति॥४४॥ ननु ब्रह्मरुद्रावपि भमैवमूर्ती अतो मामेव किमत्यंतमाद्रियसे तत्राह सत्त्वमिति॥ यदपि यद्यपि तवैव मायया कृता एता लीलाः त्वयैव धृताः तथापि या सत्त्वमयी सैव प्रशांत्यै मोक्षाय न केवलं ग्रंथप्रशांत्यभावमात्रं मे भजने॥ किंच निष्टं च॥ किंचिदनिष्टमप्यथ विभवेदित्याह व्यसनेति॥४५॥ तदेव सदाचारेण द्रढयति॥ तस्मादिति॥ हे भगवन्॥ तव शुक्लां तां तनुं श्रीनारायणाख्यां अथ तावकानां शुक्लां तनुं नराख्यां॥ यद्यस्मात्॥ सात्वताः सत्त्वमेव पुरुषस्येश्वरस्य रूपमुशंति मन्यंते न तु अन्यत्॥ रजस्तम श्चेति अत्र हेतुः॥ यतः सत्त्वात् लोको वैकुंठाख्यः॥ लोकत्वेन तत्पदमभयं॥ भो

भा०द्वा०
२७

श्रुतमंत्रगणमनितस्मैनमइति॥ हंसायशुद्धाय॥ संयतगिरेनियतवाचे॥ अथवनिगमेश्वरायवेदमार्गप्रवर्त्तकाय॥४६॥ वेदार्थसंप्रदायप्रवर्त्तनेहेतुत्वंवदन्नमौतिपमि
तिकपर्टेंद्रियमार्गैर्भ्रमद्धीः विक्षिप्तबुद्धिः पुमान्॥ यंइंद्रियादिषु॥ नियंतृत्वेन संतमपियंवांनवेद॥ इंद्रियार्थेषु विषयेषु। बुद्धिविक्षेपेहेतुः॥ तन्मायया तस्यतवैवमा
ययाआवृताआत्मनिष्ठामतिर्यस्य॥ सतुसोपिआद्यएवपूर्वमज्ञातैवअखिलगुरोस्तवत्वत्सवर्त्तितवेदमुपसाद्यप्राप्यतंवोसाक्षाद्वेद॥४७॥ विदेनैवव्याख्यात

तस्मैनमोभगवतेपुरुषायभूम्नेविश्वायविश्वगुरवेपरदेवतायै॥ नारायणायऋषयेवनरोत्तमायहंसायसंयतगिरेनिगमेश्व
राय॥४६॥ यंवैनवेदवितथाक्षपथैर्भ्रमद्धीः संतंस्वखेष्वसुषुहृद्यपिदृक्पथेषु॥ तन्माययावृतमतिः सउएवसाक्षादाद्य
स्तेऽखिलगुरोरुपसाद्यवेदं॥४७॥ यद्दर्शनंनिगमआत्मरहः प्रकाशंमुह्यंतियत्रकवयोऽजपरायतंतः॥ तंसर्ववाददि
षयप्रतिरूपशीलंवंदेमहापुरुषमात्मनिगूढबोधम्॥४८॥ ॥इतिश्री०द्वादशस्कंधेअष्टमोध्यायः॥ ॥८॥ ॥राम॥॥

भिसुपपादयन्नुपसंहरणमति॥ यस्यतस्यतवदर्शनंनिगमेभवति॥ कथंभूतं॥ आत्मनस्तवरहः रहस्यप्रकाशकं अन्यथादुर्ज्ञेयत्वमाह॥ अजपराब्रह्मसुखाः कवयोपि
सांख्ययोगादिभिर्यतमानाः यत्रयस्मिन्नपिमुह्यंति॥ कुतस्तस्तत्राह॥ सर्वेषांसांख्यादिवादानांविषयाभेदादयस्तेषांप्रतिरूपंतत्तदनुसारिशीलंस्वभावोयस्यतं॥ कु
तः आत्मनादेहादिसंघातेननिगूढोबोधोयस्यतं॥ एवंभूतंमहापुरुषंवांवंदे॥४८॥ ॥द्वादशोष्टमः॥ ॥ ॥८॥ ॥

राम
२७

॥ नवमे भगवन्मायादिदृक्षुर्दर्शनं मनुः ॥ मायाशिशोर्लयाब्धौ च मुनेर्निर्वेशनिर्गमौ ॥

भगवतः परितोषपूर्वकं तस्यैप्सितवरदानं कथयितुमाह ॥ संस्तुत इत्यादिना ॥१॥ आत्मसमाधिना विनैकाग्र्येण ॥२॥ वयं ते परितुष्टाः स्मेति बहुवचनं सर्वदेवाभिप्रायेण ॥ वरदेशा इति एकवचनं द्वयोरैक्याभिप्रायेण ॥ पत्नी इष्टहा एण ॥३॥ वरेणाछंदयत तत्त्वयाजितं उत्कर्षो दर्शितः ॥ मम त्वं वरः कांक्षा नान्नीत्याह ॥ वरेणेति ॥ यत्त्वच्छ्रीमत्पादाब्ज

सूत उवाच ॥ ॥ संस्तुतो भगवानित्थं मार्कंडेयेन धीमता ॥ नारायणो नरसखः प्रीत आह भृगूद्वहं ॥१॥ ॥ भगवानुवाच ॥ ॥ भो भो ब्रह्मर्षिवर्यासि सिद्ध आत्मसमाधिना ॥ मयि भक्त्यानपायिन्या तपःस्वाध्यायसंयमैः ॥२॥ वयं ते परितुष्टाः स्म त्वद्बृहद्व्रतचर्यया ॥ वरं प्रतीछ भद्रं ते वरदेशादभीप्सितम् ॥३॥ ॥ ऋषिरुवाच ॥ ॥ जितं ते देवदेवेश प्रपन्नार्तिहराच्युत ॥ वरेणैतावतालं नो यद्भवान्समदृश्यत ॥४॥ गृहीत्वाजादयो यस्य श्रीमत्पादाब्जदर्शनम् ॥ मनसा योगपक्वेन स भवान्मेक्षिगोचरः ॥५॥ अथाप्यंबुजपत्राक्ष पुण्यश्लोकशिखामणे ॥ द्रक्ष्ये मायां यया लोकः सपालो वेद सद्भिदां ॥६॥ ॥ सूत उवाच ॥ ॥ इतीडितोर्चितः काममृषिणा भगवान्मुने ॥ तथेति स स्मयं प्रागाद्बदर्याश्रममीश्वरः ॥७॥ तमेव चिंतयन्नर्थमृषिः स्वाश्रम एव सः ॥ वसन्नग्न्यर्कसोमांबुभूवायुवियदात्मसु ॥८॥ ॥४॥ ॥

दर्शनं मनसापि गृहीत्वा प्राप्य साक्षात्तान्यजादयो भवंति ॥ स भवान्मेक्षिगोचरो जातोसि ॥ किमतः परं वरेणेत्यर्थः ॥५॥ द्रक्ष्ये द्रष्टुमिच्छामि ॥ लोकपालैर्ब्रह्मादिभिः सहितोऽयं लोको जनः सद्भिदां सति वस्तुनि भिदां यया वेत्ति ॥६॥ तथेति इत्थं स्मीति ईश्वरः स्मयन्प्रागात् ॥ पाठांतरे क्रियाविशेषणं ॥७॥ तमेवार्थं मायादर्शनरूपं अग्न्यादिषु निधिषु ॥८॥

भाद्वा
२८

लावइथ्यै मे नो मयै ईथ्यैः॥कचित्तकदाचित्प्रेमप्रसरसंभृतः प्रेमोद्रेकं प्राप्तः॥ण्॥मायादर्शनमाह॥तस्येत्यादिना॥१०॥तं वायुमनुवलाहका मेघाश्च भवतत्राविर्भावइत्यै मनो मयै ईथ्यैः॥
वेष्वभूवुः॥ते चतडिद्भिः सहिता उच्चैःस्वनं तो गर्जतः॥अश्रेष्टोरयागतद्वस्त्वविष्टाः अमितो वर्षधाराः सुसुवुः॥११॥वर्धद्भिर्हृद्धवर्त्तमानाः समुद्राः समीरवेगेनोर्मयस्तैर्भूत
लंग्रसंतः॥उयानक्रायेषु॥महामयाश्चावर्त्ता येषु॥गंभीरो घोषो येषु तेरवतेव॥१२॥आत्मनामह॥जरायुजादिचतुर्विधं जगदंतर्वहिश्चोपतापितं वीक्ष्यक्ष्मावजला

ध्यापदभ्रसर्वत्र वहिर्भावइथ्यैरपूजयत्॥कचित्सूज्जां विसस्मार प्रेमक्रमप्रसरसंभृतः॥ण्॥तस्यैक दास्वगुप्रेष्ठप्रष्यमद्रातरेभुने॥उपासी
नस्य संध्यायां वलहजवायुरभून्महान्॥१०॥तं चंडशब्दं समुदीरयंतं वलाहकाश्चाभवन्नकरालाः॥अश्रदास्थुविष्टाः सुसुवुश्च तडिद्भिः स्वनं तत
वैरभिवर्षधराः॥११॥ततो व्यहृशपतवत्तः समुद्राः समंततः र्भूतलमाग्रमंतः॥समीरवेगोर्मिभिरुग्रनक्रमहाभयावर्त्तगभीरघोषाः
॥१२॥अंतर्वहिस्थावरजंगमैस्तिग्मभिः खरैः शातकुदाभीरुपतापितं जगत्॥चतुर्विधं वीक्ष्य सहात्मनास्तुनिर्जलाम्बुतां क्ष्मा विमनाः समवस
त्॥१३॥तस्यैव सुद्वीक्ष्यतरूर्मिभीषणः प्रभंजनाघूर्णितवार्महार्णवः॥आपूर्यमाणो वरषद्भिरंबुदैः क्ष्मामप्यधात्द्वीपवर्षाद्रिभिः समं १४

राम
२८

स्तुतां वीक्ष्य मुनिः समवसत् भयं प्राप॥केनोपतापितं अद्भिः॥कथंभूताभिः अतिग्मभिः अतिक्रांता द्यौर्याभिः॥खरैस्तीक्ष्णैः सूर्यरश्मिभिः वायुवा भिर्वितिशेषः॥शातकुदाभि
श्चविद्युद्भिः॥दीर्घमार्षछंदोनुसारेण॥१३॥प्रभंजनेनाघूर्णितप्रकंपितं वाः उदकं यस्मिन् सः अप्यधात् छादयामास॥समसह॥१४॥ ॥

मद्ध्यांतरिक्षं मध्यंतरिक्षमध्यप्राणिसहितं॥ सदिवं स्वर्गो ह्य देवसहितं॥ भगणान् ज्योतिर्गणाः तैः सहितं शाजटा विक्षिप्य विकीर्य॥१५॥ परिश्रमेण इषितः गतः ध्यानस्त्यर्थेः॥
इश्रुमपेणश्तस्मात्॥१६॥ ग्रयोच्यघातिभिः तरङ्गक्षेणायपरस्परंयुध्यद्भिः॥१७॥ विष्णुमायाहतात्मनः इतिमततथाहृष्टवानित्यर्थः॥१९॥ ककुदि उन्नतप्रदेशे॥ ग्रयो

सद्यांतरिक्षं सदिवं सभागणं त्रैलोक्यमासीत्सह दिग्भिराप्लुतम्॥ स एक एवोर्वरितो महामुनिर्बभ्राम विक्षिप्य जटा जडांधवत्॥१५॥
क्षुत्तृट्परीतो मकरैस्तिमिंगिलैरुपद्रुतो वीचिनभस्वताहतः॥ तमस्यपारे पतितो भ्रमन्दिशो न वेद खं गां च परिश्रमेषितः॥१६॥ क्वचिद्गतो
महावर्ते तरलैस्ताडितः क्वचित्॥ यादोभिर्भक्ष्यते क्वापि स्वयमन्योन्यघातिभिः॥ क्वचिच्छोकं क्वचिन्मोहं क्वचिद्दुःखं सुखं भयं॥ क्वचिन्मृत्युम
वाप्नोति व्याध्यादिभिरुतार्दितः॥१८॥ अयुतायुतवर्षाणां सहस्राणि शतानि च॥ व्यतीयुर्भ्रमतस्तस्मिन्विष्णुमायावृतात्मनः॥१९॥ स कदा
चिद्भ्रमंस्तस्मिन्पृथिव्याः ककुदि द्विजः॥ न्यग्रोधपोतं ददृशे फलपल्लवशोभितम्॥२०॥ प्रागुत्तरस्यां शाखायां तस्यापि ददृशे शिशुम्॥ श
यानं पर्णपुटके ग्रसंतं प्रभया तमः॥२१॥ महामरकतश्यामं श्रीमद्वदनपंकजम्॥ कंबुग्रीवं महोरस्कं सुनासं सुंदरभ्रुवम्॥२२॥ श्वासैजदलका
भातं कंबुश्रीकर्णदाडिमम्॥ विद्रुमाधरभासेषच्छोणायितसु

धपोतं कोमलं वटम्॥२०॥ तस्य ऐशान दिक्शाखायां शिशुमपि॥२१॥ श्रीमत् रम्यं वदनपंकजं यस्य तं॥ कंबुवत् त्रिरेखावृत्ता ग्रीवा यस्य तं॥ महोरस्कं विशालवक्षसम्॥
सुनासं शोभना नासा यस्य तम्॥ सुंदरे भ्रुवौ यस्य तम्॥२२॥ श्वासैरेजंतः कंपमाना ये अलकास्तैराभातं शोभितं॥ कंबुवत् रेखात्रयवलयेन श्रीर्ययोः तौ कंबुश्रियौ तयोः क
र्णयोः दाडिमपुष्पं यस्य तम्॥ विद्रुमवत् ल्याधरभासा ईषत् शोणायितं सुधामृतवत् स्मितं यस्य तं॥२३॥ ॥

पद्मगर्भमेवतत्र्यारक्षत्त्ररुणावपांगौनेत्रांतौयस्यतम्॥हृद्योहासोयस्मिंस्तदवलोकनंयस्यतं॥श्वासैरेजंत्यश्चलंत्योवलयस्त्रिपेक्तनिम्नरेखास्ताभिःसं
विग्नाश्चंचलानिम्नागंभीरानाभिर्यस्मिंस्तत्॥दलवदश्वत्थपत्रसंकाशमुदरंयस्यतं॥२४॥चारवःसुंदरायंगुलयोययोस्ताभ्यामुन्नीयउद्धृत्यधयंतंपिबंतम्॥
२५॥हृत्पद्मंचविलोचनांबुजेचप्रोत्फुल्लानितानियस्यसः॥अद्भुतभावंप्रत्याश्चर्यरूपम्॥तेनशंकितःसन्नपितंप्रष्टुंपुरःप्रससारसमीपंगतः॥२६॥

पद्मगर्भारुणापांगंहृद्यहासावलोकनं॥श्वासैजदलिसंविग्ननिम्ननाभिदलोदरं॥२४॥चार्व्वंगुलिभ्यांपाणिभ्यामुन्नीयच
रणांबुजम्॥मुखेनिधायविप्रेंद्रोधयंतंवीक्ष्यविस्मितः॥२५॥तद्दर्शनाद्वीतपरिश्रमोमुदाप्रोत्फुल्लहृत्पद्मविलोचनांबुजः॥प्र
हृष्टरोमाद्भुतभावशंकितःप्रष्टुंपुरस्तंप्रससारबालकं॥२६॥तावच्छिशोर्वैश्वसितेनभार्गवःसोंतःशरीरंमशकोयथाविशत्॥
तत्राप्यदोन्यस्तमचष्टकृत्स्नशोयथापुरामुह्यदतीवविस्मितः॥२७॥खंरोदसीभगणानद्रिसागरान्द्वीपान्सवर्षान्ककुभःसुरा
सुरान्॥वनानिदेशान्सरितःपुराकरान्खेटान्व्रजानाश्रमवर्णवृत्तयः॥२८॥महांतिभूतान्यथभौतिकान्यसौकालंचना॰
नायुगकल्पकल्पनं॥यत्किंचिदन्यद्व्यवहारकारणंददर्शविश्वंसदिवावभासितम्॥२९॥ ॥

अदःइदंजगत्तत्रयथापुराप्रलयात्पूर्वंन्यस्तंविन्यस्तंदृष्ट्वाचअतीवविस्मितःसन्मुमोह॥२७॥कार्त्स्न्यशोदर्शनंप्रपंचयतिखमित्यादिना॥ककुभोदिशः॥पुरा
णि॥आकाराश्च॥खेटान्कर्षकग्रामान्॥व्रजान्गोकुलानि॥आश्रमांश्चवर्णांश्चवृत्तीश्चेत्यर्थः॥२८॥नानायुगानिकल्पाश्चकल्प्यंतेयैस्तैर्वाकल्प्यतइति
तथातंकालंच॥सदिवपरमार्थस्वत्येवभासितंतेनैव॥२९॥

वटं वृतो कंच वीक्ष्य तस्य प्रेम्ना सुधासल्पस्मित पुल्लेनापांगनिरीक्षणेन निरीक्षितः सन्॥३२॥ अथ तं बालकमधोक्षजं परिष्वक्तुमथ्यादिति द्वीपोरवयः। कथं तं तंने
त्राभ्यां हृदि धिष्ठितं॥३३॥ तावत्परिष्वंगलाभात्सर्वमेव क्रमपेन्नयो तर्हितो वस्त्रवातत्ताडयमवैफल्ये दृष्टांतः॥ अनीशो निर्वैवः तेन निर्मिता ईहा क्रीडा यथेति॥३४॥ तेनैवं तर्हितं
भगवंतमत्र वटः सलिलं लोकसंप्लवश्च तिरोधापि श्रुतर्हितः॥ स च स्वाश्रमे एव यथापूर्वं स्थित इति॥३५॥ ॥इति द्वादशेन वासः॥ दशमे शिवस्यागत्य मुनेस्तुष्टो वरान्ददौ॥

हिमालयं पुण्यवहां वत्तां नंदीं निजाश्रमं तत्र ऋषीन पश्यत॥ विश्वं विपश्यन्श्रमितात् शिशोर्वै बहिर्निरस्तो न्यपतल्लयाब्धौ॥३२॥ तस्मिन्पृथिव्याः क-
कुदि प्ररूढं वटं च तत्पर्णपुटे शयानं॥ तोकं च तत्प्रेमसुधास्मितेन निरीक्षितोऽपांगनिरीक्षणेन॥३३॥ अथ तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठितं हृदि॥ अभ्य-
याद तिसंक्लिष्टः परिष्वक्तुमधोक्षजं॥३३॥ तावत्स भगवान्साक्षाद्योगाधीशो गुहाशयः॥ अंतर्दधे ऋषेः सद्यो यथेहानीशनिर्मिता॥३४॥ तमन्वथ वटो
ब्रह्मन्सलिलं लोकसंप्लवः॥ तिरोधायि क्षणेऽस्य स्वाश्रमे पूर्ववत्स्थितः॥३५॥ ॥इति श्री द्वादशे मायादर्शनं नाम नवमोऽध्यायः॥ ॥सूत उवाच॥
स एवमनुभूयेदं नारायणविनिर्मितं॥ वैभवं योगमायायास्तमेव शरणं ययौ॥१॥ ॥मार्कंडेय उवाच॥ ॥प्रपन्नोऽस्म्यंघ्रिमूलं ते प्रपन्नाभयदं हरे॥ य-
न्मायया पि विबुधा मुह्यंति ज्ञानकाशया॥२॥ ॥सूत उवाच॥ ॥तमेवं निभृतात्मानं वृषेण दिवि पर्यटन्॥ रुद्राण्या भगवान्रुद्रो ददर्श स्वगणैर्वृतः

तेन साकमति प्रीत्या सममामाप्य समाजयन्॥ ज्ञानकाशया ज्ञानवत्प्रकाशमानया॥ न ब्रजनं विना विद्वांसोऽपि यस्य तव मायया ज्ञानिनो वयमित्याहंकारेण मुह्यंती
त्यर्थः॥१॥ श्रीनारायण एव स्वमायादर्शने ऽशांतं श्रीशिवरूपेण सांत्वयामासेत्याह॥ तमेवमित्यादिना॥ निभृतात्मानं समाहितचित्तं॥ रुद्राण्या भवान्या॥३॥ ज्ञानेन
काशते नाशयतीति ज्ञानकाशा तया॥ काश हिंसायामिति धातोः॥४

भा॰द्वा॰
३०

निभृता निश्चला आत्मेंद्रियाशया देहेंद्रियमनांसि यस्य तम् ॥४॥ निभृतं निश्चलमुदकं झषव्रातश्च यस्मिन्सः संसिद्धिं फलं साक्षात्कुरु सफलीकुरु यतो भगवान्सि
द्धिदः ॥५॥ आशिषः अभ्युदयलक्षणाः ॥ उत अपि ॥ अत्र हेतुः ॥ भक्तिमिति ॥६॥७॥ संवदिष्यामः संवादं करिष्यामः ॥ सात्वतां सतां ॥ गतिर्विहेतुः ईशान इति ॥८॥

अथोमा तमृषिं वीक्ष्य गिरिशं समभाषत ॥ पश्येमं भगवन्विप्रं निभृतात्मेंद्रियाशयम् ॥४॥ निभृतोदझषव्रातो वातापाये यथार्ण
वः ॥ कुर्वस्य तपसः साक्षात्संसिद्धिं सिद्धिदो भवान् ॥ ॥ भगवानुवाच ॥ ॥ नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत ॥ भक्तिंप
रां भगवति लब्धवान्पुरुषेऽव्यये ॥६॥ अथापि संवदिष्यामो भवान्येतेन साधुना ॥ अयं हि परमो लाभो नृणां साधुसमागमः ॥७॥
॥ सूत उवाच ॥ इत्युक्त्वा तमुपेयाय भगवान्स सतां गतिः ॥ ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनां ॥८॥ तयोरागमनं साक्षा
दीशयोर्जगदात्मनोः ॥ न वेद रुद्धधीवृत्तिरात्मानं विश्वमेव च ॥९॥ भगवांस्तदभिज्ञाय गिरिशो योगमायया ॥ आविशत्तद्गुहाका
शं वायुश्छिद्रमिवेश्वरः ॥१०॥ आत्मन्यपि शिवं प्राप्तं तडित्पिंगजटाधरम् ॥ त्र्यक्षं दशभुजं प्रांशुमुद्यंतमिव भास्करम् ॥११॥ ॥छ॥

राम
३०

रुद्धा धियोऽन्तःकरणस्य वृत्तयो येन सः ॥९॥१०॥ न केवलं बहिरेव आत्मन्यपि प्राप्तं शिवं विवस्त्वा विस्मितः ॥ कथं प्राप्तं सहसा अकस्मादेव हृदि भातं कथंभूतं तडित्पि
शंगा जटा धारयतीति तथा तं ॥ त्रीण्यक्षीणि यस्य तं शूलादिभिः सहाक्षमालादीन्बिभ्राणमित्वपुः ॥ ॥११॥१२॥ ॥छ॥ ॥ रामोजयति ॥ ॥छ॥ ॥ ॥

अक्षमालादीनां इंदैकं यं ॥ ११ ॥ १२ ॥ विस्मयपूर्वकं वहिर्दृशेनमाह ॥ किमिदमिति ॥ सोमया उमया सह । गंतरुदं ददृशे ॥ १३ ॥ ततोननाम ॥ १४ ॥ धूर्णोकामतं यनक्रियेनव
पाजगन्निर्दृतं भवतीति ॥ १५ ॥ निर्गुणत्वेन त्रिगुणत्वेन च नमस्करोति ॥ नमः शिवाय निर्गुणाय सत्वाय मत्वाधिष्ठात्रे ॥ अत एव प्रसृष्टपतीति थात स्मै ॥ १६ ॥ १७ ॥ नोस्मन्नः

थाघ्रचर्मांबरं स्थूलधनुरिषुभिर्वमभिः ॥ अक्षमालाडमरुककपालपरशुं सह ॥ विभ्राणं सहस्राभं तं विवक्ष्य हृदि विस्मितः ॥ १२ ॥ किमिदं क्व
त एवेति समाधेर्विरतो मुनिः ॥ नेत्रे उन्मील्य ददृशे सगणं सोमयागतम् ॥ १३ ॥ रुद्रं त्रिलोकैकगुरुं ननाम शिरसा मुनिः ॥ तस्मै सपर्यां व्यदधा
त्सगणाय सहोमया ॥ स्वागतासनपाद्यार्घ्यगंधस्रग्धूपदीपकैः ॥ १४ ॥ आह त्वात्मानुभावेन पूर्णकामस्य ते विभो ॥ करवाम किमीशान
येनेदं निर्वृतं जगत् ॥ १५ ॥ नमः शिवाय शांताय सत्वाय प्रमृडाय च ॥ रजोजुषेऽथ घोराय नमस्तुभ्यं तमोजुषे ॥ १६ ॥ सूत उ० ॥ एवं स्तुतः स भगवा
नादिदेवः सतां गतिः ॥ परितुष्टः प्रसन्नात्मा प्रहसंस्तमभाषत ॥ १७ ॥ ॥ भगवानुवाच ॥ ॥ वरं वृणीष्व नः कामं वरदेशा वयं त्रयः ॥ अमोघं दर्शनं
येषां मर्त्यो यद्विंदतेऽमृतम् ॥ १८ ॥ ब्राह्मणाः साधवः शांता निःसंगा भूतवत्सलाः ॥ एकांतभक्ता अस्मासु निर्वैराः समदर्शिनः ॥ १९ ॥ सलोका
लोकपालास्तान् वंदंत्यर्चंत्युपासते ॥ अहं च भगवान्ब्रह्मा स्वयं च हरिरीश्वरः ॥ २० ॥ ॥ ६ ॥ ॥

त्रयः ब्रह्मा विष्णु महेश्वराः । यत्प्रयेभ्यः ॥ ते वयम् ॥ १८ ॥ वरदा नारदिना भवत्से वैवास्माभिः ॥ क्रियते न त्वनुग्रहः ॥ जगद्वंद्यत्वाद्भवतामिति ब्राह्मणान्नमेति । ब्राह्मणा इत्या
दिना ये साधवः सदाचाराः शांताः मत्सरादिरहिताः निःसंगाः निष्कामाः ॥ १९ ॥ न केवलं त एवा किंच ॥ अहं चेत्यादि ॥ २० ॥

भा॰द्वा॰
३१

न्वप्तमविहेत्वंतरमाह॥नेति॥अथवेपि अणुमात्रमपि वक्तृते पश्यंति॥तत्तस्मात्॥एवंभूतानामुष्माद्ईमहि भजेम॥२२॥२४॥ब्राह्मणेभ्यः ब्राह्मणान् आत्मसमाधानं
चित्तैकाग्र्यं॥तपश्चालोचनं॥स्वाध्यायः अध्ययनं॥संयमः वागादिनियमः तैः॥२३॥किंच॥श्रवणादित्यादि॥२४॥चंद्रो ललामो भूषणं यस्य तस्य धर्मेरहस्ययुक्तं अमृ
तास्यंदं वचः कर्णाभ्यां पिवतां नाद्य प्यनृतलमिति नाम न्यत॥कर्णयोरमृताय नमिति वाक्यः॥२५॥शिवस्यवागेवामृतं तेनधम्नः क्लेशपुंजो यस्य सः॥२६॥इयंलीला

नते मद्यस्तुते येवभिदामसेपि वक्तृते॥नात्मनस्वजनस्यापि तद्युष्माखयमीमहि॥२१॥नत्वंघमपानित्तीर्थानिनदेवाश्चेतनोहिताः॥तेपुनं
त्युरुकालेन स्पृयं दर्शनमात्रतः॥२२॥ब्राह्मणेभ्यो नमस्यामो येऽस्माद्रूपं त्रयीमयं॥बिभ्रत्यात्मसमाधान तपःस्वाध्यायसंयमैः॥२३॥श्रवणा
द्दर्शनाद्वापि महापातकिनोपि वः॥शुद्ध्येरन्नंत्यजाश्चापि किमु संभाषणादिभिः॥२४॥ ॥सूत उ॥ ॥इति चंद्रललामस्य धर्मगुह्योपवृं
हितं॥वचोमृतायनमृषिर्नातृप्यत्कर्णयोः पिवन्॥२५॥सचिरं मायया विष्णोर्भ्रामितः कर्शितो भृशं॥शिववागमृतध्वस्तक्लेशपुंजस्तमम
ब्रवीत्॥२६॥ ॥ऋषिरुवाच॥ ॥अहो ईश्वरचर्येयं दुर्विभाव्या शरीरिणां॥यंनमंतीशितव्यानि स्तुवंति जगदीश्वराः॥२७॥धर्मग्राह पितुं प्रा
यः प्रवक्तारश्च देहिनां॥आचरंत्यनुमोदंते क्रियमाणं स्तुवंति च॥ ॥२८॥ ॥

दुर्विभाव्या॥अवितर्क्या पद्ययाईशितव्यानि च नियम्यानि यानि भूतानि जगदाधराः स्वयंनमंति स्तुवंति चेति॥२७॥अथवालोकसंग्रहमात्रमेतदित्याह॥धर्ममिति॥
प्रवक्तारोपि यस्वयं देहिनां धर्ममाचरंति॥२८॥ ॥रामकृष्णगोविंदगोपाल॥ ॥छ॥ ॥ राम॥ ॥ राम॥ रामराम॥ ॥ ॥छ॥ ॥

श्री २
राम
३१

नवेत्तस्वप्रभावतिरस्कारकं कथं मयाक्षिप्यते॥ तत्राह। नेति। एतावता लोकसंग्रहमात्रेण। तैर्लेभनादिभिः॥ कथं भूतैः स्वमायामयीवृत्तिर्यैर्भूतैः भगवतो मायिनश्च वा
नुभावो न दुःष्येत॥ यतः प्रसिद्धस्य मायिनः कुहकं यथा कपटं यथा तथैता निनमनादीनि॥ यत्तस्य प्रपंचस्य कुहकैरात्मानुभावो न दुष्यति तद्वत्॥ षड्भिरेतैःतिपा
ठेन कारस्य दृष्टांते नृत्वं गः॥ २९॥ मायावेष्टितं प्रपंचयति। सृष्ट्वेति॥ स्वप्नदृक् यथेत्पविद्यावेष्टिते दृष्टांतः॥ ३०॥ निर्गुणत्वेपि न जीववद्भिन्नताप॥ किंतु। गुणाना

नैतावता भगवतः स्वमायामयवृत्तिभिः॥ न दुष्येतानुभावस्तैर्मायिनः कुहकं यथा॥ २९॥ सृष्ट्वेदं मनसा विश्वमात्मनानुप्रविश्य यः॥
गुणैः कुर्वद्भिराभाति कर्तेव स्वप्नदृक् यथा॥ ३०॥ तस्मै नमो भगवते निर्गुणाय गुणात्मने। केवलायाद्वितीयाय गुरवे ब्रह्ममूर्त
ये॥ ३१॥ कं वृणे नु वरं पुंसामन्नवरं त्वद्वरदर्शनात्॥ यद्दर्शनात्पूर्णकामः सत्यकामः पुमान्भवेत्॥ ३२॥ वरमेकं वृणेथापि पूर्णात्का
माभिवर्षणात्॥ भगवत्यच्युतां भक्तिं तत्परेषु तथा त्वयि॥ ३३॥ सूत उ॥ इत्यर्चितोभिष्टुतश्च मुनिना सूक्तया गिरा॥ तमाह भग
वान्शर्वः शर्वया चाभिनंदितः॥ ३४॥ कामो महर्षे सर्वोयं भक्तिमांस्त्वमधोक्षजे॥ आकल्पांताद्यशः पुण्यमजरामरता तथा॥ ३५
ज्ञानं त्रैकालिकं ब्रह्मन्विज्ञानं च विरक्तिमत्॥ ब्रह्मवर्चस्विनो भूयात्पुराणाचार्यतास्तु ते॥ ३६॥ ॥

मात्मने निषंते॥ ३१॥ वरं वृणीष्वेति यदुक्तं॥ ३२॥ तत्राह। कमिति। वरं दर्शनं यस्य तस्मात्त्वत्तः परं कं नु वरं वृणे यस्य नवदर्शनात्पूर्णकामः सर्वानंदसंदोहरूपः॥ सत्यका
मः यथेष्टं प्राप्तसर्वानंदः॥ ३१॥ ३२॥ वरदानाय स्वयमेव प्रवृत्तः सर्वया उमया चाभिनंदितः अनुमोदितः सन्नाह॥ ३४॥ कामोयं सर्वोपि॥ अन्यच्च पुण्यं यशः इत्यादि॥ ब्रह्मव

वेष्विनमेऽस्त्यादिस्त्रनरेणाव ८ः पत्रमत्वमयोक्तजेमक्तिमा॰ ३५

तस्यकर्मेतपश्चादिमुनेःपुराऽनुभूतंचभगवन्मायावैभवंतच्चकथयन्॥३७॥ अथवाप्तोमहायोगमहिमायेनसः॥३८॥ एतन्मार्कण्डेयस्यचरितंतेनानुभूतंचभगवन्मायावै भवंतेऽनुवर्णितं॥३९॥ नन्वेवमप्यस्मत्कल्पोत्पन्नस्यास्यसप्तकल्पायुष्ट्वं॥ दृष्टंदृश्यमानंविरुद्धमेव॥ तत्राह॥ एतन्मार्कण्डेयेनानुभूतंभगवन्मायावैभवंनाना कल्परूपंकादाचित्कंईश्वरेच्छयातस्यैवाकस्मिकंनतुसर्वसाधारणं॥ एतत्केचित्॥ अनादिवक्रकालं॥ आवर्तितंदैवयुगसहस्रद्वयमानेनपुनःपुनःपरिवर्तितंप्रव

॥ सूतउवाच॥ ॥एवंवरान्समुनयेदत्वाऽगात्त्र्यक्षईश्वरः॥ देव्यैतत्कर्मकथयन्ननुभूतंपुरामुनेः॥३७॥ सोप्यवाप्तमहायोगमहिमाभार्गवोत्तमः॥ विचरत्यधुनाऽप्यद्धाहरावेकांततांगतः॥३८॥ अनुवर्णितमेतत्तेमार्कण्डेयस्यधीमतः॥ अनुभूतंभगवतोमायावैभवमद्भुतं॥३९॥ एतत्केचिदविद्वांसोमायासंसृतिमात्मनः॥ अनाद्यावर्तितंनृणांकादाचित्कंप्रचक्षते ॥४०॥ यएवमेतद्भृगुवर्यवर्णितंरथांगपाणेरनुभावभावितम्॥ संश्रावयेत्संशृणुयादुतावुभौतयोर्नकर्माशयसंसृतिर्भवे त्॥४१॥ ॥इतिश्रीभाग॰द्वादशेदशमोध्यायः॥ ॥शौनकउ॰॥ ॥अथेममर्थंपृच्छामोभवंतंबहुवित्तमं॥ समस्ततंत्रराद्धांते भवान्भागवततत्त्ववित्॥१॥

क्षते॥ केते॥ नृणांसंसृतिंसर्गप्रलयादिलक्षणांआत्मनोभगवतोमायेत्येवमविद्वांसः॥ विद्वांसस्तुमायाशिशोःस्वाशोच्छ्
साश्वासंसप्तकृत्वस्तदुदरप्रवेशनिर्गमतःसप्तकल्पत्वंतत्रक्षणमात्रेणेतिवदंति॥ अतोनविरोधइत्यर्थः॥४०॥ संशृणुयादुपात्तउतसंश्रावयेद्वायोतावुभौ॥ तयोःकर्मवा
सनाकृतासंसृतिर्नस्यादिति॥ ॥द्वादशेदशमः॥ ॥एकादशेतुतन्त्रार्थमहापुरुषवर्णनं॥ रवेर्व्यूहस्यचाख्यानंप्रतिमासंपृथक्पृथक्॥ येना॥मर्त्यत्वमापन्नोमर्त्यो
सोभार्गवोत्तमः॥ तंपृच्छतिक्रियायोगंसांगोपांगादिकल्पितं॥ अथेति॥ हेभागवतपतेभवान्समस्ततंत्रराद्धांतेतत्त्ववित्॥१॥

प्रष्टव्यमाह॥ तांत्रिकाइति॥ परिचर्यायांउपासनायां विषये केवलस्य वैतन्यघनस्य॥ अंगानि पादादीनि॥ उपांगानि गरुडादीनि॥ आयुधानि सुदर्शनादीनि॥ आकल्पाः कौस्तु
भादयः तेषां हंहैकं तद्यथा कल्पयंति॥ येस्वतत्त्वैः कल्पयंति॥३॥ तन्नोवर्णयेति॥३॥ गुरूपदेशगम्यत्वादस्यार्थस्य तन्नमस्कारपूर्वकमाह॥ नमस्कृत्वेति॥ विभूतीः विराड् विग्र
हाद्याः॥४॥ अंगादिकल्पनां भूरादिभिर्दर्शयितुं प्रथमं तावद्यथाकल्पयंतीति प्रश्नस्य वैराजरूपेणोत्तरं वक्तुं विराड्विग्रहमाह॥ मायाद्यैः प्रकृतिसूत्रमहदहंकारपंचतन्मा

तांत्रिकाः परिचर्यायां केवलस्य श्रियः पतेः॥ अंगोपांगायुधाकल्पं कल्पयंति यथैव यैः॥३॥ तन्नो वर्णय भद्रं ते क्रियायोगं बुभुत्सतां॥ येन क्रि
यानैपुणेन मर्त्यो यायादमर्त्यतां॥३॥ सूत उवाच॥ ॥नमस्कृत्वा गुरून्वक्ष्ये विभूतीर्वैष्णवीरपि॥ याः प्रोक्ता वेदतंत्राभ्यामाचार्यैः पद्मजा
दिभिः॥४॥ मायाद्यैर्नवभिस्तत्त्वैः सविकारमयो विराट्॥ निर्मितो दृश्यते यत्र सचित्के भुवनत्रयं॥५॥ एतद्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः
नाभिः सूर्योक्षिणी नासे वायुः कर्णौ दिशः प्रभोः॥६॥ प्रजापतिः प्रजननमपानो मृत्युरीशितुः॥ तद्बाहवो लोकपाला मनश्चंद्रो भ्रुवौ यमः॥७॥
लज्जोत्तरोधरो लोभो दंता ज्योत्स्ना स्मयो भ्रमः॥ रोमाणि भूरुहो भूम्नो मेघाः पुरुषमूर्द्धजाः॥८॥ ॥७॥

त्रैर्नवभिस्तत्त्वैः॥ विकारएकादशेंद्रियाणि पंचमहाभूतानीति षोडश॥ तन्मयो विराड्सम्प्रसिद्धो निर्मितः यत्र विराजि सचित्के चेतनाधिष्ठिते भुवनत्रयं दृश्यते॥ अनेनांगादिक
ल्पनासौलभ्यं दर्शितम्॥५॥ एतद्वै पौरुषं रूपं पुरुषस्य वैराजस्य रूपमेवेश्वरेणाधिष्ठितत्वात्तदभेदविवक्षया तत्स्वरूपमुच्यते॥ अंगकल्पनामाह॥ भूः पादावित्यादित्रि
भिः॥४॥ भूरादयश्चवादेन भगवत्पादादिभावना विधीयते

अत्रैतन्मयत्रयेवस्त्वयमित्याह॥यावानयंव्यष्टिपुरुषःस्वमानतःसप्तवितस्तिसंस्थयापादावयवसंनिवेशेनमितः॥९॥भूषणादीन्याहकौस्तुभेत्यादिना॥स्वात्मज्योतिःशु
द्धजीवचैतन्यम्॥यातस्यकौस्तुभस्यप्रभातामेवश्रीवत्संबिभर्ति॥१०॥त्रिवृत्स्वरंत्रिमात्रंप्रणवम्॥११॥पारमेष्ठ्यंपदंब्रह्मलोकम्॥१२॥अव्याकृतंप्रधानं॥यदधि
ष्ठितःअधिष्ठायस्थितः॥तदासनम्॥तत्पद्मंसत्वंसत्वगुणः॥१३॥मुख्यतत्वंप्राणतत्वं॥प्राणोवैमुख्यइतिश्रुतेः॥दरवरंशंखं॥१४॥१५॥आकूतीःक्रियाशक्ति

यावानयंवैपुरुषोयावत्यासंस्थयामितः॥तावानसावपिमहान्पुरुषोलोकसंस्थया॥९॥कौस्तुभव्यपदेशेनस्वात्मज्योतिर्बिभर्त्यजः॥तत्प्रभाव्या
पिनीसाक्षाच्छ्रीवत्समुरसाविभुः॥१०॥स्वमायांवनमालाख्यांनानागुणमयींदधत्॥वासश्छंदोमयंपीतंब्रह्मसूत्रंत्रिवृत्स्वरम्॥११॥बिभर्तिसांख्यं
योगंचदेवोमकरकुंडले॥मौलिंपदंपारमेष्ठ्यंसर्वलोकाभयंकरम्॥१२॥अव्याकृतमनंताख्यमासनंयदधिष्ठितः॥धर्मज्ञानादिभिर्युक्तंसत्वंपद्ममि
होच्यते॥१३॥ओजःसहोबलयुतंमुख्यतत्वंगदांदधत्॥अपांतत्वंदरवरंतेजस्तत्वंसुदर्शनं॥१४॥नभोनिभंनभस्तत्वमसिंचर्मतमोमयं॥कालरू
पंधनुःशार्ङ्गंतथाकर्ममयेषुधिम्॥१५॥इंद्रियाणिशरानाहुराकूतीरस्यस्यंदनं॥तन्मात्राण्यस्याभिव्यक्तिंमुद्रयार्थक्रियात्मतां॥१६॥
मंडलंदेवयजनंदीक्षासंस्कारआत्मनः॥परिचर्याभगवत

युक्तंमनः॥अस्यरथस्याभिव्यक्तिंबहिरभिव्यक्तंरूपं॥मुद्रयाधृतयाअर्थक्रियात्मतांवरदाभयरूपांबिभर्ति॥तत्तन्मुद्रयातत्तयातथाभावयेदित्यर्थः॥१६॥मंडलंदेवयजनंदेवपूजा
स्थानंमंडलत्वेनभावयेदित्यर्थः॥अंतर्बहिर्मंडलंवा॥दीक्षासंस्कारआत्मनः॥गुरुकृतांमंत्रदीक्षामेवआत्मनसंस्कारंयोग्यतांभावयेदित्यर्थः॥परिचर्येति॥भगवतस्तां
परिचर्यांस्वस्यसकलपापक्षयायएवंरूपांभावयेदित्यर्थः॥१७॥

सर्वमासनपद्ममुक्त्वेदानीं करस्थं पद्ममाह। भगवानिति॥ भगवच्छब्दार्थं ऐश्वर्यादिषाड्गुण्यम्॥१८॥ हे द्विजाः एकवचनांतो वा पाठः॥ अकुतोभयं कैवल्यं धाम गृहं सममभजत॥ यद्वा॥ वैकुंठस्य विशेषणं अकुतोभयं यद्धामेति॥ त्रिवृत् ऋग्यजुःसामरूपो वेदः॥ सुपर्णो गरुत्मान् त्रिवृत्त्वे शिरस्त्वादि मंत्रलिंगात्॥ यज्ञं यज्ञरूपं। यज्ञो वै विष्णुरिति श्रुतेः॥१९॥ अनपायिनी हरेः शक्तिः॥ तत्र हेतुः॥ साक्षादात्मनः स्वस्वरूपस्य चिद्रूपत्वात्तथा आनंदभेदादित्यर्थः॥ तंत्रमूर्तिः पंचरात्राद्यागमरूपः॥ येऽणिमादयोऽष्टौ गुणास्ते

भगवान्भगशब्दार्थं लीलाकमलमुद्वहन्॥ धर्मं यशश्च भगवांश्चामरव्यजनेऽभजत्॥१८॥ आतपत्रं तु वैकुंठं द्विजा धामाकुतोभयम्।
त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पूरुषम्॥१९॥ अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः॥ विष्वक्सेनस्तंत्रमूर्तिर्विदितः पार्षदाधिपः
नंदादयोऽष्टौ द्वाःस्थाश्च तेऽणिमाद्या हरेर्गुणाः॥२०॥ वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयम्॥ अनिरुद्ध इति ब्रह्मन् मूर्तिव्यूहोऽभिधीय
ते॥२१॥ स विश्वस्तैजसः प्राज्ञस्तुरीय इति वृत्तिभिः॥ अर्थेंद्रियाशयज्ञानैर्भगवान्परिभाव्यते॥२२॥ ॥छ॥ ॥रामा॥ ॥छ॥

हरेर्द्वारपाला नंदादयः॥२०॥ तस्यैव चतुर्व्यूहोपासनामाह॥ वासुदेवादिशब्दैः पुरुषः श्रीनारायण एव स्वयं मूर्तिभेदैरूपोऽस्य इत्यभिधीयते॥२१॥ तस्यैवाध्यात्मं च
तुर्व्यूहोपासनमाह॥ स एव भगवान्विश्वादिशब्दैर्वृत्तिभिर्जाग्रदाद्यवस्थाभिः परिभाव्यते॥ तत्र हेतूनुपाधीनाह॥ अर्थाः शब्दाद्याः॥ इंद्रियं मनः॥ आशयस्तदुभयसंस्कारयुक्त
मज्ञानं॥ ज्ञानं चित् एषा क्लृप्तिः॥२२॥

उक्तं चतुर्व्यूहं हृदयोपासनेऽपि सर्वोक्तमंगाद्युपासनमाह ॥ अंगेति ॥ अंगादिभिरुपलक्षितो भगवान्हरिर्वासुदेवादिचतुर्मूर्तिः सन् विश्वादिचतुष्टयं बिभर्ति स्म ॥ विश्वादित्रा
येऽपि तन्नियंतृत्वस्थानजीवत्वमित्याह ॥ विश्वादिचतुष्टयं बिभ्रदपि भगवानीश्वर एवेति ॥ २३ ॥ तस्य ब्रह्मादित्रिमूर्तितामाह ॥ द्विजऋषभेति ॥ स एष एव भगवान्ब्रह्मयोनि
र्वेदस्य कारणमित्यादि हेतुत्रयं ॥ वस्तुतो भेदाभावेऽपि स्वगतमायया सृजति हरति पातीति कृत्वा आख्यया ब्रह्मादिरूपया अनावृताक्षः ॥ अनावृतज्ञानोऽपि विवृत

अंगोपांगायुधाकल्पैर्भगवांस्तच्चतुष्टयं ॥ बिभर्ति स्म चतुर्मूर्तिर्भगवान्हरिरीश्वरः ॥ २३ ॥ द्विजऋषभ स एष ब्रह्मयोनिः स्वयंदृक् स्वम
हिमपरिपूर्णो मायया च स्वयैतत् ॥ सृजति हरति पातीत्याख्ययाऽनावृताक्षो विवृत इव निरुक्तस्तत्परैरात्मलभ्यः ॥ २४ ॥ श्रीकृष्ण
कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनाऽनपवर्गवीर्य ॥ गोविंद गोपवनिताव्रजभृत्यगीततीर्थश्रवः श्रवणमंगल पाहि भृत्या
न् ॥ २५ ॥ य इदं कल्य उत्थाय महापुरुषलक्षणं ॥ तच्चित्तः प्रयतो जप्त्वा ब्रह्म वेद गुहाशयं ॥ ॥ २६ ॥ ॥ ११ ॥ ॥

इव भिन्न इव निरुक्तः शास्त्रेषु न तु भिन्नः ॥ अतो विवृतस्तु भवं प्रमाणयति ॥ यतस्तत्परैरात्मत्वेनैव लभ्यत इति ॥ २४ ॥ यस्येदं रूपामननमुक्तं तं श्रीकृष्णं प्रार्थयते ॥ कृष्णसख अर्जुने
न यस्य सखा वृष्णिश्रेष्ठः अवनिद्रुहो ये राजन्याः तेषां वंशस्य दहन ॥ अनपवर्गं अक्षीणं वीर्यं यस्य ॥ गोपवनितानां व्रजाः सस्नेहाः भृत्या नारदादयः तैर्गीतं तीर्थरूपं श्रवः की
र्तिर्यस्य ॥ श्रवणमेव मंगलं यस्य ॥ २५ ॥ एतज्जपमात्रस्यापि ब्रह्मज्ञानं फलमित्याह ॥ य इति ॥ कल्ये उषःकाले यस्तच्चित्तः प्रयतः सन् विश्वस्य जप्त्वा गुहाशयं हृदिस्थं ब्रह्म प
श्यति ॥ २६ ॥

मंडलं देवयजनमित्युक्तपाद्युद्दिष्टमागतः॥ इदानीं व्यूहप्रसंगेन रविव्यूहो ऽत्र पृच्छ्यते॥२५॥ शुक इति॥ पंचमे पद्याह॥ तथा ऽयोवन्नायपयोगंधर्वो ऽप्सरसो नागा ग्रामण्यो यातुधा
नाः देवा इत्येकैकशो गणाः सप्तेत्यादिना॥ सौरः सूर्यसंबंधी सप्तानां गणः॥२७॥ तेषां सप्तानां॥ अधीश्वरैः तत्तत्पतिभिः॥ तत्तन्मासाधिष्ठातृसूर्यैर्वा॥ व्यूहं विभागं॥२८॥
तत्र तावत् व्यूहं निरूपयितुं प्रथमं सूर्यस्वरूपमाह॥ अनाद्यविद्यया मायया॥ अयं सूर्यः॥ लोकतंत्रः लोकयात्राप्रवर्त्तकः॥२९॥ अतएव क्रियाभेदोपाधिकमेव नाना

॥ ॥शौनक उवाच॥ ॥शुको यदाह भगवान् विष्णुराताय शृण्वते॥ सौरो गणो मासि मासि नाना वसति सप्तकः॥२७॥ तेषां नामानि कर्माणि
संयुक्तानामधीश्वरैः॥ ब्रूहि नः श्रद्दधानानां व्यूहं सूर्यात्मनो हरेः॥२८॥ ॥सूत उवाच॥ ॥अनाद्यविद्यया विष्णोरात्मनः सर्वदेहिनां॥
निर्मितो लोकतंत्रो ऽयं लोकेषु परिवर्त्तते॥२९॥ एक एव हि लोकानां सूर्य आत्मादिकृद्धरिः॥ सर्ववेदक्रियामूलं ऋषिभिर्बहुधोदि
तः॥३०॥ कालो देशः क्रिया कर्त्ता करणं कार्यमागमः॥ द्रव्यं फलमिति ब्रह्मन् नवधोक्तो ऽजया हरिः॥३१॥ ॥

त्वं न स्वतस्त्याह॥ एक एवेति॥ सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतेः॥ जगदात्मा॥ आदिकृत् सृष्टिकर्त्ता॥ हरिरेव सूर्यः॥ स च सर्वासां वेदोक्तक्रियाणां मूलं सन्नेतेनोपाधिना
बहुधोक्तः॥३०॥ कालरूपधारिणो हरेर्द्वादशादित्यरूपभेदं क्रियोपाधिकं दर्शयितुं प्रथमं सर्वकर्मप्रवृत्तये मायाकृतं नवधाभेदमाह॥ काल इति॥ कालः प्रातरादिः
॥देशः समादिः॥ क्रिया अनुष्ठानं कर्त्ता ब्राह्मणादिः॥ करणं स्रुगादि कार्यं यागादि॥ आगमः मंत्रादिः॥ द्रव्यं व्रीह्यादि॥ फलं स्वर्गादि॥३१॥ ॥

तत्र च कालरूपधारी भगवान् पृथक् चरति। मध्वादिषु चैत्रादिषु लोकतंत्राय लोकयात्रानिर्वाहाय॥३२॥ तानेव गणेनाह। धातेति द्वादशभिः। धाता सूर्यः॥ कृतस्थली
अप्सराः हेतिः राक्षसः। वासुकिर्नागः॥ रथकृत् रथयक्षः। पुलस्त्य ऋषिः॥ तुंबुरु गंधर्वः॥ नयंति अश्व चैत्रं नयंति॥ अथौजा यक्षः॥ प्रहेती राक्षसः॥ नारदो गंधर्वः॥ कच्छनीरो ना-

मध्वादिषु द्वादशसु भगवान् कालरूपधृक्। लोकतंत्राय चरति पृथग्द्वादशभिर्गणैः॥३२॥ धाता कृतस्थली हेतिर्वा-
सुकी रथकृन्मुने॥ पुलस्त्यस्तुंबुरुरिति मधुमासं नयंत्यमी॥३३॥ अर्यमा पुलहोऽथौजाः प्रहेतिः पुंजिकस्थली॥ नारदः
कच्छनीरश्च नयंत्येते स्म माधवं॥३४॥ मित्रोऽत्रिः पौरुषेयोऽथ तक्षको मेनका हहाः॥ रथस्वन इति ह्येते शुक्रमासं न-
यंत्यमी॥३५॥ वसिष्ठो वरुणो रंभा सहजन्यस्तथा हुहूः॥ शुक्रश्चित्रस्वनश्चैव शुचिमासं नयंत्यमी॥३६॥ इंद्रो विश्वावसुः श्रो-
ता एलापत्रस्तथांगिराः॥ प्रम्लोचा राक्षसो वर्यो नभोमासं नयंत्यमी॥३७॥ विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः॥ अनुम्लो-
चा शंखपालो नभस्याख्यं नयंत्यमी॥३८॥

गः॥ माधवं वैशाखं॥३४॥ मित्रः सूर्यः॥ पौरुषेयो राक्षसः॥ रथस्वनो यक्षः॥ शुक्रमासं ज्येष्ठं॥३५॥ वरुणः सूर्यः॥ सहजन्यो यक्षः शुक्रो नागः। चित्रस्वनो राक्षसः। शुचिमा-
सं आषाढं॥३६॥ इंद्रः सूर्यः। विश्वावसु गंधर्वः। श्रोता यक्षः॥ एलापत्रो नागः॥ वर्यो राक्षसः इति स्वयमेव व्याख्यातं नभोमासं श्रावणं॥३७॥ विवस्वान् सूर्यः उग्रसेनो
गंधर्वः। व्याघ्रो राक्षसः। आसारणो यक्षः॥ शंखपालो नागः। नभस्याख्यं भाद्रपदं ॥३८॥

धनंजयोनागः वातोराक्षसः॥सुषेणोगंधर्वः॥सुरुचिर्यक्षः॥तपोमाघ्यं॥मासक्रमातिलंघनंकौर्मोक्तादिक्रमानुसारेण॥वैष्णवेतुमासक्रमेणोक्तिः क्वचित्रा
मध्यात्ययस्तुकल्पभेदेनेतिज्ञेयम्॥३७॥ऋतुर्यक्षः वर्चाराक्षसः॥पर्जन्यः सूर्यः सेनजित्॥अप्सराः॥विश्वोगंधर्वः॥ऐरावतोनागः तपस्यारव्यंफाल्गुनम्॥४०॥अं
शुः सूर्यः॥अंशइतिवापाठः॥तार्क्ष्योयक्षः॥शतसेनोगंधर्वः॥विद्युच्छत्रुःराक्षसः॥माहाशंखोनागः सहोमासंमार्गशीर्षं॥४१॥भगः सूर्यः॥स्फूर्जोराक्षसः॥

त्वष्टाधनंजयोवातःसुषेणःसुरुचिस्तथा॥घृताचीगोतमश्चेतितपोमासंनयंत्यमी॥३९॥ऋतुर्वर्चोभरद्वाजःपर्जन्यःसेनजित्त
था।विश्वऐरावतश्चैवतपस्याख्यंनयंत्यमी॥४०॥अथांशुःकश्यपस्तार्क्ष्यःऋतसेनस्तथोर्वशी।विद्युच्छत्रुर्महाशंखःसहोमासं
नयंत्यमी॥४१॥भगःस्फूर्जोरिष्टनेमिरूर्णआयुश्चपंचमः॥कर्कोटकःपूर्वचित्तिःपुष्यमासंनयंत्यमी॥४२॥त्वष्टाऋची
कतनयःकंबलाश्वतिलोत्तमा॥ब्रह्मापेतोथशतजिद्धृतराष्ट्रइषंभराः॥४३॥विष्णुरश्वतरोरंभासूर्यवर्चाश्चसत्यजित्॥
विश्वामित्रोमखापेतऊर्जमासंनयंत्यमी॥४४॥

अरिष्टनेमिर्गंधर्वः॥ऊर्णोयक्षः॥आयुरप्सराः॥कर्कोटकोनागः॥४२॥ऋचीकतनयोजमदग्निः॥कंबलाश्वोनागः॥ब्रह्मापेतोराक्षसः॥शतजिद्यक्षः॥धृ
तराष्ट्रोगंधर्वः॥इषंभराः आश्विनपालकाः॥४३॥विष्णुरादित्यः॥अश्वतरोनागः सूर्यवर्चागंधर्वः सत्यजिद्यक्षः॥मखापेतोराक्षसः॥ऊर्जमासंकार्तिकं॥४४॥

एतेचादित्यारूपः।कौर्मेविमर्ज्येक्ताः॥धातार्यमाचमित्रश्चवरुणश्चेंद्रएवच॥विवस्वानथपूषाचपर्जन्योयंशुरेवच॥भगस्त्वष्टाचविष्णुश्चआदित्याद्वादशस्मृताः॥१॥पुल
स्त्यःपुलहश्चात्रिर्वशिष्ठोथांगिराभृगुः॥गौतमोथभरद्वाजःकश्यपःक्रतुरेवच॥जमदग्निःकौशिकश्चमुनयोब्रह्मवादिनः॥२॥रथकृत्स्नोरिष्टनेमिर्ग्रामणीश्चरथस्वनः
॥रथचित्रस्वनःश्रोतारुणःसेनजित्तथा॥तार्क्ष्यश्चारिष्टनेमिश्चऋतजित्सत्यजित्तथा॥एतेपक्षाःअथहेतिःप्रहेतिःश्चपौरुषेयोवधस्तथा॥वर्योव्याघ्रस्तथापश्चवातः

॥एताभगवतोविष्णोरादित्यस्यविभूतयः॥स्मर
तांसंध्ययोर्नॄणांहरंत्यंहोदिनेदिने॥४॥ कृष्ण॥

विंध्युर्दिवाकरः॥ब्रह्मापेतश्चविप्रेंद्रयज्ञापेतश्चराक्षसः॥वासुकिःकच्छनीरश्चतक्षकःसर्पपुंगवः॥एलापत्रःशंखपालस्तथैरावतसंज्ञितः॥धनंजयोमहापद्मस्तथाकर्को
टकोद्विजाः॥कंबलोश्वतरश्चैववहंत्येवंयथाक्रमम्॥तुंबुरुर्नारदोहाहाहूहूर्विश्वावसुस्तथा॥उग्रसेनोवसुरुचिर्विश्वावसुरथापरः॥चित्रसेनस्तथोर्णायुर्धृतराष्ट्रोद्विजो
त्तमाः॥सूर्यवर्चाद्वादशैतेगंधर्वागायतांवराः॥कृतस्थल्यप्सरोवर्यातथान्यापुंजिकस्थली॥मेनकासहजन्याचप्रम्लोचाचद्विजोत्तमाः॥अनुम्लोचाघृताचीचविश्वाचीचोर्व
चित्तिःस्यादन्याचैवतिलोत्तमाः॥रंभाचेतिद्विजःश्रेष्ठास्तथैवाप्सरसःस्मृताः॥४॥

तेषांपृथक्कर्म्माणिनिरूपयतिद्वादशस्वपीतित्रिभिः॥असौदेवःसूर्यःषड्भिर्गणैर्गंधर्वादिभिः॥अस्यजनस्यसमंताद्वत्सरंशुभंमतिंतनुतेगायत्र्यर्थोऽनेनसूचि
तः॥६॥तल्लिंगैःसूर्यप्रकाशकैः॥४७॥उन्नह्यंतिदृढंवध्नंति॥ग्रामण्योयक्षाः॥नैर्ऋताःराक्षसाः॥४८॥किंच॥वालखिल्याइति॥एतेप्रतिमासंतनएव॥

॥द्वादशस्वपिमासेषुदेवोसौषड्भिरस्यवै॥चरन्समंतात्तनुतेपरत्रेहचसन्मतिम्॥४६॥सामर्ग्यजुर्भिस्तल्लिंगैर्ऋषयःसंस्तु
वंत्यमुं॥गंधर्वास्तंप्रगायंतिनृत्यंत्यप्सरसोग्रतः॥४७॥उन्नह्यंतिरथंनागाग्रामण्योरथयोजकाः॥नोदयंतिरथंपृष्ठेनैर्ऋ
ताबलशालिनः॥४८॥वालखिल्याःसहस्राणिषष्टिर्ब्रह्मर्षयोमलाः॥पुरतोभिमुखंयांतिस्तुवंतिस्तुतिभिर्विभुम्॥४९॥एवंह्य
नादिनिधनोभगवान्हरिरीश्वरः॥कल्पेकल्पेस्वमात्मानंव्यूह्यलोकानवत्यजः॥५०॥ ॥द्वादशस्कंधेएकादशोध्यायः॥ ॥छ॥

विभुंसूर्यं॥४९॥व्यूह्यविभज्य॥५०॥ ॥छ॥ ॥इतिश्रीभागवतेमहापुराणेद्वादशेटीकायामेकादशोध्यायः॥ ॥छ॥ ॥रामकृष्ण॥ ॥ ॥

भा॰द्वा॰
३७

द्वादशीत्तुपुराणोक्तसर्वार्थानुक्रमः कृतः॥ प्रथमस्कंधमारम्यप्राधाद्येनसमासतः॥ तेरेतस्मिन्पुराणोक्तानर्थान्संक्षेपतोवदामि॥ प्राक्धर्म्मादीन्प्रणमति। नमश्च ॥महतेहरिभक्तिलक्षणाय॥ ब्राह्मणेभ्यः ब्राह्मणान्॥ सनातनान्धर्म्मान्निःफलहुणंपुराणोक्तार्थान्॥१॥ पुरुषोत्तमवितंश्रवणादियोग्यं॥२॥ एतत्प्रपंचयति॥ अ वेति॥ भगवान्ऐश्वर्यादिषड्गुणःसाक्षात्संकीर्त्तितःइतिदेवताकांडार्थः॥३॥ ब्रह्मकांडार्थमाह॥ अत्रब्रह्मेति॥ ग्राह्यंनिर्गुणं॥ प्रभवाप्ययं॥ प्रभवंतस्मादितिप्रभवं॥ अप्ये

॥ ॥सूतउवाच॥ ॥नमोधर्मायमहतेनमः कृष्णायवेधसे॥ ब्राह्मणेभ्योनमस्कृत्यधर्मान्वक्ष्येसनातनान्॥१॥ एतद्वः कथितंविप्रावि ष्णोश्चरितमद्भुतं॥ भवद्भिर्यदहंपृष्टोनराणांपुरुषोचितं॥२॥ अत्रसंकीर्त्तितःसाक्षात्सर्वपापहरोहरिः॥ नारायणोहृषीकेशोभगवा न्सात्वतांपतिः॥३॥ अत्रब्रह्मपरंगुह्यंजगतःप्रभवाप्ययं॥ ज्ञानंचतदुपाख्यानंप्रोक्तंविज्ञानसंयुतं॥४॥ भक्तियोगःसमाख्यातोवैराग्यं चतदाश्रयं॥ पारीक्षितमुपाख्यानंनारदाख्यानमेवच॥५॥ प्रायोपवेशोराजर्षेर्विप्रशापात्परीक्षितः॥ शुकस्यचैवब्रह्मर्षेः संवादश्चपरीक्षितः ६

त्यस्मिन्नित्यप्ययं॥ तद्वत्तत्व॥ अनेनाश्रयशब्दार्थोदर्शितः॥ विज्ञानसंयुतंअपरोक्षज्ञानपर्यंतंज्ञानं॥ तदुपाख्यानंतत्तत्ज्ञानमुपाख्यापतेप्रकाश्यतेयेनचततत्ज्ञानसाधन मित्यर्थः॥ कर्म्मकांडार्थमाह॥ भक्तियोगश्च॥ साध्यंधनरूपः॥ तदाश्रयंभक्तियोगेननिष्पादितं॥ एवंसामान्यतोनिरूप्येदानींद्वादशस्कंधप्रकरणार्थानऽनुक्रामति॥ पारीक्षितमुपाख्यानंपरीक्षिज्जन्मादि॥ ततप्रभ्भावायनारदाख्यानंच॥५॥ ब्रह्मर्षेर्बालत्वेननमस्य॥ इतिप्रथमस्कंधार्थः॥६॥ ॥६॥ ॥
सा

राम
३७

उत्क्रांतिरर्चिरादिगतिः प्राश्नानिकः प्रधानकार्यविराड्रूपः॥ अयतः अदितः॥ महदादिक्रमेणोत्पत्तेः॥ इतिद्वितीयार्थः॥३॥ महापुरुषस्य संस्थितिः॥ प्रलयेत्सूक्ष्मीमवस्थानं
॥८॥ प्राकृतिकः प्रकृतिभवो गुणक्षोभरूपः॥ वैकृतिका महदादयः॥ विकाराधिकाराश्रये॥ तयोर्मध्ये पाद्मसर्गः॥९॥ गतिः स्वरूपं॥ उद्धारणं उद्धरणं॥ ॥ अर्द्धाभ्यां नारी
च नरश्च तस्य॥११॥ संतानो धर्मपत्नीनामिति नवब्रह्मसमुत्पत्तिरित्यस्यानंतरं द्रष्टव्यं॥१४॥१३॥ चतुर्थस्कंधार्थमाह॥ नवब्रह्मणां मरीच्यादीनां समुत्पत्तिः संतानः॥१४॥

योगधारणयोत्क्रांतिः संवादो नारदराजयोः॥ अवतारानुगीतं च सर्गः प्राधानिकोऽग्रतः॥७॥ विदुरोद्धवसंवादः क्षत्तृमैत्रेययोस्ततः॥ पुरा
णसंहिताप्रश्नो महापुरुषसंस्थितिः॥८॥ ततः प्राकृतिकः सर्गः सप्त वैकृतिकाश्च ये॥ ततो ब्रह्मांडसंभूतिर्वैराजः पुरुषो यतः॥९॥ का
लस्य स्थूलसूक्ष्मस्य गतिः पद्मसमुद्भवः॥ भुव उद्धारणेंऽभोधौ हिरण्याक्षवधो यथा॥१०॥ ऊर्ध्वतिर्यगवाक्सर्गो रुद्रसर्गस्तथैव च॥ अर्द्ध
नारीनरस्याथ यतः स्वायंभुवो मनुः॥११॥ शतरूपा च या स्त्रीणामाद्या प्रकृतिरुत्तमा॥ संतानो धर्मपत्नीनां कर्दमस्य प्रजापतेः॥१२॥
अवतारो हि देवस्य कपिलस्य महात्मनः॥ देवहूत्याश्च संवादः कपिलेन च धीमता॥१३॥ नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनं॥ ध्रुवस्य
चरितं पश्चात्पृथोः प्राचीनबर्हिषः॥१४॥ नारदस्य च संवादस्ततः प्रैयव्रतं द्विज॥ नाभेस्ततोऽनुचरितमृषभस्य भरतस्य च॥१५॥ ततो द्वी
पसमुद्राद्रिवर्षनद्युपवर्णनं॥ ज्योतिश्चक्रस्य संस्थानं

पंचमस्कंधार्थमाह॥ ततः प्रैयव्रतं प्रियव्रतस्य चरितं॥१५॥ द्वीपाद्युपवर्णनं प्रथमं संक्षेपतः ततो द्वीपादीनां ये गिरयो नद्यश्च तेषामुपवर्णनं॥ पातालनरका
दीनां च स्थितिः॥ अनेनैव नरकनिवर्तकमजामिलोपाख्यानं गृहीतं ततः प्राचीनं॥ ॥१६॥ ॥ ॥७॥ ॥ ॥७॥ ॥७॥ ॥ ॥४॥ ॥ ॥

षष्ठार्थमाह। दक्षजन्मेति॥१७॥ सप्तमार्थमाह॥ पुत्रयोश्चेति॥१८॥ अष्टमार्थमाह। मन्वंतरानुचरितेमिति। कवित्वकाव्यविरक्तिः युक्तमोत्तिश्चम
क्तिरमानुकूलतेनेतिद्वष्टव्यं॥१९॥ नवमार्थमाह॥ राजवंशेति॥२१॥ सोमवंशादि भूतसैलस्यचरितं॥२२॥२३॥२४॥२५॥ तत्स्तत्स्यभीष्मस्य॥२६॥२७॥ दशमा

दक्षजन्मप्रचेतोभ्यस्तत्पुत्रीणांच संततिः। यतो देवासुरनरास्तिर्यङ्नगखगादयः॥१७॥ त्वाष्ट्रस्यजन्मनिधनं पुत्रयोश्च दितेर्द्विजाः। दैत्येश्वरस्य
चरितं प्रह्लादस्य महात्मनः॥१८॥ मन्वंतरानुचरितं गजेंद्रस्य विमोक्षणं॥ मन्वंतरावताराश्च विष्णोर्हयशिरादयः॥१९॥ कौर्म्यं मात्स्यं ना
रसिंहं वामनं च जगत्पतेः॥ क्षीरोदमथनं तद्वदमृतार्थे दिवौकसां॥२०॥ देवासुरं महायुद्धं राजवंशानुकीर्तनं॥ इक्ष्वाकुजन्म तद्वंश
सुद्युम्नस्य महात्मनः॥२१॥ इलोपाख्यानमत्रोक्तं तारोपाख्यानमेव च॥ सूर्यवंशानुकथनं शशादाद्या नृगादयः॥२२॥ सौकन्यं चाथ शर्या
तेः ककुत्स्थस्य च धीमतः॥ खट्वांगस्य च मांधातुः सौभरेः सगरस्य च॥२३॥ रामस्य कोशलेंद्रस्य चरितं किल्बिषापहं। निमेरंगपरित्यागो जन
कानां च संभवः॥२४॥ रामस्य भार्गवेंद्रस्य निःक्षत्रीकरणं भुवः॥ ऐलस्य सोमवंशस्य ययातेर्नहुषस्य च॥२५॥ दौष्यंतेर्भरतस्यापि शंतनो
स्तत्सुतस्य च। ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशानुकीर्तितः॥२६॥ यत्रावतीर्णो भगवान्कृष्णाख्यो जगदीश्वरः॥ वसुदेवगृहे जन्म ततो वृद्धिश्च गो
कुले॥२७॥ तस्य कर्माण्यपाराणि कीर्तितान्यसुरद्विषः॥ पूतनासुपयःपानं शकटोच्चाटनं शिशोः॥२८॥ तृणावर्तस्य निःपेषस्तथैव
बकवत्सयोः॥ धेनुकस्य सहभ्रातुः प्रलंबस्य च संक्षयः २९

र्थमाह॥ तस्यकर्मोशीति। पूतनायाग्रस्तसहितस्यस्तन्यपयसःपानं॥२८॥ ॥सहभ्रातुःसमखस्य॥ २२॥ ॥६॥ ॥६॥ ॥ ॥

॥एकादशास्कंध॥११

॥पुथी माहादेवस्य देसुलत्वं॥

॥ ॥श्रीगणेशायनमः॥ ॥ॐनमःश्रीपरमहंसास्वादितचरणकमलचिन्मकरंदाय॥ भक्तजनमानसनिवासाय श्रीरामचंद्राय॥ विजयंते परानंदकृष्ण
पादरजोभुजः॥ या धृता मूर्ध्नि जायंते महेंद्रादिमहौजसः॥१॥ एकत्रिंशदध्यायैर्भक्तिरेकादशे ततः। जायंते येऽत्र हाद्याये ४ समास व्यासतूपतः। श
नारदो वसुदेवाय समासेनान्ववर्णयत्॥ भगवांश्चोद्धवायाह विस्तरेणोपपत्तिभिः॥३॥ तत्र तु प्रथमेऽध्याये यदुवंशस्य संक्षयः। उपक्षिप्तो विरागाय
मौसलस्य प्रदेशतः॥४॥ प्रवृत्तिः परानंदकृष्णक्रीडानुवर्णिता। तन्निवृत्त्यर्थं परानंदपदारोहोऽनुवर्ण्यते। एवं तावद्दशमस्कंधे भूभारावतारणा
य निजविभूतिविभूषितयदुवंशस्य यदुवंशावतारितसकलसुरांशस्य भगवतः श्रीकृष्णस्य तद्भवितप्रवृत्तिविडंबनेन तच्छ्रवणस्मरणादिपरा
णां परेषामानंदकारणं क्रीडा निरूपिता॥ अथेदानीमुपरमितयोगमायावैभवस्य तस्य नामात्मतत्त्वोपदेशपूर्वकं क्रीडार्थं भूतलेऽवतारितानां
नां चाधिकारिणां सुरांशानां मौशलापदेशेन तत्तदधिकारिपदप्रापणपूर्वकं च ब्रह्माद्यनुग्रहाय निजपदारोहो निरूप्यते। तत्र कुरुक्षेत्रयात्रा
यामविरक्तस्य वसुदेवस्य कर्मणा कर्मनिर्हारो यथा स्यात्तथा संबुध्यतामित्येवं कर्मयोगं पृष्टवतो नारदादिभिः कर्मयोगो निरूपितः। कर्मणा कर्म
निर्हारणं च साधु निरूपितः। पश्चादुद्धवाय त्वविविक्तेन भक्तेनोपेतस्य तत्पंडत्यादिना। तेन च विशुद्धसत्त्वस्य श्रीकृष्णस्य सोऽपरमेश्वरत्वेन ज्ञातवतः स्वकर्म
नयनाध्याये श्रीकृष्णेनात्मतत्त्वमुपदिष्टं॥ वचो वः समवेतार्थं तातैतदुपधार्य मे। यन्नः स्वाचारस्य दिश्यते तत्त्वग्राम उदाहृतः॥ ॥ ॥श्रीराम॥ ॥

नत्वत एव हंतव्यस्तत्राह। एतदर्थ इति। एतच्छब्दार्थं स्पष्टयति। भूभारहरणायेति॥ ९ अयमेतदर्थोऽवतार इत्युपलक्षणमित्याह। अन्योपीति प्रभवतः उद्भवतः॥ १० ससूतौ सारथिसहितौ परिच्छदः परिकरः ध्वजकवचादिः तत्सहितौ॥ ११ त्वं अवतां रक्षकानां यदूनां त्वावतां तेषां॥ १३ दंशितौ बद्धकवचौ स्वायुधाढ्यौ शोभनायुधसंपन्नौ॥ १६ पुरुषाधम

एतदर्थोऽवतारोऽयं भूभारहरणाय मे। संरक्षणाय साधूनां कृतोऽन्येषां वधाय च॥ ९ अन्योऽपि धर्मरक्षायै देहः संध्रियते मया। विरामायाप्यधर्मस्य काले प्रभवतः क्वचित्॥ १० एवं ध्यायति गोविंद आकाशात्सूर्यवर्चसौ। रथावुपस्थितौ सद्यः ससूतौ सपरिच्छदौ॥ ११ आयुधानि च दिव्यानि पुराणानि यदृच्छया। दृष्ट्वा तानि हृषीकेशः संकर्षणमथाब्रवीत्॥ १२ पश्यार्य व्यसनं प्राप्तं यदूनां त्वावतां प्रभो। एष ते रथ आयातो दयितान्यायुधानि च॥ १३ यानमास्थाय जह्येतद्व्यसनात्स्वान्समुद्धर। एतदर्थं हि नौ जन्म साधूनामीश शर्मकृत्॥ १४ त्रयोविंशत्यनीकाख्यं भूमेर्भारमपाकुरु। एवं संमंत्र्य दाशार्हौ दंशितौ रथिनौ पुरात्॥ १५ निर्जग्मतुः स्वायुधाढ्यौ बलेनाल्पीयसावृतौ। शंखं दध्मौ विनिर्गत्य हरिर्दारुकसारथिः॥ १६ ततोऽभूत्परसैन्यानां हृदि वित्रासवेपथुः। तावाह मागधो वीक्ष्य हे कृष्ण पुरुषाधम॥ १७ न त्वया योद्धुमिच्छामि बालेनैकेन लज्जया। गुप्तेन हि त्वया मंद न योत्स्ये याहि बंधुहन्॥ १८ तव राम यदि श्रद्धा युध्यस्व धैर्यमुद्वह। हित्वा वा मच्छरैश्छिन्नं देहं स्वर्याहि मां जहि॥ १९ ॥ श्रीभगवानुवाच॥ ॥ नैव शूरा विकत्थंते दर्शयंत्येव पौरुषं॥ न गृह्णीमो वचो राजन्नातुरस्य मुमूर्षतः॥ २०॥

यस्मादिति वा तत्र वोर्थः हे पुरुषोत्तमेति॥ १७ गुप्तेन संवीतरत्वात् दर्शनानर्हेण हे मंद बध्नातीति बंधुः रविद्यातां हंतीति तथा हे अविद्यानिरसनेति या हि प्राप्नुहि॥ १८ अच्छेद्यदेहोसावितिस्वयमेवमत्वा परितोषात्पक्षांतरमाह। यद्वा मां जहीति॥ १९ यथाश्रुतार्थग्रहणेन भगवत उत्तरं नवै शूरा विकत्थंते श्लाघंते॥ २०॥

माधवौमधुवंशसवौमहतासैन्यसमूहेनाच्छतवान्‌।वायुरभ्रैःसूर्यरेणुभिर्यथेत्यदर्शनमात्रमेवावरणमितिसूचितं २१ २२ परस्थानीकानिसैन्यानितान्येवपयोमुचोमे
घास्तेषांशिलीमुखावाणाःतेषामस्तुल्वणंवर्षतेनपीडितं।अथस्फूर्जयन्‌उज्जृंभितवान्‌ २३ तदाहगृह्णन्निति।निषंगादिषुधेःशरान्‌गृह्णन्‌अथतान्‌गुणेसंदधन्‌गुणमाकृ
ष्यनिशितवाणसमूहान्‌मुंचन्‌।निघ्नन्‌प्रहरन्‌।पत्तिःपदातिःनिरंतरमितिग्रहणादिक्रियाविशेषणं।अलातंकाष्ठभ्रमणेयथाचक्रवद्भवति।तद्वद्यस्फूर्जयदिति २४

जरासुतस्तावसिसृत्यमाधवौमहावलौघेनवलीयसावृणोत्‌।ससैन्ययानध्वजवाजिसारथीसूर्यानिलौवायुरिवाभ्ररेणुभिः २१ सुपर्णता
लध्वजचिह्नितौरथावलक्ष्ययन्तौहरिरामयोर्मृधे॥स्थिताःपुराट्टालकहर्म्यगोपुरंसमाश्रिताःसंमुमुहुःशुचार्दिताः २२ हरिःपरानीकप
योमुचांमुहुःशिलीमुखात्युल्वणवर्षपीडितं।स्वसैन्यमालोक्यसुरासुरार्चितंव्यस्फूर्जयतशार्ङ्गशरासनोत्तमं २३ गृह्णन्निषंगादथसंद
धन्शरान्विकृष्यमुंचन्शितवाणपूगान्‌।निघ्नन्रथान्कुंजरवाजिपत्तीन्निरंतरंयद्वदलातचक्रं २४ निर्भिन्नकुंभाःकरिणोनिपेतुरनीक
शोश्वाःशरवृक्णकंधराः।रथाहताश्वध्वजसूतनायकाःपदातयःछिन्नभुजोरुकंधराः २५ संछिद्यमानद्विपदेभवाजिनामंगप्रसूताःशतशो
सृगापगाःभुजाहयःपूरुषशीर्षकच्छपाहतद्विपद्वीपहयग्रहाकुला: २६

हताःअश्वाःध्वजाःसूताःनायकाःरथिनश्चयेषुते २५ संछिद्यमानाद्विपदाइभावाजिनश्चतेषामंगेभ्यःप्रसूताअसृगापगारुधिरनद्यः।परस्परंप्रवर्त्तिताइतिरती
येनान्वयः।प्रसिद्धनदीरूपकमाह।भुजाएवअहयोयासुताः।पुरुषाणांशीर्षाण्येवकच्छपायासुताः।हताद्विपाएवद्वीपाअंतर्वर्त्तितटानिहयाएवग्रहायाहाभिस्ता
कुलाव्याप्ताः २६

कराउरवश्चमीनायासुताः।नराणांकेशाएवशैवलंयस्याःसुताः।धनूंषेवतरंगाआयुधान्येवगुल्माःतैश्चसंकुलाः।असृक्रिकाश्चर्मीणिवक्राणिवातान्येवावर्त्ताःतैरसयान
काः।महामणीनांप्रवेकाउत्तमाःआसरणानिचयथायथंअश्मानःशर्कराश्चयासुताःसीरूणांसयावहाःमनस्विनांहर्षकर्य्यः॥२७॥किंचासंकर्षणेनापितद्बलंक्ष
यंप्रणीतं॥२८॥अंगहेराजन्नर्णववत्दुर्गंदुर्गमंसैरवंसयंकरंयतःदुरंतपारं।अंतोअत्रतलंपारमवधिःदुःशद्वोनिषेधेविक्रमेणागाधंदेशतश्चनिरवधिकमित्य

करोत्तुमीनानरकेशशैवलाधनुस्तरंगायुधगुल्मसंकुला।असृक्रिकावर्त्तसयानकामहामणिप्रवेकास्तरणाश्मशर्करा॥२७॥प्रवर्त्तितः।
सीरुणयावहाश्च्युधेमनस्विनांहर्षकरीःपरस्परं।विनिघ्नताऽरीन्मुशलेनदुर्मदात्संकर्षणेनापरिमेयतेजसा॥२८॥वलंतदंगार्णववद्दुर्गसैर
वंदुरंतपारंमगधेंद्रपालितं।क्षयंप्रणीतंवसुदेवपुत्रयोर्विक्रीडितंतज्जगदीशयोःपरं॥२९॥स्थितिफइवांतंभुवनत्रयस्यःसमीहतेऽनंत
गुणःस्वलीलया।नतच्चचित्रंपरपक्षनिग्रहस्तथाऽपिमर्त्यानुविधस्यवर्ण्यते॥३०॥जग्राहविरथंरामोजरासंधंमहाबलं।हतानीकाव
शिष्टासुंसिंहःसिंहमिवौजसा॥३१॥वध्यमानंहतारातिंपाशैर्वारुणमानुषैः।वारयामासगोविंदस्तेनकार्यचिकीर्षया॥३२॥समु
क्तोलोकनाथाभ्यांव्रीडितोवीरसंमतः।तपसेकृतसंकल्पोवारितःपथिराजभिः॥३३॥

र्थः।किंच।मगधेंद्रेणचपालितं।यदेवंभूतंरामकृष्णयोःकर्मोक्तितत्परंकेवलंतयोर्विक्रीडितंनतुपराक्रमः॥२९॥नचैतदाश्चर्यमित्याह।स्थित्युद्भवांतमिति।त
र्हिकिमित्याश्चर्यमिववर्णितं।तत्राह।तथापीति।मर्त्याननुविधत्तेअनुकरोतीतिमर्त्यानुविधस्तस्य॥३०॥किंचाजग्राहेति॥३१॥हतान्यनीकानियस्यअवशिष्टाश्च
सवएवयस्यतंवतंचा।हतावक्षुशःअरातयोयेनतथाभूतमपिजरासंधंवध्यमानंवारयामासेति॥३२॥

पवित्रार्थानिधर्मोपदेशपराणिपदानियेषुतैर्वाक्यैः नयनैर्नीतिभिः । शास्त्रैर्लौकिकैः । तत्रलौकिकन्यायमाह । स्वकर्मेति । यदुभिरल्पकैः कृत्वातेमहतः परा
भवः । केवलंकर्मबंधेनप्राप्तः अतस्त्वयानलज्जितव्यमिति ॥ ३४ बार्हद्रथोजरासंधः ॥ ३५ मुकुंदोऽपियथावित्यनुषंगः । नकृतंवलंयस्य सः । तथैवाकृतदर्पात्कृत
घतिसंधनादितिभावः । निस्तीर्णः अनायासेनैवतीर्णोऽखिलार्णवोयेन । साधुसाध्वित्यनुमोदितश्च ॥ ३६ तस्तुयतैर्मथुरावासिभिः । जनैरभिसंगम्यमिलित्वा ॥ ३७

वाक्यैः पवित्रार्थपदैर्नयनैः शास्त्रैरपि । स्वकर्मबंधप्राप्तोयं यदुभिस्तेपराभवः ॥ ३४ हतेषुसर्वानीकेषुनृपतिर्बार्हद्रथः । उपेक्षितोभगवता
मगधान्दुर्मनाययौ ॥ ३५ मुकुंदोप्यकृतवलोनिस्तीर्णाखिलार्णवः । विकीर्यमाणः कुसुमैस्त्रिदशैरनुमोदितः ॥ ३६ माथुरैरुपसं
गम्यविज्वरैर्मुदितात्मभिः । उपगीयमानविजयः सूतमागधवंदिभिः ॥ ३७ शंखदुंदुभयोनेदुर्भेरीतूर्याण्यनेकशः । वीणावेणुमृदंगानि ।
पुरंप्रविशतिप्रभौ ॥ ३८ सिक्तमार्गांहृष्टजनांपताकाभिरलंकृतां । निर्घुष्टांब्रह्मघोषेणकौतुकाबद्धतोरणां ॥ ३९ विकीर्यमा
णोनारीभिर्माल्यदध्यक्षतांकुरैः । निरीक्ष्यमाणः सस्नेहंप्रीत्युत्कलितलोचनैः ॥ ४० आयोधनगतंवित्तमनंतंवीरभूषणं । यदुराजायत
त्सर्वमाहृतंप्रादिशत्प्रभुः ॥ ४१ एवंसप्तदशकृत्वस्तावत्यक्षौहिणीवलः । युयुधेमागधोराजायदुभिः कृष्णपालितैः ॥ ४२ ॥

तदाचप्रभौपुरंप्रविशति । शंखादयोनेदुः ॥ ३८ कथंभूतांपुरीतदाह सिक्तमार्गामिति । ब्रह्मघोषेणवेदघोषेणनिर्घुष्टांनिनादितां । कौतुकेनउत्सवेनआ
सर्वतोबद्धानितोरणानियस्यांतां ॥ ३९ निवीयमानः विकीर्यमाणः प्रविवेशेतिविपरिणतानुषंगः ॥ ४० आयोधनंरणभूमिस्तत्रस्थंवित्तंवीराणांभूषणं
४१ तावतिरितिच्छेदः । तावतिपराजयेवर्त्तमानेपिअक्षौहिणीवलंयस्य सः । सप्तदशकृत्वः सप्तदशवारान्युयुधे ॥ ४२ ॥

अक्षिण्वन्क्षयंनिन्युः ॥ ४३ ॥ अष्टादशेसंग्रामेसाध्येतन्मध्येअकस्मात्कालयवनःप्राप्तः ॥ ४४ ॥ आत्मसंमितान्स्वतुल्यान् ॥ ४५ ॥ वृजिनंदुःखंउभयतःयवनात्जरासंधाच्च ॥ ४६ ॥
तदाहद्वयेननिरुंधेनिरुणद्धि ॥ ४७ ॥ अस्यअनेन ॥ ४८ ॥ समुद्रमध्येदुर्गंतन्मध्येनगरंकृत्स्नाद्भुतंसर्वाश्चर्यमयंअचीकरत्कारयामास ॥ ४९ ॥ त्वष्टाविश्वकर्मातदीयंशिल्पनैपुण्यंचक्रि
याकौशलं।तदाहसार्द्धैस्त्रिभिः।रथ्येति।रथ्याराजमार्गाःपुरतःवीथ्यःउपमार्गाःपश्चिमतःउभयतोपिचत्वराणिअंगणानि।तन्मध्येकोष्ठाःततोप्यंतःसुवर्णभवनानि।तदुपरिस्फाटिका

अक्षिण्वन्तद्बलंसर्वंवृष्णयःकृष्णतेजसा।हतेषुतेष्वनीकेषुत्यक्तोयात्यऽरिभिर्नृप ॥ ४३ ॥ अष्टादशमसंग्रामआगामिनितदंतरा।नारदप्रेषितोवीरो
यवनःप्रत्यदृश्यत ॥ ४४ ॥ रुरोधमथुरामेत्यतिसृभिर्म्लेच्छकोटिभिः।नृलोकेचाप्रतिद्वंद्वोवृष्णीन्श्रुत्वात्मसंमितान् ॥ ४५ ॥ तंदृष्ट्वाऽचिंतयत्कृष्णःसं
कर्षणसहायवान्।अहोयदूनांवृजिनंप्राप्तंह्युभयतोमहत् ॥ ४६ ॥ यवनोयंनिरुंधेस्मानद्यतावन्महाबलः।मागधोऽप्यद्यवाश्वोवाऽपरश्वोवाग
मिष्यति ॥ ४७ ॥ आवयोर्युध्यतोरस्ययद्याऽगंताजरासुतः।बंधून्वधिष्यत्यथवानेष्यतेस्वपुरंबली ॥ ४८ ॥ तस्मादद्यविधास्यामोदुर्गंद्विपददुर्गमं।
तत्रज्ञातीन्समाधाययवनंघातयामहे ॥ ४९ ॥ इतिसंमंत्र्यभगवान्दुर्गंद्वादशयोजनं।अंतःसमुद्रेनगरंकृत्स्नाद्भुतमचीकरत् ॥ ५० ॥ दृश्यतेय
त्रहित्वाष्ट्रंविज्ञानंशिल्पनैपुणं।रथ्याचत्वरवीथीभिर्यथावास्तुविनिर्मितं ॥ ५१ ॥ सुरद्रुमलतोद्यानविचित्रोपवनान्वितं।हेमशृंगैर्दिविस्पृग्भिः
स्फटिकाट्टालगोपुरैः ॥ ५२ ॥

ट्टालिकाः।तदुपरिहेमकुंभाइतिबहुभूमिकं।यथावास्तुवास्तुशास्त्रेगृहादिनिर्माणस्थानंतमनतिक्रम्यविनिर्मितं।सुराणांद्रुमालताश्चयेषुतान्युद्यानानिविचित्रोपवनानिचतै
रन्वितं।हेममयानिशृंगाणियेषांतैःदिविस्पृग्भिःअत्युच्चैःस्फटिकाअट्टालाउपरिभूमिकाः।गोपुराणिपुरद्वाराणितैर्निर्मितमित्युत्तरेणान्वयः ॥ ५२ ॥

द०उ०
४

राजतारकूटैः रजतं चआरकूटं च पीतलोहं ताभ्यां निर्मितैः कोष्ठैः अश्वशालान्नशालादिभिः। कथंभूतैः हेमकुंभैरलंकृतैः तथा रत्नकूटैः पद्मरागादिः शिखरैः। हैमैः सौवर्णैः महा मरकतमयानि स्थलानि येषु तैः गृहैश्च॥ ५३ किंचा नगरगृहादौ वास्तोष्पतीनां च गृहैः वलभीभिश्च इशालिकाभिश्च निर्मितं। यद्वा देवगृहैः राजगृहैः तुल्लसत्क्षोभमानं॥ ५४ पारिजा तं च प्राहिणोत्। प्रस्थापयामास। इति शुकपरीक्षित्संवादात्पूर्वसाविलात् भूतनिर्देशः। मर्त्यधर्मैः क्षुत्पिपासादिषडूर्मिभिः॥ ५५ निधिपतिः कुवेरः। अष्टौ कोशाः निधीः च। पद्म

राजतारकूटैः कोष्ठैर्हेमकुंभैरलंकृतैः। रत्नकूटैर्गृहैर्हेमैर्महामरकतस्थलैः॥ ५३ वास्तोष्पतीनां च गृहैर्वलभीभिश्च निर्मितं। चातुर्वर्ण्यजनाकीर्णं यदुदेव गृहैर्लसत्॥ ५४ सुधर्मां पारिजातं च महेंद्रः प्राहिणोद्धरेः। यत्र चावस्थितो मर्त्यो मर्त्यधर्मैर्न युज्यते॥ ५५ श्यामैककर्णान्वरुणो हयान्शुक्लान् मनोजवान्। अष्टौ निधिपतिः कोशान्लोकपालो निजोदयान्॥ ५६ यद्यद्भगवता दत्तमाधिपत्यं स्वसिद्धये॥ सर्वं प्रत्यर्पयामासुर्हरौ भूमिगतो नृ प॥ ५७ तत्र योगप्रभावेन नीत्वा सर्वजनं हरिः। प्रजापालेन रामेण कृष्णः समनुमंत्रितः॥ ५८ ॥ निर्जगाम पुरद्वारात्पद्ममाली निरायुधः॥ ॥

इति श्रीभागवते महापुराणे दशमस्कंधे दुर्गनिवेशनं नाम पंचाशत्तमोऽध्यायः॥ ॥ ॥ ॥

शैव महापद्मो मत्स्यकूर्मौ वर्चोदकः। नीलो मुकुंदः शंखश्च निधयो ऽष्टौ प्रकीर्त्तिताः इति। अस्मिन्नान् निजोदयान् इति निजविभूतीः॥ ५६ अन्ये च सिद्धादयो भगवता स्वावि कारसिद्धये यद्यदाधिपत्यं दत्तमासीत् तत्सर्वं प्रत्यर्पयामासुरिति॥ ५७ यथा कालयवनो न वेत्ति न च वासौ जनः। तथा योगप्रभावेन नीत्वा। त्वमत्र स्थित्वा प्रजाः पालय अत्र अहं पलायिष्ये इति समनुमंत्रितः। कृतानुमंत्रः इत्यर्थः॥ ५८ ॥ इति दशमे पंचाशत्तमोऽध्यायः॥ ॥ राम॥ ॥ राम॥ ॥ राम॥ ॥ ॥ , ॥

राम
४

एकपंचाशत्तमेः हन्मुचुकुंदद्दशाहरिः। यवनंमुचुकुंदेनक्षतःसन्नचकंपत १ यवनेंद्रसुताकालयवनाद्यदुस्रीघाणात् हरिहरगिरा श्वैरंपालनायपलायत २ यदागार्ग्यःश्या
लेनषंढइत्युक्तःस्वदायादवैतुपहसितेक्रुद्धोऽसौश्रीमहेशंप्रसाद्ययदुस्रीघणंउत्रंलब्धवान्। ततश्चयवनेंद्रेणाअपुत्रेणस्वक्षेत्रेपुत्रोत्पादनायप्रार्थितोगार्ग्यःकालयवनमजीजन

श्रीशुकउवाच ॥ तंविलोक्यविनिःक्रांतमुज्जिहानमिवोडुपं। दर्शनीयतमंलोकेपीतकौशेयवाससं ॥ १ श्रीवत्सवक्षसंभ्राजत्कौस्तुभामु
क्तकंधरं। पृथुदीर्घचतुर्बाहुंनवकंजारुणेक्षणं ॥ २ नित्यप्रमुदितंश्रीमत्सुकपोलंशुचिस्मितं। मुखारविंदंबिभ्राणंस्फुरन्मकरकुंडलं ॥ ३
वासुदेवोह्ययमितिपुमान्श्रीवत्सलांछनः। चतुर्भुजोऽरविंदाक्षोवनमाल्यतिसुंदरः ॥ ३ लक्षणैर्नारदप्रोक्तैर्नान्योभवितुमर्हति। निरायु
धःचलन्पद्भ्यांयोत्स्येनेनानिरायुधः ॥ ४ इतिनिश्चित्ययवनःप्राद्रवंतंपराङ्मुखं। अन्वधावज्जिघृक्षुस्तंदुरापमपियोगिनां ॥ ५ हस्तप्राप्त
मिवात्मानंहरिणासपदेपदे॥ नीतोदर्शयतादूरंयवनेशोऽद्रिकंदरां ॥ ६ पलायनंयदुकुलेजातस्यतवनोचितं॥ इतिक्षिपन्ननुगतोनैनं
प्रापाहताशुभः ॥ ७ एवंक्षिप्तोऽपिभगवान्प्राविशद्गिरिकंदरां। सोपिप्रविष्टस्तत्रान्यंशयानंददृशेनरं। नन्वसौदूरमानीयशेतेमामिहसाधु
वत् ॥ ॥

दितिपुराणप्रसिद्धं। पुरद्वाराद्विनिःक्रांतां उज्जिहानंउद्गच्छंतं १ नित्यप्रमुदितमित्यादिमुखारविंदविशेषणं ॥ ३ नारदोक्तैरेतैर्लक्षणैरयंपुमान्वासुदेवएवनान्यो
भवितुमर्हति। अयंचनिरायुधःअतोऽनेनपद्भ्यामेवचलन्निरायुधोऽहंयोत्स्यामीतिनिश्चित्यतंपराङ्मुखंप्राद्रवंतमन्वधावदित्यन्वयः ॥ ५ आत्मानंहस्तप्राप्तमिव
दर्शयतादूरंनीतइत्यन्वयः। अहताशुभःअक्षीणकर्मा ॥ ॥

तंशयानं च्युतंमत्वा अताडयदिति ॥ १० ॥ तस्यक्षुद्रस्य दृष्टिपातेनदीप्तेनायःस्वदेहजोऽग्निस्तेन यवनमर्दयतितिहिनस्थितइतितथा ॥ ११ ॥ सकस्यवंशः किंवीर्यः कीदृक्प्रभाववान् किंतेजः कस्यवीर्यंपुत्रइत्यर्थः ॥ शिश्ये अशयिष्ट ॥ १२ ॥ सत्यः संगरो युद्धं प्रतिज्ञावायस्य सः ॥ १३ ॥ गुहं कार्तिकेयं स्वःपालं स्वर्गपालकं सेनान्यं ॥ १४ ॥ उज्झिता प्राप्ता आगता इत्यर्थः

इति मत्वाऽच्युतं मूढस्तं पदा समताडयत् ॥ स उत्थाय चिरं सुप्तः शनैरुन्मील्य लोचने ॥ दिशो विलोकयन् पार्श्वे तमद्राक्षीदवस्थितं ॥ १० ॥ स तावत्तस्य रुष्टस्य दृष्टिपातेन भारत ॥ देहजेनाग्निना दग्धो भस्मसादभवत्क्षणात् ॥ ११ ॥ राजोवाच ॥ को नाम स पुमान् ब्रह्मन् कस्य किंवीर्य एव च ॥ कस्माद्गुहां गतः शिश्ये किंतेजो यवनार्दनः ॥ १२ ॥ श्रीशुक उवाच ॥ स इक्ष्वाकुकुले जातो मांधातृतनयो महान् ॥ मुचुकुंद इति ख्यातो ब्रह्मण्यः सत्यसंगरः ॥ १३ ॥ स याचितः सुरगणैरिंद्राद्यैरात्मरक्षणे ॥ असुरेभ्यः परित्रस्तैस्तद्रक्षां सोऽकरोच्चिरं ॥ १३ ॥ लब्ध्वा गुहं ते स्वःपालं मुचुकुंदमथाऽब्रुवन् ॥ राजन्विरमतां कृच्छ्राद्भवान्नः परिपालनात् ॥ १४ ॥ नरलोकं परित्यज्य राज्यं निहतकंटकं ॥ अस्मान् पालयतो वीर कामास्ते सर्व उज्झिताः ॥ १५ ॥ सुता महिष्यो भवतो ज्ञातयोऽमात्यमंत्रिणः ॥ प्रजाश्च तुल्यकालीना नाधुना संति कालिताः ॥ १६ ॥ कालो बलीयान् बलिनां भगवानीश्वरोऽव्ययः ॥ प्रजाः कालयते क्रीडन् पशुपालो यथा पशून् ॥ १७ ॥ वरं वृणीष्व भद्रं ते ऋते कैवल्यमद्य नः ॥ एक एवेश्वरस्तस्य भगवान् विष्णुरव्ययः ॥ १८ ॥

१५ किंचसुता इति तुल्यकालीनाः त्वत्समानकालीनाः कालिताः विचालिताः ॥ १६ ॥ सत्प्रजाः कोऽन्यः कालयेदिति चेत्तत्राह ॥ कालइति कालयते इतस्ततश्चालयति ॥ १७ ॥ तस्य कैवल्यस्य ॥ १८ ॥ ॥

गुहायांप्रविष्टःशेतेस्म १८ धर्षितः। अभिभूतः। इद्धर्षअधृष्यं २४ विपिनेअरण्येतत्रापिगिरिगह्वरेदुःप्रवेशस्थाने। तत्रापिउत्कंटकेपद्मपलाशसदृशाभ्यां। विचरसीति

एवमुक्तःसवैदेवानभिवंद्यमहायशाः। अशयिष्टगुहाविष्टोनिद्रयादेवदत्तया ॥१८॥ स्वपन्तंयस्तुमध्येवैबोधयेत्त्वामचेतनः। सत्वयादृष्टमात्रस्तु भस्मीभवतुतत्क्षणात् ॥१९॥ यवनेभस्मसान्नीतेभगवान्सात्वतर्षभः। आत्मानंदर्शयामासमुचुकुंदायधीमते ॥२०॥ तमालोक्यघनश्यामंपीतकौशेयवाससं। श्रीवत्सवक्षसंभ्राजत्कौस्तुभेनविराजितं ॥२१॥ चतुर्भुजंरोचमानंवैजयंत्याचमालया। चारुप्रसन्नवदनंस्फुरन्मकरकुंडलं ॥२२॥ प्रेक्षणीयंनृलोकस्यसानुरागस्मितेक्षणं। अपीच्यवयसंमत्तमृगेंद्रोदारविक्रमं ॥२३॥ पर्यपृच्छन्महाबुद्धिस्तेजसातस्यधर्षितः। शंकितःशनकै राजादुर्धर्षमिवतेजसा ॥२४॥ ॥मुचुकुंदउवाच॥ ॥कोभवानिहसंप्राप्तोविपिनेगिरिगह्वरे। पद्भ्यांपद्मपलाशाभ्यांविचरस्युरुकंटके ॥२५॥ किंस्वित्तेजस्विनांतेजोभगवान्वाविभावसुः। सूर्यःसोमोमहेंद्रोवालोकपालोऽपरोपिवा ॥२६॥ मन्येत्वांदेवदेवानांत्रयाणांपुरुषर्षभं। यद्बाधसेगुहाध्वांतंप्रदीपःप्रभयायथा ॥२७॥ शुश्रूषतामव्यलीकमस्माकंनरपुंगव। स्वजन्मकर्मगोत्रंवाकथ्यतांयदिरोचते ॥२८॥ वयंतुपुरुषव्याघ्र ऐक्ष्वाकाःक्षत्रबंधवः। मुचुकुंदइतिप्रोक्तोयौवनाश्वात्मजःप्रभो। चिरप्रजागरश्रांतोनिद्रयोपहतेंद्रियः। शयेऽस्मिन्विजनेकाममकेनाप्युद्बोधितोऽधुना ॥३०॥ सोपिभस्मीकृतोनूनमात्मीयेनैवपाप्मना। अनंतरंभवान्श्रीमान्लक्षितोऽमित्रशातन ॥३१॥ तेजसातेविषह्येणभूरिद्रष्टुं नशक्नुमः। हतौजसोमहाभागमाननीयोऽसिदेहिनां ॥३२॥ एवंसंभाषितोराज्ञाभगवान्भूतभावनः। प्रत्याहप्रहसन्वाण्यामेघनादगंभीर या ॥३३॥

२५ तेजःस्विनांप्रभावोदीप्तिर्वा २६ सर्वथापरितोषादहमन्यइति पुरुषर्षभंश्रीविष्णुं गुहाध्वांतंअंधतमः २७ प वयंक्षत्रियवंश्याइतिप्रायेएकवचनंतेनअहंमुचु कुंदइतिप्रोक्तइतियौवनाश्वोमांधाताऽपिता ॥३३॥

कचित्कदाचित्कश्चित्पिपरिजंास्यपिविमममेगणितवान् तथापिनजन्मानिकर्माणिविमिमीते ३५ तेतिममचक्रुषानिमित्तेनमयैवदग्धः ३९ अप्रर्णोहमितिशोचितुं। यद्वाग्रयैर्दत्तेषुवरेषुक्षीणेषुयथाशोचतिनैवमांप्रपन्नः।मदत्तवराणांअक्षयत्वादितिभावः ४१ अष्टाविंशतिमेयुगेभगवानवतरिष्यतीतिवृद्धगर्गवाक्यमनुस्म

श्रीभगवानुवाच॥ ॥जन्मकर्माभिधानानिसन्तिमेंगसहस्रशः।नशक्यंतेऽनुसंख्यातुमनंतत्वान्मयापिहि ३४ क्वचिद्रजांसिविममे पार्थिवान्युरुजन्मभिः।गुणकर्माभिधानानिनमेजन्मानिकर्हिचित् ३५ कालत्रयोपपन्नानिजन्मकर्माणिमेनृप।अनुक्रमन्तोनैवान्तंग च्छन्तिपरमर्षयः॥३६ तथाप्यद्यतनान्यंगशृणुष्वगदतोमम।विज्ञापितोविरंच्येनपुराहंधर्मगुप्तये ३७ भूमेर्भारायमाणानामसुराणां क्षयायच।अवतीर्णोयदुकुलेगृहआनकदुंदुभेः॥३८ वदंतिवासुदेवेतिवसुदेवसुतंहिमां।कालनेमिर्हतःकंसःप्रलंबाद्याश्चसद्द्विषः ३९ अयंचयवनोदग्धोराजंस्तेतिग्मचक्षुषा।सोऽहंतवानुग्रहार्थंगुहामेतामुपागतः॥४० प्रार्थितःप्रचुरंपूर्वंत्वयाहंभक्तवत्सलः।वरा न्वृणीष्वराजर्षेसर्वान्कामान्ददामिते।मांप्रपन्नोजनःकश्चित्नभूयोर्हतिशोचितुं ४१ श्रीशुकउवाच इत्युक्तस्तंप्रणम्याहमुचुकुं दोमुदान्वितः।ज्ञात्वानारायणंदेवंगर्गवाक्यमनुस्मरन् ४२ मुचुकुंदउ॥ ॥विमोहितोयंजनईशमाययात्वदीययात्वांनभजत्यनर्थदृक्। सुखायदुःखप्रभवेषुसज्जतेगृहेषुयोषित्पुरुषश्चवंचितः ४३

रन्नित्यर्थः ४२ त्वद्भक्तिरेवकेवलंदुर्लभाकामास्तुतुच्छानवरणीयाइत्याशयेनअस क्तानांसंसारमष्टभिःप्रपंचयन्स्तौति।विमोहितइति।हेईशयोषित्चपुरुषश्चेतिद्विविधोप्ययंजनस्त्वदीययामाययाविमोहितः।अतअनर्थदृक्अर्थंपरमार्थंसुखंज्ञान पश्यतीतितथाअतस्त्वांनभजति।किंतुपरस्परंवंचितःसन्सुखेच्छयादुःखानामेवप्रभवोयेषुतेषुगृहेष्वेवसज्जतइति ४२ ॥राम॥ ॥राम॥ ॥राम॥ ॥

किंवा कामसुखं शूकरादिष्वपि संभवति। भगवद्भजनं न मानुषव्यतिरेकेणेति मानुषत्वं प्राप्य त्वामभजन्नतिमूढ इत्याह। लब्ध्वेति। अत्र कर्मभूमौ अव्यंगं अविकलांगं। किं
वा असति विषयसुखे मतिर्यस्य सः। गृहमेवांधकूपस्तस्मिन्पतितः। यथा पशुस्तृणलुब्धोंऽधकूपे पततीति। ४४। न केवलमन्यजनस्यैवेयं गतिः किंतु ममापि तथैवेत्याह।
ममेति। मर्त्यशरीरे आत्मबुद्धिर्यस्य तस्य मम। अतएव सुतादिषु आसज्जमानस्य। ४५। अन्नद्धमदत्वं प्रपंचयति। कलेवर इति। घटकुड्यादिसदृशे दृश्येऽनात्मनि यत एवं सु

लब्ध्वा जनो दुर्लभमत्र मानुषं कथंचिदव्यंगमयत्नतोऽनघ। पादारविंदं न भजत्यसन्मतिर्गृहांधकूपे पतितो यथा पशुः॥ ४४॥ ममैष का
लोऽजितनिष्फलो गतो राज्यश्रियोन्नद्धमदस्य भूपतेः। मर्त्यात्मबुद्धेः सुतदारकोशभूष्वासज्जमानस्य दुरंतचिंतया॥ ४५॥ कलेवरेऽस्मि
न्घटकुड्यसन्निभे निरूढमानो नरदेव इत्यहं। वृतो रथेभाश्वपदात्यनीकपैर्गां पर्यटंस्त्वाऽगणयन्सुदुर्मदः॥ ४६॥ प्रमत्तमुच्चैरि
तिकृत्यचिंतया प्रवृद्धलोभं विषयेषु लालसं। त्वमप्रमत्तः सहसाभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमंतकः॥ ४७॥ ॥४॥ ॥

दुर्मदोऽभवं अतो ममैष कालो निःफलो गत इति। ४६। त्वामगणयन्तमाक्रामसीत्याह। प्रमत्तमिति। प्रमत्तं अनवहितं त्वामंतकमविगणय्य देहादिष्वासक्त
मिति यावत्। कुतः प्रमत्तं इतिकृत्यचिंतया एवमेवं करणीयमिति मनोरथपरंपरया। मनोरथैरलब्धेपि विषयेषु लालसं उत्सुकं प्राप्तेपि पुनः प्रवृद्धलोभ
मसूक्ष्मायस्य तं अंतकस्त्वमभिपद्यसे अभिभवसीत्यर्थः। क्षुधा सृक्किणी लेलिहानो हि राखुं मूषकमिवेति॥ ४७॥ ॥

इ॰उ॰
७

किंचाकानात्मनात्वयाभिपन्नोदेहएवंसवतीत्याहाद्वुरेति॥श्वश्टगात्नादिसिर्सङ्क्षितोविड्संज्ञितःतैरसङ्क्षितः॥कृमिसंज्ञितः॥दग्धोत्तस्मसंज्ञितोसवतीति
बुध्याविचार्यैवंभूतेशरीरेममतांकुर्वतोजनाहरिंनाराधयंतितेआत्मनिशत्रुभूताज्ञेयाः॥यतःयोनेःसहस्राणिवङ्कनिगत्वाडुःखेनलब्ध्वापिचमानुषत्वंसुखावहं
येनसजन्निविष्णुंतेवैमनुष्यात्मनिशत्रुभूताः॥ ६ ॥ किंचा॥अंतकप्राप्तेःप्रागपिदिक्कुविजयिनोराज्ञोपिपारतंत्र्यडुःखंतदवस्थमेवेत्याह॥निर्जित्येति॥अभूतवियहः
अविद्यमानसंग्रामः॥पूर्वंयेसमास्नैराजभिर्वंदितोपिमिथुनीभावसुखमेवपरंयेषुतेषुयोषितांगृहेषुक्रीडामृगइवङ्गतसन्ततोनीयते॥ ७ ॥ किंचातत्रातितपसाकुल

पुरारथेहेर्मपरिष्कृतेश्वरत्नमतंगजैर्वानरदेवसंज्ञितः॥सएवकालेनडुरत्ययेनतेकलेवरोविङ्कृमिसस्मसंज्ञितः॥ ४८ ॥ निर्जित्यदि
क्चक्रमभूतवियहोवरासनस्थः समराजवंदितः॥गृहेषुमैथुन्यसुखेषुयोषितांक्रीडामृगःपूरुषईशनीयते॥ ४९ ॥ करोतिकर्माणित
पःसुनिष्ठितोनिवृत्तभोगस्तदपेक्षयाददत्॥पुनश्चभूयेयमहंस्वराडितिप्रवृद्धतर्षोनसुखायकल्पते॥ ५० ॥ भवापवर्गोभ्रमतोयदाभ
वेज्जनस्यतर्ह्यच्युतसत्समागमः॥सत्संगमोयर्हितदैवसद्गतौपरावरेशेत्वयिजायतेमतिः॥ ५१ ॥

स्यनसोगाकृणःकश्चिदस्तिइत्याह॥करोतीति॥तपसिअधःशयनब्रह्मचर्यादौसुनिष्ठितः॥पुनश्चस्वराडिंद्रःस्यामिति॥यद्वाजन्मांतरेष्वेवमेवचक्रवर्तीस्यामिति॥
॥ ४८ ॥ तदेवमष्टभिःश्लोकैरीशवहिर्मुखानांसंसारंप्रपंच्यसत्कृपातन्निवृत्तिक्रममाह॥भवापर्गइति॥सोअच्युतभ्रमतःसंसरतोजनस्ययदात्वदनुग्रहेणभवस्यवं
धस्यअपवर्गःअंतोभवेत्प्राप्तकालःस्यात्तदासतांसंगमोभवेत्॥यदाचसत्संगमोभवेत्तदासर्वसंगनिवृत्त्याकार्यकारणनियंतरित्वयिसक्तिर्भवतिततो
मुच्येतइत्यर्थः॥ ४९ ॥

राम
७

ममतुसत्संगमात्सर्वमेवयोराज्यादिसंगविच्छेदोजातः सोयंत्वयामहाननुग्रहःकृतइत्याह।मन्यइति।तेत्वयासाधुभिर्विवेकिभिः तपसेप्रवेष्टुमिच्छद्भिः स्वयंत्यक्तुमलस
मानैः प्रार्थ्यतइति ॥५१॥ तदेवंविषयसेवामार्गंत्रिवर्गंत्सेवामार्गंचविविच्यवरान्वृणीष्वेतियदुक्तंतत्रोत्तरमाह।नकामयइति।अकिंचनानिर्वृत्ताभिमानाः आर्याविवे
की ॥५२॥ रजस्तमःसत्वगुणैरनुबध्यंतइतितथाताः ऐश्वर्यादिशत्रुमारणादिधर्मादिरूपाः विसृज्य।परंपुरुषमीश्वरं।ज्ञप्तिमात्रंज्ञानघनं।कुतः निरंजनं।तत्कुतः नि

मन्येममानुग्रहईशतेकृतोराज्यानुबंधापगमोयदृच्छया।यः प्रार्थ्यतेसाधुभिरेकचर्ययावनंविविक्षद्भिरखंडभूमिपैः ॥५२॥ नकामयेऽन्यं
तवपादसेवनादकिंचनप्रार्थ्यतमाद्वरंविभो।आराध्यकस्त्वांह्यपवर्गदंहरेवृणीतआर्योवरमात्मबंधनं ॥५३॥ तस्माद्विसृज्याशि
षईशसर्वतोरजस्तमःसत्वगुणानुबंधनाः।निरंजनंनिर्गुणमद्वयंपरंत्वांज्ञप्तिमात्रंपुरुषंव्रजाम्यहं ॥५४॥ चिरमिहवृजिनार्तस्तप्यमा
नोऽनुतापैरवितृषषडमित्रोऽलब्धशांतिः कथंचित्।शरणदसमुपेतस्त्वत्पदाब्जंपरात्मन्नभयमृतमशोकंपाहिमापन्नमीश ॥५५॥

र्गुणं।तदपिकुतः अद्वयं अतएवाक्रूरंत्वांशरणंव्रजामीति ॥५४॥ भुक्तावद्योगान्कैवल्यंतुकरस्थमेवेतिपुनर्वरैः प्रलोभयंतंश्रीकृष्णंपादोपग्रहणेनप्रार्थयतेचिर
मिति।वृजिनैः कर्मफलैरार्तः।पुनस्तद्वासनाभिस्तप्यमानः।तथापिअवितृषषडमित्रः।तर्षेवतृषातृष्णानविगततृषाः षडमित्राः शत्रवइंद्रियलक्षणायस्यसः।अ
तएवालब्धशांतिः।कथंचिद्दैववशेनलब्धशांतिरितिवा।शरणंस्वज्ञानंतद्ददातीतितथाहेशरणदसमुपेतः प्राप्तोहं।अशोकत्वेहेतुः।अभयं।तत्रापिहेतुः अमृतं।आ
पन्नंआपदाव्याप्तंपाहीति ॥५५॥

द०उ०
८

न०

अथमादायनसवत्येवकृतइत्यतआह।नधीरिति।एकांतभक्तानांधीराशीर्भिःप्रासाभिरपिनसिद्यतेनासज्जतइत्यर्थः ५७ व्यतिरेकमाह।युंजानानामिति।उद्दि
तंविषयाभिमुखं ५८ त्वस्यंतव ५९ युक्त्याराःसेनरीषयंस्तपसिलोकसंग्रहेप्रवर्त्तयतिक्षात्रधर्मेति ६१ इतिदशमेएकपंचाशत्तमः॥ ॥द्विपंचाशत्तमेधा

श्रीभगवानुवाच॥ सार्वभौममहाराजमतिस्तेविमलोर्जिता।वरैःप्रलोभितस्यापिनकामैर्विहितायतः ५६ प्रलोभितोवरैर्यत्त्वमप्रमा
दायविद्धितत्।नधीर्मय्येकभक्तानामाशीर्भिर्भिद्यतेक्वचित् ५७ युंजानानामभक्तानांप्राणायामादिभिर्मनः।अक्षीणवासनंराजन्
दृश्यतेक्वचिदुत्थितं ५८ विचरस्वमहींकामंमय्यावेशितमानसः।अस्त्वेवंनित्यदातुभ्यंभक्तिर्मय्यनपायिनी ५९ क्षात्रधर्मस्थितोजंतून्न्य
वधीर्मृगयादिभिः।समाहितस्तत्तपसाजह्यघंमदुपाश्रितः ६० जन्मन्यनंतरेराजन्सर्वभूतसुहृत्तमः।भूत्वाद्विजवरस्त्वंवैमामुपैष्यसि
केवलं ६१ इतिश्रीभागवतेमहापुराणेदशमस्कंधेयवनवधमुचुकुंदस्तुतिःएकपंचाशत्तमोध्यायः॥ शुकउवाच॥ इत्थंसो
नुगृहीतोंगकृष्णेनेक्ष्वाकुनंदनः।तंपरिक्रम्यसन्नम्यनिश्चक्रामगुहामुखात् १ संवीक्ष्यक्षुल्लकान्मर्त्यान्पशून्वीरुद्वनस्पतीन्।मत्वा
कलियुगंप्राप्तंजगामदिशमुत्तरां २ तपःश्रद्धायुतोधीरोनिःसंगोमुक्तसंशयः।समाधायमनःकृष्णेप्राविशद्गंधमादनं ३ बद
र्याश्रममासाद्यनरनारायणालयं।सर्वद्वंद्वसहःशांतस्तपसाराधयद्धरिम् ४

वत्स्यादिविगतःपुरी।अत्रमोदत्तसंदेशंरुक्मिण्याद्विजवर्णितं १ क्षुल्लकान्अल्पपरिमाणान् २ तपसिश्रद्धयायुतः।तत्रचबदर्याश्रमं ४ ॥राम॥ ॥

राम
८

निन्येनयन्मार्गेचलतिस्म ५ वेगरससंवेगोद्रेकं ६ ॥ शीरुशीतवत् ।शीरोरपिशीतवत् ।अतिशीतवदित्यर्थः ।वेलनतुः पलायेतांवहुयोजनदेशं ७ अप्रमाणवित्
प्रमाणमियत्तांतंवेत्तीतितथातुंगंएकादशयोजनोन्नतं।प्रकर्षेणवर्षत्यस्मिन्निति प्रवर्षणइत्याख्यायस्थितं।तदाहभगवानितिद्वंद्वः ॥ १० तत्रविविक्तनृपितयोःपदंनि

सगवान्पुनराबन्यपुरीयवनवेष्टितां।हत्वाम्लेच्छवलंनिन्येतदीयंद्वारकांधनं ५ नीयमानेधनेगोभिर्नृभिस्त्वाः स्मृतचोदितैः।आजगाममजरासं
धस्रयोविंशत्यनीकपः ॥ ६ ॥ विलोक्यवेगरभसंरिपुसैन्यस्यमाधवौ।मनुष्यचेष्टामापन्नौराजन्दुद्रुवतुर्द्रुतं ७ विहायवित्तंप्रचुरंअभीतौभीरुभी
तवत्।पद्भ्यांपद्मपलाशाभ्यांचेलतुर्वहुयोजनं ८ पलायमानौतौदृष्ट्वामागधःप्रहसन्वली।अन्वधावद्रथानीकैरीशयोरप्रमाणवित् ॥ ९ ॥
प्रद्रुत्यदूरंसंश्रांतौतुंगमारुहतांगिरिं।प्रवर्षणाख्यंभगवान्नित्यदायत्रवर्षति ॥ १० ॥ गिरौनिलीनावाज्ञायनाधिगम्यपदंनृप।ददाहगिरिमे
धोभिः समंतादग्निमुत्सृजन् ॥ ११ ॥ ततउत्पत्यतरसादह्यमानाद्रुतौतटात्।दशैकयोजनोत्तुंगान्निपेततुरधोभुवि ॥ १२ ॥ अलक्ष्यमाणौरिपुणासा
नुगेनयदूत्तमौ।स्वपुरंपुनरायातौसमुद्रपरिखांनृप ॥ १३ ॥ सोऽपिदग्धाविति मृषामन्वानोबलकेशवौ।वलमाकृष्यसुमहन्मगधान्मागधोय
यौ ॥ १४ ॥ आनर्ताधिपतिःश्रीमान्रैवतोरेवतींसुतां।ब्रह्मणाचोदितःप्रादात्वलायेतिपुरोदितं ॥ १५ ॥ भगवानपिगोविंदउपयेमेकुरूद्वह।
वैदर्भींभीष्मकसुतांश्रियोमात्रांस्वयंवरे ॥ १६ ॥ प्रमथ्यतरसाराज्ञःशाल्वादींश्चैद्यपक्षगान्।पश्यतांसर्वलोकानांतार्क्ष्यपुत्रःसुधामिव ॥ १७ ॥

लयस्थानंअनधिगम्य ११ ततोगिरेःदशचएकंचयानियोजनानितावदुत्तुंगात्।मागधसंरोधदेशमतिक्रम्यपरतोऽधोनिपेततुः ॥ १२ ॥ १४ श्रीकृष्णस्य विवाहान्नि
रूपयितुंवलदेवविवाहंनवमस्कंधोक्तमनुस्मारयति।आनर्तेति।मात्रांकलांगरुडोयथादेवान्प्रमथ्यसुधामहरत्तथेति ॥ १७ ॥

द० उ०
९

राक्षसोयुद्धहरणादितिस्मृतेः। राज्ञः प्रमथ्येति चत्वङ्कृत्वा राक्षसेन विधानेनोपयेमे परिणीतवानिति श्रुतं। पूर्वमेव वा सामान्यत एव श्रुतं। विशेषं तु श्रोतुमिच्छामः
१८ श्रवणौत्सुक्यमाविः करोति। ब्रह्मन्निति। पुण्याः महाफलाः माध्वीः श्रुतिसुखाः लोकस्य मलापहाः शृण्वानः शृण्वन्नित्यर्थः श्रुतज्ञः श्रुतसारवित्। नित्यनूतनाः

राजोवाच ॥ भगवान्भीष्मकसुतां रुक्मिणीं रुचिराननां। राक्षसेन विधानेन उपयेमे इति श्रुतं १८ भगवन्श्रोतुमिच्छामः कृष्णस्या-
मिततेजसः। यथा मागधशाल्वादीन्जित्वा कन्यामुपाहरत् १९ ब्रह्मन्कृष्णकथाः पुण्या माध्वीर्लोकमलापहाः। को नु तृप्येत शृण्वा-
नः श्रुतज्ञो नित्यनूतनाः २० शुक उवाच ॥ राजाऽसीद्भीष्मको नाम विदर्भाधिपतिर्महान्। तस्य पंचाऽभवन्पुत्राः कन्यैका च वरानना
॥ २१ रुक्म्यग्रजो रुक्मरथो रुक्मबाहुरनंतरः। रुक्मकेशो रुक्ममाली रुक्मिण्येषां स्वसा सती ॥ २२ सोपश्रुत्य मुकुंदस्य रूपवीर्यगुणश्रि-
यः। गृहागतैर्गीयमानास्तं मेने सदृशं पतिं २३ तां बुद्धिलक्षणौदार्यरूपशीलगुणाश्रयां। कृष्णः स्वसदृशीं भार्यां समुद्वोढुं मनो दधे २४
बंधूनामिच्छतां दातुं कृष्णाय भगिनीं नृप। ततो निवार्य कृष्णद्विड्रुक्मी चैद्यममन्यत २५ तदवेत्यासितापांगी वैदर्भी दुर्मना भृशं। वि-
चिंत्याऽऽप्तं द्विजं कंचित्कृष्णाय प्राहिणोद्द्रुतं २५ द्वारकां स समभ्येत्य प्रतीहारैः प्रवेशितः। अपश्यदाद्यं पुरुषमासीनं कांचनासने २६
दृष्ट्वा ब्रह्मण्यदेवस्तमवरुह्य निजासनात्। उपवेश्याऽर्हयांचक्रे यथाऽऽत्मानं दिवौकसः २७ तं भुक्तवंतं विश्रांतमुपगम्य सतां गतिः। पाणिना-
ऽभिमृशन्पादावव्यग्रस्तमपृच्छत २८ ॥

प्रतिक्षणमाश्चर्यवत्प्रतीयमानाः २० चैद्यममन्यत तस्मै वरमित्यर्थः २५ अवेत्य ज्ञात्वा असितापांगी
नीलकटाक्षी कृष्णाय कृष्णमानेतुं प्रेषयामास २६ प्रतीहारैर्द्वारपालैः २७ आत्मानं श्रीकृष्णं अभिमृशन् शनैः संमर्दयन् २८ ॥राम॥राम॥राम॥राम॥

राम
९

सधर्मोऽस्य ब्राह्मणस्याखिलकामदोग्धा। यद्वा स ब्राह्मणोऽस्य विश्वस्याखिलकामधुगिति ॥ ३१॥ लोकानाप्नोतिलोकाल्लोकांतरं पर्यटति। नैकत्र निर्वृतः तिष्ठतीत्य
र्थः। नाप्नोतीति पाठे सुरेश्वरोऽपि भूत्वा लोकान्नाप्नोति। उत्तमलोकान्प्राप्तोऽप्यप्राप्तइव क्लिश्यतीत्यर्थः। शेते सुखमास्त इत्यर्थः। तदेवाह। सर्वेषांगेषु वाक्पाण्यादिषु वि
ज्वरस्तापरहितः ॥ ३२॥ स्वलाभः स्वत एव प्राप्तो लाभः। आत्मलाभो वा तेन संतुष्टान्। शरण्यान् साधून् स्वधर्मनिष्ठान् ॥ ३३॥ यस्य राज्ञो विषये देशे यतः स्थानात् ॥ ३४॥ यदिच्छ
याय कार्यस्येच्छया। दुर्गं समुद्रं ॥ ३५॥ संपृष्टः संप्रश्नः पृष्टस्यार्थो यं सः परमेष्ठिना परमेश्वरेणैवंभूनामस्तिपेतं रुक्मिण्या प्रेषितमित्यादि सर्वं ॥ ३५॥ रुक्मिण्या स्वयमेकां

कच्चिद्द्विजवरश्रेष्ठ धर्मस्ते वृद्धसंमतः। वर्त्तते नातिकृच्छ्रेण संतुष्टमनसः सदा ॥ ३०॥ संतुष्टो यर्हि वर्त्तेत ब्राह्मणो येन केनचित्। अहीयमानः
स्वात्धर्मात् स ह्यस्याखिलकामधुक् ॥ ३१॥ असंतुष्टोऽसकृल्लोकानाप्नोत्यपि सुरेश्वरः। अकिंचनोऽपि संतुष्टः शेते सर्वांगविज्वरः ॥ ३२॥
विप्रान्स्वलाभसंतुष्टान्साधून्भूतसुहृत्तमान्। निरहंकारिणः शांतान्नमस्ये शिरसाऽसकृत् ॥ ३३॥ कच्चिद्वः कुशलं ब्रह्मन् राजतो यस्य
हि प्रजाः। सुखं वसंति विषये पाल्यमानाः स मे प्रियः ॥ ३४॥ यतस्त्वमागतो दुर्गं निस्तीर्येह यदिच्छया। सर्वं नो ब्रूह्यगुह्यं चेत् किं कार्यं करवाम
ते ॥ ३४॥ एवं संपृष्टसंप्रश्नो ब्राह्मणः परमेष्ठिना। लीलागृहीतदेहेन तस्मै सर्वमवर्णयत् ॥ ३५॥ रुक्मिण्युवाच ॥ श्रुत्वा गुणान्भुवनसुं
दर शृण्वतां ते निर्विश्य कर्णविवरैर्हरतोऽगतापं। रूपं दृशां दृशिमतामखिलार्थलाभं त्वय्यच्युताऽविशति चित्तमपत्रपं मे ॥ ३७॥

तेलिखित्वा दत्तपत्रिकां। मुद्रामुन्मुच्य कृष्णाय प्रेमविह्वलमदर्शयत्। ब्राह्मणः श्रीकृष्णानुज्ञया वाचयति। श्रुत्वेति। अयमर्थः। हे अच्युत हे भुवनसुंदरेति। औत्सुक्यं
द्योतयति क्व तव महिमा क्वाहं रूपकुलशीलादिशून्यापि। तथापि अपगतत्रपा यस्मात्तत्त्वमेव चित्तं त्वयि आविशति आसज्जते तत्कुतस्तत्राह। शृण्वतां कर्ण
विवरैरंतः प्रविश्य अंगतापं अंगेति पृथक्संबोधनं वा। हरतस्तव गुणान् श्रुत्वा तथा दृशिमतां चक्षुष्मतां दृशामखिलार्थलाभात्मकं रूपं च श्रुत्वेति ॥ ३७॥

द॰उ॰
१०

अहोकुलकन्यानामिदंअतिधार्ष्ट्यमितिमाशंकीत्याह।कात्वेति।हेन्द्रसिंहनरश्रेष्ठ।कानामकन्याकुलवतीतथामहतीगुणोदारातथाधीराधीमतीत्वां
पतिंनवृणीत।मय्येवकेयंदोषशंकेतिभावः।कथंभूतंगुणशीलादिभिरात्मनैवतुल्यंनिरूपममित्यर्थः।इविणांइर्व्यंसंपत्।धामप्रभावः।तथानर
लोकस्यमनसांअभिरामोभिरमणंयस्मात्तं।किंचकालेविवाहावसरे॥४॥ हेविभोतत्तस्मान्मेमयासवान्खलुपतिर्वृतः।आत्माचभवतोर्पितः।अतस्त्वम

कात्वामुकुंदमहतीकुलशीलरूपविद्यावयोइविणधामभिरात्मतुल्यं॥धीरापतिंकुलवतीनवृणीतकन्याकालेनृसिंह
नरलोकमनोभिरामम्॥ ३७॥ तन्मेभवान्खलुवृतःपतिरंगजायामात्मार्पितश्चभवतोत्रविभोविधेहि।मावीरभागमभिम
र्शतुचैद्यआरात्गोमायुवन्मृगपतेर्बलिमंबुजाक्ष॥ ३९॥ पूर्तेष्टदत्तनियमव्रतदेवविप्रगुर्वर्चनादिभिरलंभगवान्परेशः।
आराधितोयदिगदाग्रजएत्यपाणिंगृह्णातुमेनदमघोषसुतादयोन्ये॥ ४०॥ ॥

चागत्यमांसवतोजायांविधेहि।विपक्षेबाधकंद्योतयंत्याह।मावीरस्तागमिति।वीरस्यतववस्तागंमांआरात्शीघ्रंएत्यआगत्यचैद्योमाभिमर्शतुमा
स्पृशतु।मृगपतेर्बलिंगोमायुःशृगालइवेति॥३॥ अनेकजन्मकृतैःसुकृतैरिदमेवभूयादितिप्रार्थयते।पूर्तेति।पूर्तंकूपादि।इष्टंअग्निहोत्रादि।दत्तंहिरण्या
दिनियमस्तीर्थाटनादि।व्रतंकृच्छ्रादि॥ ४०॥

राम
१०

चैद्यायबंधुभिरर्पितायांत्वयिकिंमयाकरणीयमित्यपेक्षायामाह।श्वोभाविनीति।हेअजितश्वोभाविनिउद्वहनेविवाहेप्रथमंगुप्तःअलक्षितएवागत्यपश्चात्पृतनाप
तिभिःपरिवृतःसन्चैद्यादिबलंनिर्मथ्यप्रसह्यहठात्।वीर्यप्रभावदर्शनमेवशुल्कंवैवाहिकंदेयंयस्यास्तांमांअनेनराक्षसविधिनाउद्वहेतिउपदेशरहस्यं॥५॥ननुभ
वतुशिशुपालादिबलप्रमथनं।अंतःपुरमध्यगतायास्तवहरणेत्वद्बंधुवधोपिप्रसज्जेतेत्यतआह।अंतःपुरेति।पुराद्बहिर्वर्त्तमानांगिरिजांअंबिकांअंबिकागृहदेवमम

श्वोभाविनित्वमजितोद्वहनेविदर्भान्गुप्तःसमेत्यपृतनापतिभिःपरीतः।निर्मथ्यचैद्यमगधेशबलंप्रसह्यमांराक्षसेनविधिनोद्वहवीर्यशु
ल्कां॥४१॥अंतःपुरांतरचरीमनिहत्यबंधून्त्वामुद्वहेकथमितिप्रवदाम्युपायम्।पूर्वेद्युरस्तिमहतीकुलदेवयात्रायस्यांबहिर्नववधूर्गि
रिजामुपेयात्॥४२॥यस्यांघ्रिपंकजरजःस्नपनंमहांतोवांछंत्युमापतिरिवात्मतमोपहत्यै।यर्ह्यंबुजाक्षनलभेयंभवत्प्रसादंजह्यामसू
न्व्रतकृशान्शतजन्मभिःस्यात्॥४३॥ब्राह्मणउवाच॥ ॥इत्येतेगुह्यसंदेशायदुदेवमयाहृताः।विमृश्यकर्त्तुंयच्चात्रक्रियतांत
दनंतरं॥४४॥ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेद्विपंचाशत्तमोध्यायः॥ ॥

हरणंशुकरमितिभावः।ननुकिमनेनानर्थकारिणानिर्बंधेनचैद्योपितावत्प्रख्यातगुणकर्मायोग्यएववरइतितत्राह।यस्येति।हेअंबुजाक्षयस्यभवतोऽघ्रिपंकजरजो
भिःस्नपनंआत्मनस्तमसोपहत्यैउमापतिरिवमहांतोवांछंति।तस्यभवतःप्रसादंयद्यहंनलभेयंनप्राप्नुयां।तर्हिव्रतेउपवासादिभिःकृशान्असून्प्राणान्जह्यां
त्यजेयं।ततःकिमित्यतआह।शतजन्मभिरिति।एवमेववारंवारंजह्यांयावच्छतजन्मभिरपितवप्रसादःस्यादिति॥४३॥अत्रयत्कर्त्तुंकरणीयंतद्विमृश्यक्रियतां।तदा
नंतरमेवक्रियतामिति॥४४॥इतिटीकायांद्विपंचाशत्तमः॥ ॥

द॰ तु॰
११

त्रिपंचाशत्तमे गत्वा विदर्भानद्भुते हितः। रुक्मिणीमहरत्कृष्णो मिषतां द्विषतां बलात्॥ १ निद्रया अलाभे कारणान्तरं वेदेति। तया अकथितमप्यहं जानामीति १ २ आनयिष्ये आनेष्यामि। राजन्यापसदान् राजकुहीनान्। उन्मथ्य आनयने दृष्टान्तः। एधसः इति ३ उद्वाहर्क्षमिति। परश्वो रात्रौ विवाहनक्षत्रमिति विज्ञाय तथा रात्र्यां पश्चाद् यथा तद्विदर्भदेशानगमत्। श्वोभाविनि त्वमजितोद्वहने विदर्भान् गुप्तः समेत्येति रुक्मिणीसंदेशात्॥ ४ सैन्येत्यादीनि चत्वारि अश्वनामानि ५ ६ पुत्रस्य रुक्मि

श्रीशुक उवाच॥ वैदर्भ्याः स तु संदेशं निशम्य यदुनंदनः। प्रगृह्य पाणिना पाणिं प्रहसन्निदमब्रवीत्॥ १ श्रीभगवानुवाच॥ तथाहमपि तच्चित्तो निद्रां च न लभे निशि। वेदाहं रुक्मिणा द्वेषान्ममोद्वाहो निवारितः॥ २ तामानयिष्य उन्मथ्य राजन्यापसदान्मृधे। मत्परामनवद्यांगीमेधसोऽग्निशिखामिव ३ उद्वाहर्क्षं च विज्ञाय रुक्मिण्या मधुसूदनः॥ रथः संयुज्यतामाशु दारुकेत्याह सारथिम्॥ ४ स चाश्वैः शैब्यसुग्रीवमेघपुष्पबलाहकैः॥ युक्तं रथमुपानीय तस्थौ प्रांजलिरग्रतः॥ ५ आरुह्य स्यंदनं शौरिर्द्विजमारोप्य तूर्णगैः॥ आनर्तादेकरात्रेण विदर्भानगमद्धयैः॥ ६ राजा स कुंडिनपतिः पुत्रस्नेहवशानुगः॥ शिशुपालाय स्वां कन्यां दास्यन् कर्माण्यकारयत्॥ ७ पुरं संमृष्टसंसिक्तमार्गरथ्याचतुःपथं॥ चित्रध्वजपताकाभिस्तोरणैः समलंकृतं॥ ८ स्रग्गंधमाल्याभरणैर्विरजोंबरभूषितैः॥ जुष्टं स्त्रीपुरुषैः श्रीमद्गृहैरगुरुधूपितैः॥ ९ पितृन्देवान्समभ्यर्च्य विप्रांश्च विधिवन्नृप॥ भोजयित्वा यथान्यायं वाचयामास मंगलं॥ १०

णः स्नेहेन तद्वशमनुगच्छतीति तथा। अनेन शिशुपालेऽनभिरुचिं द्योतयति। कर्माणि पुरालंकारपितृदेवार्चनादीनि ७ तान्येवाह। पुरमित्यादि चतुर्भिः। संमृष्टाः संसिक्ताश्च मार्गादयो यस्मिंस्तत्। चित्रध्वजेषु पताका याभिः समलंकृतमकारयत्॥ ८ स्रग्गंधमाल्याभरणैरित्यत्र मत्वर्थीयो द्रष्टव्यः। यद्वा। स्रग्गंधमाल्यानि आविभ्रतीति तथा तैः। तथा विरजोंबरैर्भूषितैश्च स्त्रीपुरुषैर्जुष्टं। तथा श्रीमद्भिर्गृहैश्च जुष्टं ९ यथान्यायं अन्यांश्च। कन्यापति मंगलं वाचयामास १०

राम
११

कृतंकौतुकेनविवाहसूत्रेणमंगलंयस्यास्तां॥अहतंनवीनं॥भूषणोत्तमैश्चभूषितां॥ ११ वधास्वस्थाःकन्यायाः॥अथर्ववित्॥आथर्वणमंत्रवित् १२ ३ अभ्युदयेउचितं १४
ततश्चतुरंगसैन्यैःपरिवृतः॥कुंडिनंसीष्मकस्यपुरंययौ॥मदंच्यवंतेतेमदस्रुतःतैःस्यंदनैःरथैःहेमरचितामालाविद्यंतेयेषुतैः १५ कल्पितंनिर्मितंयदन्यंनिवेशनंतस्मि

सुस्नातांसुदतींकन्यांकृतकौतुकमंगलां॥अहतांशुकयुग्मेनभूषितांभूषणोत्तमैः॥ ११ चक्रुःसामर्ग्यजुर्मंत्रैर्वध्वारक्षांद्विजोत्तमाः॥पुरोहितोऽ
थर्वविद्वैजुहावग्रहशांतये॥ १२ हिरण्यरूप्यवासांसितिलांश्चगुडमिश्रितान्॥प्रादाद्धेनूंश्चविप्रेभ्योराजाविधिविदांवरः॥ १३ एवंचेदिपतीराजा
दमघोषःसुतायवै॥कारयामासमंत्रज्ञैःसर्वमभ्युदयोचितं॥ १४ मदच्युद्भिर्गजानीकैःस्यंदनैर्हेममालिभिः॥पत्त्यश्वसंकुलैःसैन्यैःपरीतःकुंडि
नंययौ॥ १५ तंवैविदर्भाधिपतिःसमभ्येत्याभिपूज्यच॥निवेशयामासमुदाकल्पितान्यनिवेशने॥ १६ तत्रशाल्वोजरासंधोदंतवक्रोविदूरथः॥
आजग्मुश्चैद्यपक्षीयाःपौंड्रकाद्याःसहस्रशः॥ १७ कृष्णरामद्विषोयत्ताःकन्यांचैद्यायसाधितुं॥यद्यागत्यहरेत्कृष्णोरामाद्यैर्यदुभिर्वृतः॥ १८
योत्स्यामःसंहतास्तेनइतिनिश्चितमानसाः॥आजग्मुर्भूभुजःसर्वेसमर्थबलवाहनाः॥ १९ श्रुत्वैतद्भगवान्रामोविपक्षीयनृपोद्यमं॥कृष्णं
चैकंगतंहर्तुंकन्यांकलहशंकितः॥ २० बलेनमहतासार्द्धंभ्रातृस्नेहपरिप्लुतः॥त्वरितःकुंडिनंप्रागात्गजाश्वरथपत्तिभिः॥ २१ भीष्मक
न्यावरारोहाकांक्षंत्यागमनंहरेः॥॥प्रत्यापत्तिमपश्यंतीद्विजस्याऽचिंतयत्तदा॥ २२॥ ॥

न्यायदिश्रीकृष्णोहरेदितिशंकिताःकन्यांसाधयितुमित्यर्थः॥ १८ सूर्योदयात्पूर्वमेवोत्सुकेनतुक्मिणयचिंतयदित्याह॥भीष्मकन्येति॥प्रत्यापत्तिंप्रत्यागमनं

भा·द·उ·
१२

वियामाराविप्रावन्मात्रेणान्तरितः। अल्पराधसः मंदभाग्यायाः २३ शुश्रुषितं धार्म्यादि। अपीतिशंकायां २४ नायातिहिकृतोद्यमइतिअस्यार्थः। आदौकृतोद्यम
वान्तंनप्रस्थापितवान्प्रस्थानावसरेचकिंचित्मयिशुश्रुषितंमत्वाप्रत्याचष्ट। अतःसोपिद्विजोनूनंनायातीति। यद्वाततोनिर्गतोपिश्रीकृष्णोमद्दैववैमुख्यात्दु
चित्यतिबद्धोभवेदित्याह। दुर्भगायाइति। २५ कालज्ञानाधुनापिगोविंदागमनकालइतिमत्वानाकिंचिदाश्वस्ताविह्वलासतीचिन्ताम्लानेलोचनेनिमीलितवती

अहोत्रियामान्तरितउद्वाहोमेऽल्पराधसः। नागच्छत्यरविंदाक्षोनाऽहंवेद्म्यत्रकारणं २३ सोपिनावर्ततेऽद्यापिमत्संदेशहरोद्विजः। अपिम
यानवद्यात्मादृष्ट्वाकिंचित्जुगुप्सितं २४ मत्पाणिग्रहणेनूनंनायातिहिकृतोद्यमः। दुर्भगायानमेधातानानुकूलोमहेश्वरः २५ देवी
वाविमुखागौरीरुद्राणीगिरिजासती। एवंचिंतयतीबालागोविंदहृतमानसा। न्यमीलयतकालज्ञानेत्रेचाश्रुकलाकुले २६ एवंवध्वा
ः प्रतीक्षंत्यागोविंदागमनंनृप। वामऊरुर्भुजोनेत्रमस्फुरन्प्रियभाषिणः २७ अथकृष्णविनिर्दिष्टःसएवद्विजसत्तमः। अन्तःपुरस्थांदेवीं
राजपुत्रींददर्शह २८ सातंप्रहृष्टवदनमव्यग्रात्मगतिंसती। आलक्ष्यलक्षणाभिज्ञासमपृच्छतशुचिस्मिता २९ तस्याआवेदयत्प्राप्तंश
शंसयदुनंदनं। उक्तंचसत्यवचनमात्मोपनयनंप्रति ३०

त्यर्थः २६ प्रियभाषिणःप्रियसूचकाः २७ पुरोपवनंप्राप्तेनश्रीकृष्णेनविनिर्दिष्टः। प्राप्तंमांकथयइत्यादिष्टः २८ नव्यग्राआत्मनोदेहस्यगतिर्यस्यतं। इतस्य
लक्षणंतत्कार्यसूचकमभिजानातीतितथा २९ तस्यैप्राप्तंयदुनंदनंआवेदितवान् तंचशशंस। आत्मोपनयनंप्रति। आत्मनास्वयंकृष्णस्यानयनंप्रतितेनद्वि
जेनसत्यवचनंप्रोक्तमिति। आत्मनःप्राणेश्वरस्येतिवा। यद्वाआत्मनस्तस्याउपनयनंप्रतिश्रीकृष्णेनयदुक्तंसत्यंवचनंतामानयिष्यइत्यादितच्चसशंसअव
र्णयदित्यर्थः ३०

राम
१२

तं श्रीकृष्णं अस्मिन् कार्ये सर्वेषां पौराणामपि स्त्रिपर्यासमिति तमुचितं प्रियमपश्यंती तदा केवलं ननाम। पश्चाद्दृष्टदर्शाविल्यर्थः। यद्धामां श्रियं येन मन्निते तावत्सर्वसंपद्धामा
श्यदं भवंति किंपुनर्मयि श्रुणता मामिति ततोऽधिकमन्यत् प्रियं न पश्यंती ननामेति ॥ ३१ ॥ महामतिरित्य० । श्रीकृष्णो वाढं कथ्यामुद्वोढुमेवागतः स्यादिति विरोचितेन
विधिना समभ्यर्जयदिति सूचितं। यथाय यथावत् ॥ ३४ ॥ समेतानां राज्ञां मध्ये वीर्यादिनतिक्रम्य तं तमर्हितवानित्यर्थः ॥ ३५ ॥ श्रीकृष्णेभाविकर्मसूचकं जनानुरागं द
र्शयति। कृष्णमागतमिति त्रिभिः। अस्यैव रुक्मिणी पत्न्यर्हत्येव। असावेव वैष्म्या एव समुचित एवेति षडवधारणानि। तत्रैकस्मिन् व्यतिरेकप्रदर्शनमुपलक्षणार्थं न
परेति। न च वाक्यभेदोषः। अनूद्यविधेयभेदेन विभिन्नानामेव वाक्यानां सहप्रयोगात्। यदहं माष्टिरित्यादिवदिति। अयमेवास्तु ग्रहइति निर्दिशंति श्लाघ्विति ॥ ३६

तमागतं समाज्ञाय वैदर्भी दृष्टमानसा। न पश्यंती ब्राह्मणाय प्रियमन्यन्ननाम सा ॥ ३१ ॥ प्राप्तौ श्रुत्वा स्वदुहितुरुद्वाहप्रेक्षणोत्सुकौ। अभ्ययात्तूर्यघोषे
ण रामकृष्णौ समर्हणैः ॥ ३२ ॥ मधुपर्कमुपानीय वासांसि विरजांसि सः। उपायनान्यभीष्टानि विधिवत्समपूजयत् ॥ ३३ ॥ तयोर्निवेशनं श्रीमदुपक
ल्प्य महामतिः। ससैन्ययोः सानुगयोरातिथ्यं विदधे यथा ॥ ३४ ॥ एवं राज्ञां समेतानां यथावीर्यं यथावयः। यथाबलं यथावित्तं सर्वैः कामैः समर्हयत्
॥ ३५ ॥ कृष्णमागतमाकर्ण्य विदर्भपुरवासिनः। आगत्य नेत्रांजलिभिः पपुस्तन्मुखपंकजम् ॥ ३६ ॥ अस्यैव भार्या भवितुं रुक्मिण्यर्हति नापरा। असाव
प्यनवद्यात्मा भैष्म्याः समुचितः पतिः ॥ ३७ ॥ किंचित्सुचरितं यन्नस्तेन तुष्टस्त्रिलोककृत्। अनुगृह्णातु गृह्णातु वैदर्भ्याः पाणिमच्युतः। एवं प्रेमकलाबद्धा
रुक्मिण्यावधारणत्रयं। रुक्मिणी अस्यैव भार्या भवितुमर्हति नान्यस्य ॥ १ ॥ रुक्मिण्येवास्य वदंति स्म पुरौकसः। कन्या चांतःपुरात् प्रागात् भटैर्गुप्ता विकालयं ॥ ३९
भार्या भवितुमर्हति नान्या ॥ २ ॥ रुक्मिणी अस्य भार्या भवितुमर्हत्येव अनर्हा नेति ॥ ३ ॥ श्रीकृष्णे अवधारणत्रयं। असावेवास्याः पतिः समुचितो नान्यः ॥ १ ॥ अस्या एवासौ
पतिः समुचितो नान्यस्याः ॥ २ ॥ असावस्याः पतिः समुचित एव नासमुचित इति ॥ ३ ॥ एवं षडवधारणानि। अत्र वासौ श्रीकृष्ण एव रुक्मिण्याः पतिः समुचितः। रुक्मिण्ये
वास्य भार्या भवितुमर्हतीत्यवधारणद्वयमेवापेक्षितं इतरत्तु चतुष्टयमर्थपुनरुक्तमप्यौत्सुक्यातिशयप्रकटनायोक्तमिति द्रष्टव्यं ॥ ३

द॰उ॰
१३

तच्चागमनंविशिनष्टिद्वयेन ॥ ३९ ॥ ४० ॥ पद्भ्यामिति। अपिचमृदंगेत्यादिजघ्निरे। आहतावादिताइत्यर्थः। वारमुख्यागणिकोत्तमाः ॥ ४० ॥ उपस्पृश्यआचम्य ॥ ४१ ॥ प्र
वयसोवृद्धाःभवान्वितामितिभवश्चोपसर्जनत्वंस्त्रीकर्मोचितमुक्तं ॥ ४३ ॥ नमस्यइतिरुक्मिण्यातदेवदृष्टोयंमंत्रः। स्वसंतानसुतांगणेशादिसहितां। आत्मारामो

पद्भ्यांविनिर्ययौद्रष्टुंभवान्याःपादपल्लवं। साचानुध्यायतीसम्यक्मुकुंदचरणांबुजं ॥ ३९ ॥ यतवाङ्मातृभिःसार्द्धंसखीभिःपरिवारिता। गुप्ताराजभटैःशूरैःसंनद्धैरुद्यतायुधैः ॥ ४० ॥ मृदंगशंखपणवास्तूर्यभेर्यश्चजघ्निरे। नानोपहारबलिभिर्वारमुख्याःसहस्रशः ॥ ४१ ॥ स्रग्गंधवस्त्राभरणैर्द्विजपत्न्यःस्वलंकृताः। गायंत्यश्चस्तुवंतश्चगायकावाद्यवादकाः। परिवार्यवधूंजग्मुःसूतमागधवंदिनः ॥ ४१ ॥ आसाद्यदेवसदनंधौतपादकरांबुजा। उपस्पृश्यशुचिःशान्ताप्रविवेशांबिकान्तिकं ॥ ४२ ॥ तांवैप्रवयसोबालाविधिज्ञाविप्रयोषितः। भवानींवंदयांचक्रुर्भवपत्नींभवान्वितां ॥ ४३ ॥ नमस्येत्वांबिकेभीक्ष्णंस्वसंतानयुतांशिवां। भूयात्पतिर्मेभगवान्कृष्णस्तदनुमोदतां ॥ ४४ ॥ अद्भिर्गंधाक्षतैर्धूपैर्वासःस्रङ्माल्यभूषणैः। नानोपहारबलिभिःप्रदीपावलिभिःपृथक् ॥ ४५ ॥ विप्रस्त्रियःपतिमतीस्तथातैःसमपूजयत्। लवणापूपतांबूलकंठसूत्रफलेक्षुभिः। तस्यैस्त्रियस्ताःप्रददुःशेषांयुयुजुराशिषः ॥ ४६ ॥ तास्योदेवीनमस्कृत्यशेषांचजगृहेवधूः। मुनिव्रतमथत्यक्त्वानिश्चक्रामांबिकागृहात्। प्रगृह्यपाणिनाभृत्यां रत्नमुद्रोपशोभितां ॥ ४७ ॥

सोकथंत्वत्पतिर्भवेदितिचेदतआह। तदनुमोदतामिति। सवतीश्रीकृष्णएववा। स्रग्गंधादिभिरंबिकांसमपूजयत् ॥ ४५ ॥ तथाविप्रस्त्रियोऽपितैरीदृशैर्लवणादिभि
स्वसमपूजयदिति ॥ ४६ ॥ शेषांनिर्माल्यं। मुनिव्रतंमौनं भृत्यांसखीं ॥ ४७ ॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥

राम
१३

तांविलोक्यवीरामुमुहुरितितृतीयश्लोकेनान्वयः।श्यामांअजातरजस्कांकुंतलेस्यःशंकितेइवचपलेईक्षणेयस्यास्तां॥५०॥द्विजाएवकुंदानांकुड्मलानिमुकुलानिविंबफ
लवत्योःधरस्तस्यद्युतिभिःशोणायमानानितानियस्यास्तांकलाशोभातद्युक्तंरुरुरंशिंजद्भवत्कलानूपुरंचतस्यधामदीप्तिःतेनशोभितुंशीलमस्यास्तेनपदाचलंती॥५१॥नकेव

तांदेवमायामिववीरमोहिनींसुमध्यमांकुंडलमंडितानना।श्यामांनितंवार्पितरत्नमेखलांव्यंजन्स्तनींकुंतलशंकितेक्षणां॥५०॥शुचिस्मितांविंबफ
लाधरद्युभिःशोणायमानद्विजकुंदकुड्मलां।पदाचलंतींकलहंसगामिनींसिंजत्कलानूपुरधामशोभिना॥५१॥विलोक्यवीरामुमुहुःसमागताय
शस्विनस्तत्कृतहृच्छयार्दिताः॥५१॥यांवीक्ष्यतेनृपतयस्तदुदारहासव्रीडावलोकहृतचेतसउज्झितास्त्राः॥५२॥पेतुःक्षितौगजरथाश्वगताविमूढा
यात्राछलेनहरयेऽर्पयतींस्वशोभां।सैवंशनैश्चलयतीचलपद्मकोशौप्राप्तिंतदाभगवतःप्रसमीक्षमाणा॥५३॥उत्सार्यवामकरजैरलकानपां
गैःप्राप्तान्ह्रियैक्षतनृपान्ददृशेऽच्युतंसा।तांराजकन्यांरथमारुरुक्षतींजहारकृष्णोद्विषतांसमीक्षतां॥५४॥रथंसमारोप्यसुपर्णलक्षणंरा
जन्यचक्रंपरिभूयमाधवः।ततोययौरामपुरोगमैःशनैःशृगालमध्यादिवभागहृद्धरिः॥५५॥तंमानिनःस्वाभिभवंयशःक्षयंपरेजरासंधवशान
सेहिरे।अहोधिगस्मान्यशआत्तधन्वनांगोपैर्हृतंकेशरिणांमृगैरिव॥५६॥ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेरुक्मिणीहरणेत्रिपं
चाशत्तमोध्यायः॥ ॥ ॥

तंमुमुहुः।पेतुश्चेत्याह।यामितियात्रामिषेणहरयेस्वलावण्यंसमर्पयंती॥५२॥यांवीक्ष्यक्षितौपेतुः।सातान्प्राप्तान्ह्रियैक्षत।तदेवाच्युतंचददर्शेत्युत्तरेण
वयः।चलपद्मकोशतुल्यौचरणौचालयंती॥५४॥सुपर्णलक्षणंगरुडध्वजंहरिःसिंघः॥५५॥असहमानानांतेषांआक्रोशमाह।अहोधिगस्मान्यतोऽस्माकं
यशोगोपैर्हृतमिति ५६

सा·द·उ·
१४

वक्तुः पंचाशन्नमेतु जिव्हा राज्ञोऽरिपक्षगान् । रुक्मिणीं च विरूप्याथ लेभ्याः पाणिं पुरे ग्रहीत ॥ १ ॥ इति इति अहो धिग् अस्मान् इत्येवं वदंतः सुसंरब्धाः क्रोधाविष्टाः दंशिताः कृतसन्न
हाः परिक्रांताः परिवृत्ताः । अन्वीयुः अनुधावन् ॥ ५ ॥ विस्फूर्ज्य टंकारयित्वा ॥ २ ॥ परेषां शराणां बाहुल्ये यादवानामचलत्वे दृष्टांतः । मेघा इति ॥ ३ ॥ ऐक्षत । मा स्म भैः । मा भयं कुरु
हे वामलोचने वरांगि । तावकैः त्वदीयैः कृत्वा ॥ ५ ॥ स चासौ विक्रमश्च तं ॥ ६ ॥ उष्णीषाणि शिरोवतंसवस्त्राणि तत्सहिता नि शिरांसि ॥ ७ ॥ करभाः उष्ट्राः ऊरुविशेषणं वा

श्रीशुक उवाच ॥ इति सर्वे सुसंरब्धा वाहानारुह्य दंशिताः । स्वैः स्वैर्बलैः परिक्रांता अन्वीयुर्धृतकार्मुकाः ॥ १ ॥ तानापततआलोक्य यादवानीक
यूथपाः । तस्थुस्तत्संमुखा राजन् विस्फूर्ज्य स्वधनूंषि ते ॥ २ ॥ अश्वपृष्ठे गजस्कंधे रथोपस्थे च कोविदाः । मुमुचुः शरवर्षाणि मेघा अद्रिष्वपो यथा ॥ ३ ॥ प
त्युर्बलं शरासारैः छन्नं वीक्ष्य सुमध्यमा । सव्रीडमैक्षत् तद्वक्त्रं भयविह्वललोचना ॥ ४ ॥ प्रहस्य भगवानाह मा स्म भैर्वामलोचने । विनंक्ष्यत्यधुनैवैतत्ता
वकैः शात्रवं बलं ॥ ५ ॥ तेषां तद्विक्रमं वीरा गदसंकर्षणादयः । अमृष्यमाणा नाराचैर्जघ्नुर्हयगजान् रथान् ॥ ६ ॥ पेतुः शिरांसि रथिनामश्विनां गजि
नां भुवि । सकुंडलकिरीटानि सोष्णीषाणि च कोटिशः ॥ ७ ॥ हस्ताः सासिगदेष्वासाः करभा ऊरवोंघ्रयः । अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसि च
॥ ८ ॥ हन्यमानबलानीका वृष्णिभिर्जयकांक्षिभिः । राजानो विमुखा जग्मुर्जरासंधपुरःसराः ॥ ९ ॥ शिशुपालं समभ्येत्य हृतदारमिवातुरं । नष्टत्विषं
गतोत्साहं शुष्यद्वदनमब्रुवन् ॥ १० ॥ भो भोः पुरुषशार्दूल दौर्मनस्यमिमं त्यज । न प्रियाप्रिययो राजन् निष्ठा देहिषु दृश्यते ॥ ११ ॥ यथा दारुमयी योषि
न्नृत्यते कुहकेच्छया । एवमीश्वरतंत्रोयमीहते सुखदुःखयोः ॥ १२ ॥ शौरेः सप्तदशाहं वै संयुगानि पराजितः । त्रयोविंशतिभिः सैन्यैर्जिग्ये एकम
हं परं ॥ १३ ॥ तथाप्यहं न शोचामि न प्रहृष्यामि कर्हिचित् । कालेन दैवयुक्तेन जानन् विद्रावितं जगत् ॥ १४ ॥

८ अप्राप्तदारमेव तं हृतदारमिवातुरं ॥ १० ॥ निष्ठा स्थैर्यं ॥ ११ ॥ कुह
कोनर्त्तयिता तस्येच्छया दुःखेपि ईहमानत्वेन पारवश्यं च क्तं दर्शितं ॥ १२ ॥ अत्र चाहमेव दृष्टांत इत्याह जरासंधः शौरेरिति । कृष्णात्सकाशात् एकं संयुगं परं केवलं अजैषं इति मं वा जि
तवानहं ॥ १३ ॥ दैवमदृष्टं तद्युक्तेन ॥ १४ ॥

१४
राम
१४

फल्गुतंत्रैः स्वल्पसैन्यैः। १५ प्रदक्षिणं अत्र कृष्णं स्यात्। १६। २१। गोपालस्य वेदपालकस्येति वा स्नेवोर्थः। तथा च दुर्मतेरिति शोसनाः अत्र यहवतीडप्येष्वपि मतिर्यस्य तस्येति २२। २३।
यदूनां कुलपांसन कुलदूषण। वक्रतक्ष यदूनां कुलस्य पते। हे अंसन स्वयं चरित्रहननचतुरा अंसस्समाघाते इत्यस्माद्धातोः कर्त्तरि ल्युट् इत्यत्ययो नंद्यादि विहितः। २४। ध्वां

अधुनापि वयं सर्वे वीरयूथपयूथपाः। पराजिताः फल्गुतंत्रैर्यदुसिंहैः कृष्णपालितैः॥ १५॥ रिपवो जिग्युरधुना काल आत्मानुसारिणि। तदा वयं विजेष्यामो यदा दैवं प्रदक्षिणं॥ १६॥ एवं प्रबोधितो मित्रैश्चैद्योऽगात्सानुगः पुरं। हतशेषाः पुनस्तेऽपि ययुः स्वं स्वं पुरं नृपाः॥ १७॥ रुक्मी तु राक्षसोद्वाहं कृष्णद्विडसहन्स्वसुः। पृष्ठतोऽन्वगमत्कृष्णमक्षौहिण्या वृतो बली॥ १८॥ रुक्म्यमर्षी सुसंरब्धः शृण्वतां सर्वभूभुजां। प्रतिजज्ञे महाबाहुर्दंशितः सशरासनः॥ १९॥ अहत्वा समरे कृष्णमप्रत्यूह्य च रुक्मिणीं। कुंडिनं न प्रवेक्ष्यामि सत्यमेतद्ब्रवीमि वः॥ २०॥ इत्युक्त्वा रथमारुह्य सारथिं प्राह सत्वरः। नोदयाश्वान्यतः कृष्णस्तस्य मे संयुगं भवेत्॥ २१॥ अद्याहं निशितैर्बाणैर्गोपालस्य सुदुर्मतेः। नेष्ये वीर्यमदं येन स्वसा मे प्रसभं हृता॥ २२॥ विकत्थमानः कुमतिरीश्वरस्याप्रमाणवित्। रथेनैकेन गोविंदं तिष्ठ तिष्ठेत्यथाह्वयत्॥ २३॥ धनुर्विकृष्य सुदृढं जघ्ने कृष्णं त्रिभिः शरैः। आह चात्र क्षणं तिष्ठ यदूनां कुलपांसन॥ २४॥ क्व यासि मम स्वसारं मे मुषित्वा ध्वांक्षवद्धविः। हरिष्येऽद्य मदं मंद मायिनः कूटयोधिनः॥ २५॥ यावन्न मे हतो बाणैः शयीथा मुंच दारिकां। स्मयन्कृष्णो धनुश्छित्वा षड्भिर्विव्याध रुक्मिणं॥ २६॥ अष्टभिश्चतुरो वाहान्द्वाभ्यां सूतं ध्वजं त्रिभिः। स चान्यद्धनुरादाय कृष्णं विव्याध पंचभिः॥ २७॥ तैस्ताडितः शरौघैस्तु चिच्छेद धनुरच्युतः। पुनरन्यदुपादत्त तदप्यच्छिनदव्ययः॥ २८॥ परिघं पट्टिशं शूलं चर्मासी शक्तितोमरौ। यद्यदायुधमादत्त तत्सर्वं सोऽच्छिनद्धरिः॥ २९॥

क्षः काकः स यथा हविर्मुष्णाति तद्वत्। वक्रतक्ष अध्वांक्षवदिति छेदः सह स्वाक्षवदित्यर्थः। हे मंद स्थिरेत्यर्थः।

रु·भा·द·
१५

३३ परित्रासेनविकंपितान्यंगानियस्याःतया।शुचाशोकेनावशुष्यन्मुखंयस्याःरुद्धःकंठोयस्याः।साचसाचतयाकातर्येणवैक्लव्येनविस्रंसिताहेममयीमालायस्याः
ग्रयागृहीतौपादौयस्यसः ३४ सश्मश्रुकेशं।सहितानिष्ठानेष्ठानेग्रदशिष्टानिश्मश्रूणिकेशाश्चयथाभवंतितथातेनैवासिनाप्रवपन्मुंडयन्नविरूपमकरोत्।तथा

ततोरथादवप्लुत्यखड्गपाणिर्जिघांसया।कृष्णमभ्यद्रवत्क्रुद्धःपतंगइवपावकं॥ ३० ॥तस्यचापततःखड्गंतिलशश्चर्मचेषुभिः।छित्वाऽसिमाददे
तिग्मंरुक्मिणंहंतुमच्युतः॥ ३१ ॥दृष्ट्वाभ्रातृवधोद्योगंरुक्मिणीभयविह्वला।पतित्वापादयोर्भर्तुरुवाचकरुणंसती॥ ३२ ॥योगेश्वराप्रमेयात्म
न्देवदेवजगत्पते।हंतुंनार्हसिकल्याणभ्रातरंमेमहाभुज॥ ३३ ॥शुकउवाच॥ ॥तयापरित्रासविकंपितांगयाशुचाऽवशुष्यन्मुखरुद्धकंठया
।कातर्यविस्रंसितहेममालयागृहीतपादःकरुणोन्यवर्त्तत॥ ३४ ॥चैलेनबद्ध्वातमसाधुकारिणंसश्मश्रुकेशंप्रवपन्व्यरूपयत्।तावन्ममर्दुःपरसैन्यम
द्भुतंयदुप्रवीरानलिनींयथागजाः॥ ३५ ॥कृष्णांतिकमुपव्रज्यददृशुस्तत्ररुक्मिणं।तथाभूतंहतप्रायंदृष्ट्वासंकर्षणोविभुः॥ ३६ ॥विमुच्यबद्धंकरु
णोभगवान्कृष्णमब्रवीत्।असाध्विदंत्वयाकृष्णकृतमस्मज्जुगुप्सितं।वपनंश्मश्रुकेशानांवैरूप्यंसुहृदोवधः॥ ३७ ॥मैवास्मान्साध्व्यसूयेथाभ्रातुर्वैरू
प्यचिंतया।सुखदुःखदोनचान्योस्तियतःस्वकृतभुक्पुमान्॥ ३८ ॥बंधुर्वधार्हदोषोपिनबंधोर्वधमर्हति।त्याज्यःस्वेनैवदोषेणहतःकिंहन्यतेपुनः
॥ ३९ ॥क्षत्रियाणामयंधर्मःप्रजापतिविनिर्मितः।भ्रातापिभ्रातरंहन्याद्येनघोरतरस्ततः॥ ४० ॥राज्यस्यभूमेर्वित्तस्यस्त्रियोमानस्यतेजसः।मानिनोऽ
न्यस्यवाहेतोःश्रीमदांधाःक्षिपंतिहि॥ ४२ ॥

भूतंहतप्रायमित्युक्तैर्वाक्यैष्वनुषंगः॥ ३६ ॥रुक्मिणींसांत्वयन्निमैवास्मानिति॥ ३८ ॥पुनःकृष्णमाक्षिपतिबंधुरिति
३९ पुनर्देवींप्रत्याह।क्षत्रियाणामिति।येनधर्मेणभ्रातापिभ्रातरंहन्यात्ततस्माद्घोरतरःअतिदारुणःधर्मश्चअतश्चकोस्माकंअपराधइतिभावः ४० पुनःश्रीकृष्णं
प्रत्याहराज्यस्येति।तथाप्यस्माकमेतदनुचितमितिभावः॥ ४१ ॥ ॥

राम
१५

पुनर्देवीं प्रत्याह तवैवमिति। सर्वभूतेषु दुर्हृदामहितानां भ्रातॄणां अज्ञवदिदं मन्यसे दुःखमिदं इयं तव विषमा असमीचीना बुद्धिः। कुतः यतस्त्वं देव सुहृदामसद् इमिति। यद्वा सर्वस्ते
सुहृदामपि स्वसुहृदां भद्रमेवेदं दंडरूपं मुंजनमसद् इदं यन्मन्यसे तवैवं विषमा बुद्धिरिति। अथवा। सर्वभूतेषु मध्ये दुर्हृदां शिशुपालादीनामभद्रं सुहृदां सद्भद्रं च यन्मन्यसे तवैवं वि
षमा बुद्धिः समा न भवति। अज्ञवत्। अज्ञानामिव ॥४२॥ कुत इत्यत आह आत्ममोह इति ॥४३॥ परमार्थमाह एक एवेति। परः शुद्धः। ज्योतिष्षु ज्ञानादिर्यथोदकेषु नभो यथा घट
दिष्विति ॥४४॥ कुतस्तर्हि नवं ज्ञातविदात्मानं एकं शुद्धं प्रतीमस्तत्राह देह इति। इदं च मभिभूतं। प्राणाः इंद्रियाण्यध्यात्मं गुणाः शब्दादिनाधिदैवं नत्रितयात्मकः। देहोपाधिनाशुद्धो
न प्रतीयत इत्यर्थः ॥४५॥ ननु देहसंबंधेनापि संसारे सति शुद्धत्वंगमेव तत्राह नात्मन इति। हे सति अन्येन अधिभूतादिना। आत्मनः संयोगवियोगौ न स्तः। कुतः असतः

तवैवं विषमा बुद्धिः सर्वभूतेषु दुर्हृदां। यन्मन्यसे सदा भद्रं सुहृदां भद्रमज्ञवत् ॥४२॥ आत्ममोहो नृणामेव कल्पते देवमायया। सुहृत्दुर्हृदुदासीन इ
ति देहात्ममानिनां ॥४३॥ एक एव परो ह्यात्मा सर्वेषामपि देहिनां। नानेव गृह्यते मूढैर्यथा ज्योतिर्यथा नभः ॥४४॥ देह आद्यंतवानेष द्रव्यप्राणगु
णात्मकः। आत्मन्यविद्यया कॢप्तः संसारयति देहिनं ॥४५॥ नात्मनोऽन्येन संयोगो वियोगश्चासतः सति। तद्धेतुत्वात्तत्प्रसिद्धेर्दृग्रूपाभ्यां यथा रवेः ॥४६॥

असत्त्वादन्यस्येत्यर्थः। कुतोऽसत्त्वं तत्राह। तद्धेतुत्वादिति। तस्यान्यस्य भूतेंद्रियादेः प्रसिद्धेः प्रकाशस्य तद्धेतुत्वात्। आत्महेतुकत्वात्। ननु देवैरधिष्ठिते सर्वेंद्रियसं
भूतानां प्रतीतिः प्रसिद्धा। भूतप्रतीत्या च तत्प्रसिद्धिर्नात्मन इत्यत आह। दृग्रूपाभ्यां यथा प्रकाश्यप्रकाशकत्वेन वर्तमानयोरपि चक्षूरूपयोः रवेः सकाशात्प्रसि
द्धिः द्वयोरपि तैजसत्वात्तदभेदश्च। तथा भूतेंद्रियादीनां परस्परसिद्धानामपि चैतन्याधीन एव प्रकाशः। तत्कार्यत्वाच्च तद्व्यतिरेकेणासत्त्वं चेत्यर्थः। तथा च द्वाद
शे वक्ष्यति। दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथग्भवेत्। एवं धीः खानि मात्राश्च स्फुरंत्यन्यतमादृतादिति। यद्वा रवेः प्रसिद्धास्तामेव दृग्रूपाभ्यां परस्परप्रसिद्धिर्य
था तद्वदिति ॥४६॥ ॥

द० उ०
१६

देहसंबंधासावादेवनात्मनोजन्मादयोपीतिवक्तुंजन्मादीनांदेहधर्मत्वमाहजन्मादयस्त्विति। कथंतर्हिजातोहंबालोहंवृद्धोहमितिआत्मनिजन्मादिप्रतीतिः देहजन्मादिनैवेतिसदृष्टांतमाहकलानामिवेति। इंदोःकलानामेवजन्मादयोनत्विंदोर्यथातद्वत्। यथाचकलानाशादेवकुहूरमावास्याइंदुक्षयउच्यते। तद्वदस्यात्मनोदेहनाशादेवमृतिव्यवहारइत्यर्थः ॥४७॥ नन्वात्मनोदेहादिसंबंधाभावेकथंभोक्तृभोग्यसंगप्रतीतिरित्याशंक्यस्वप्नदृष्टांतेनसमर्थयतियथाशयानइति। आत्मानभो

जन्मादयस्तुदेहस्यविक्रियानात्मनःक्वचित्। कलानामिवनैवेंदोर्मृतिर्ह्यस्यकुहूरिव ॥४७॥ यथाशयानआत्मानंविषयान्फलमेवच। अनुभुंक्तेप्यसत्यर्थेतथाप्नोत्यबुधोभवं ॥४८॥ तस्मादज्ञानजंशोकमात्मशोषविमोहनं। तत्त्वज्ञानेननिर्हृत्यस्वस्थाभवशुचिस्मिते ॥४९॥ शुकउवाच ॥ एवंभगवतातन्वीरामेणप्रतिबोधिता। वैमनस्यंपरित्यज्यमनोबुद्ध्यासमादधे ॥५०॥ प्राणावशेषउत्सृष्टोद्विड्भिर्हतबलप्रभः। स्मरन्विरूपकरणंवितथात्ममनोरथः ॥५१॥ चक्रेभोजकटंनामनिवासायमहत्पुरं। अहत्वादुर्मतिंकृष्णमप्रत्यूह्ययवीयसीं ॥५२॥ कुंडिनंनप्रवेक्ष्यामीत्युक्त्वातत्रावसद्रुषा। भगवान्भीष्मकसुतामेवंनिर्जित्यभूमिपान्। पुरमानीयविधिवदुपयेमेकुरूद्वह ॥५४॥ तदामहोत्सवोनृणांयदुपुर्यांगृहेगृहे॥ अभूदनन्यभावानांकृष्णेयदुपतौनृप ॥५५॥ नरानार्यश्चमुदिताःप्रमृष्टमणिकुंडलाः। पारिबर्हमुपाजह्रुर्वरयोश्चित्रवाससोः ॥५६॥

क्तारंविषयान्भोगसाधनान्फलंभोगंअसत्यप्यर्थेअनुभुंक्ते। तथाबुधःसंसारंप्राप्नोतीति ॥४८॥ आत्मानंशोषयतिविमोहयतिचेतितथातंनिर्हृत्यअपाकृत्य ॥४९॥ समादधेसमाहितमकरोत् ॥५०॥ रुक्मिणस्त्वेवंश्रुतवतोनाज्ञाननिवृत्तमितिदर्शयन्नाहप्राणावशेषइति ॥५१॥ अहत्वाअहत्वाःदुर्मतिमितिचसत्योर्थः। अप्रत्यूह्यअनावर्त्यअप्रतिबुध्येतिउसत्यं। यवीयसीमिस्सारंयत्रविरूपितस्तत्रैवावसत्। यत्रवसेजकटंनामपुरमभवत् ॥५२॥ वरयोर्वरवध्वोःदेयमुपस्करं ॥५५॥

राम
१६

उक्तं सितैरिति ध्वजविशेषैः पल्लवानि मंगलानि लाजांकुरपुष्पप्रकारादीनि तैः ॥ ५६ आहृता आहूताः प्रेष्ठाः सुजनप्रेष्यगणैः परामृष्टात उच्छ्रितारंभाश्च स्रगाद्यैः
रूपशोभितां । यद्वा तैरेव गणैः परामृष्टा संस्पृष्टा रंभा स्वैः रूपशोभितां ॥ ५७ संभ्रमादौत्सुक्यात्परिधावतां बंधूनां मध्ये मिथः समेत्य मुदं प्रापुः ॥ ५८ ॥ इति दशमे चतुः
पंचाशत्तमः ॥ ॥ पंचपंचाशत्तमे तु प्रद्युम्नोऽजनि स्तूयते । शंबरेण हृतः सोऽथ हत्वा तं कांतया गमत् ॥ १ ॥ प्रद्युम्नहानिलाभाद्यैः शंबराहरणादिना । कुटुंबिनामपत्या

मार्ग्विपर्यन्तसितैर्ध्वजैकेतुभिर्विचित्रमालांबररत्नतोरणैः । बभौ प्रतिद्वार्युपक्लृप्तमंगलैरापूर्णकुंभागुरुधूपदीपकैः ॥ ५६ ॥ सिक्तमार्गा मदच्युद्भिरा
हूतप्रेष्ठभूभुजां । गजैर्द्वाःसु परामृष्टरंभापूगोपशोभिता ॥ ५७ ॥ कुरुसृंजयकैकेयविदर्भयदुकुंतयः । मिथो मुमुदिरे तस्मिन्संभ्रमात्परिधावतां
॥ ५८ ॥ रुक्मिण्या हरणं श्रुत्वा गीयमानं ततस्ततः । राजानो राजकन्याश्च बभूवुर्भृशविस्मिताः ॥ ५९ ॥ द्वारकायामभूद्राजन्महामोदः पुरौकसां ॥ रु
क्मिण्या रमयोपेतं दृष्ट्वा कृष्णं जगत्पतिं ॥ ६० ॥ इति श्रीभागवते महापुराणे दशमस्कंधे रुक्मिण्युद्वाहोत्सवो नाम चतुःपंचाशत्तमोऽध्यायः
॥ ॥ श्रीशुक उ० ॥ कामस्तु वासुदेवांशो दग्धः प्राग्रुद्रमन्युना । देहोपपत्तये भूयस्तमेव प्रत्यपद्यत ॥ १ ॥ स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्
भवः । प्रद्युम्न इति विख्यातः सर्वतोऽनवमः पितुः ॥ २ ॥

दिसुखदुःखमभूत्सुचतुः ॥ २ ॥ जांबवत्यादिविवाहेभ्यः प्रागेव प्रद्युम्नजन्म । ततः विवाहाः । ततः शंबरगृहात्प्रद्युम्नप्रत्यागमनं । अतः पुत्रकथनप्रस्तावेपि प्रथमं प्र
द्युम्नस्य जातमात्रस्य शंबरेण हरणं निरूप्यते । प्रत्यागमनं तूत्तरकालीनमपि कथापर्यवसानायात्रोक्तमिति । वासुदेवाधिष्ठितचित्तप्रभवत्वाद्वासुदेवांशः ।
सृष्टिहेतुत्वाद्वा देहोपपत्तये देहप्राप्तये ॥ १ ॥ अनवमः अन्यूनः ॥ २ ॥ ॥

५ । १७

सप्रसिद्धः कामशत्रुः शंबरस्तमात्मनः शत्रुं विदित्वा हृत्वा समुद्रे प्रास्य प्रक्षिप्य गृहमगादिति ३ निर्जगार गिलितवान् ४ छुरिधितिना शस्त्रिकया अवयवन् अवाय
न् खंडितवंतः ५ तत्त्वं कामोयं तव भर्त्तेति । उत्पत्तिं श्रीकृष्णात् रुक्मिण्यामुत्पन्न इति ६ यशस्विनी पतिव्रता भर्तृदेहप्राप्तिं प्रतीक्षमाणा ७ तं शिशुं कामदेवं बुध्वा

तं शंबरः कामरूपी हृत्वातोकमनिर्दशं । स विदित्वात्मनः शत्रुं प्रास्योदन्वत्यगाद्गृहं ३ तं निर्जगार बलवान्मीनः सोप्यपरैः सह । वृतो जालेन
महता गृहीतो मत्स्यजीविभिः । तं शंबराय कैवर्त्ता उपाजह्रुरुपायनं ४ सूदा महानसं नीत्वा ऽवद्यन्सुधितिनाद्भुतं । दृष्ट्वा तदुदरे बालं मायाव
त्यै न्यवेदयन् ५ नारदोऽकथयत्सर्वं तस्याः संकितचेतसः । बालस्य तत्त्वमुत्पत्तिं मत्स्योदरनिवेशनं ६ सा च कामस्य वै पत्नी रतिर्नाम यश
स्विनी । पत्युर्निर्दग्धदेहस्य देहोत्पत्तिं प्रतीक्षती ७ निरूपिता शंबरेण सा सूपोदनसाधने । कामदेवं शिशुं बुध्वा चक्रे स्नेहं तदार्भके ८ नाति
दीर्घेण कालेन स कार्ष्णी रूढयौवनः । जनयामास नारीणां वीक्षतीनां च विभ्रमं ९ सा तं पतिं पद्मदलायतेक्षणं प्रलंबबाहुं नरलोकसुंदरं । सव्रीड
हासोत्तभितभ्रुवेक्षती प्रीत्योपतस्थे रतिरंग सौरतैः १० तमाह भगवान्कार्ष्णिर्मातस्ते मतिरन्यथा । मातृभावमतिक्रम्य वर्तसे कामिनी यथा
११ रतिरुवाच सवान्नारायणसुतः शंबरेणाहृतो गृहात् । अहं तेधिकृता पत्नी रतिः कामो भवान्प्रभो १२ एष त्वानिर्दशं सिंधावक्षिप
च्छंबरोऽसुरः । मत्स्योऽग्रसीत्तदुदरादिह प्राप्तो भवान्प्रभो १३ तमिमं जहि दुर्द्धर्षं दुर्जयं शत्रुमात्मनः । मायाशतविदं त्वं च मायाभिर्मोहनादि

८ विभ्रमं संमोहं ९ अंगहिरानन्सौरतैर्लीलाचेष्टैः उपतस्थे असेवत १० ११ अधिकृता पत्नी त्वत्र हेतुः रतिर्हंस वा कामइति १२ १३ दुर्जै तिः १४
शं वै हेतुः । मायाशतविदमिति । कथं तर्हि हंतव्य स्तत्राह मायाभिरिति १४

राम । १७

नात्रविलंबः कार्यइत्याह। परिशोचतिरोदितीत्यर्थः ॥१५॥ न ॥ वज्रस्यनिःपेषोनिर्घातोयथानिष्ठुरस्तीव्रोनादोभवति। तथाभूतंनादंव्यनदत्। सामान्यविशेषतया
यथापुष्पयंपकलंबओदनंपाकंपचतीतिवत्। अतिनिष्ठुरंनादमकरोदित्यर्थः ॥१९॥२०॥ वैहायसः आकाशेस्थितः ॥२१॥ सत्वात्मिकांसत्वगुणमयीं। प्रयुंक्तेतुनरस्था

परिशोचतितेमाताकुररीवगतप्रजा। पुत्रस्नेहाकुलादीनाविवत्सागौरिवातुरा ॥१५॥ प्रभाष्यैवंददौविद्यांप्रद्युम्नायमहात्मने। मायावतीमहा
मायांसर्वमायाविनाशनीं ॥१६॥ सचशंबरमभ्येत्यसंयुगायसमाह्वयत्। अविषह्यैस्तमाक्षेपैःक्षिपंत्संजनयत्कलिं ॥१७॥ सोऽभिशप्तोदुर्वचो
भिःपदाहतइवोरगः। निश्चक्रामगदापाणिरमर्षात्ताम्रलोचनः ॥१८॥ गदामाविध्यतरसाप्रद्युम्नायमहात्मने। प्रक्षिप्यव्यनदन्नादंवज्रनिःपेषनि
ष्ठुरं ॥१९॥ तामापतंतींभगवान्प्रद्युम्नोगदयागदां। अपास्यशत्रवेक्रुद्धःप्राहिणोत्स्वगदांनृप ॥२०॥ सचमायांसमाश्रित्यदैतेयमयदर्शितां। मुमुचेऽ
स्त्रमयंवर्षंकार्ष्णौवैहायसोऽसुरः ॥२१॥ बाध्यमानोऽस्त्रवर्षेणरौक्मिणेयोमहारथः। सत्वात्मिकांमहाविद्यांसर्वमायोपमर्दिनीं ॥२२॥ ततोगौह्य
कगांधर्वपैशाचोरगराक्षसीः। प्रायुंक्तशतशोदैत्यःकार्ष्णिर्व्यधमयत्सताः ॥२३॥ निशातमसिमुद्यम्यसकिरीटंसकुंडलं। शंबरस्यशिरःकाया
त्ताम्रश्मश्र्वोजसाहरत् ॥२४॥ आकीर्यमाणोदिविजैःस्तुवद्भिःकुसुमोत्करैः। भार्ययांबरचारिण्यापुरंनीतोविहायसा ॥२५॥ अंतःपुरवरंराज
न्ललनाशतसंकुलं। विवेशपत्न्यागगनाद्विद्युतेवबलाहकः ॥२६॥ तंदृष्ट्वाजलदश्यामंपीतकौसेयवाससं। प्रलंबबाहुंताम्राक्षंसुस्मितंरु
चिराननं ॥२७॥ स्वलंकृतमुखांभोजंनीलवक्रालकालिभिः। कृष्णंमत्वास्त्रियोह्रीतानिलिल्युस्तत्रतत्रह ॥२८॥

नुषंगः ॥२२॥ ताःमायाःव्यधमयत्व्यनाशयत् ॥२३॥ ताम्राणिश्मश्रूणियस्मिन्तत्ओजसाबलेन ॥२४॥ विद्युतासहबलाहकोमेघइव ॥२६॥२७॥ नीलाश्चवक्राश्च
येऽलकास्तएवालयः। तैः ह्रीताः लज्जिताः ॥२८॥ ॥

श्रीकृष्णेन सवतीत्यवधार्य्य सखीरत्नं श्रेष्ठा रतिः। तत्सहितं २९ ३० श्रुतं स्मरंत्याह। कोन्वयमिति। नरवैदूर्य्यः पुरुषश्रेष्ठः ३१ एतेन तुल्यं वयो रूपं च यस्य स सत्त्ववेदिति ३२ त स्य स्वपुत्रत्वं संभावयंत्याह कथंत्विति ३३ तदेवाधिकं संभावयति। स एवेति ३४ देवक्या नकदुंदुभ्यां देवक्यानकदुंदुभि अस्थामित्यर्थः ३५ ९ अतिसौंदर्य्येण प्रद्युम्न मनु

अवधार्य शनैरीषद्दैलक्ष्येणेन योषितः। उपजग्मुः प्रमुदिताः सखीरत्नं सुविस्मिताः २९ अथ तत्रासितापांगी वैदर्भी वल्गुभाषिणी। अस्मरत्स्वसु तं नष्टं स्नेहस्नुतपयोधरा ३० को न्वयं नरवैदूर्य्यः कस्य वा कमलेक्षणः। धृतः कया वा जठरे केयं लब्धा त्वनेन वा ३१ मम चाप्यात्मजो नष्टो नी तो यः सूतिकागृहात्। एतत्तुल्यवयोरूपो यदि जीवति कुत्रचित् ३२ कथं त्वनेन संप्राप्तं सारूप्यं शार्ङ्गधन्वनः। आकृत्याऽवयवैर्गत्या स्वरहासावलोक नैः ३३ स एव वा भवेन्नूनं यो मे गर्भे धृतोऽर्भकः। अमुष्मिन्प्रीतिरधिका वामः स्फुरति मे भुजः ३४ एवं मीमांसमानायां वैदर्भ्यां देवकीसुतः। देवक्या नकदुंदुभ्यामुत्तमश्लोक आगमत् ३५ विज्ञातार्थोऽपि भगवांस्तूष्णीमास जनार्दनः। नारदोऽकथयत्सर्वं शंबराहरणादिकं ३६ तच्छ्रुत्वा महदा श्चर्यं कृष्णांतःपुरयोषितः। अभ्यनंदन्बहूनब्दान्नष्टं मृतमिवागतं ३७ देवकी वसुदेवश्च कृष्णरामौ तथा स्त्रियः। दंपती तौ परिष्वज्य रुक्मिणी च ययु मुदं ३८ नष्टं प्रद्युम्नमायातमाकर्ण्य द्वारकौकसः। अहो मृत इवायातो बालो दिष्ट्येति हाब्रुवन् ३९ यं वै मुहुः पितृसरूपनिजेशभावास्तन्मातरो यदभजन्रहरूढभावाः। चित्रं न तत्खलु रमास्पदबिंबबिंबे कामे स्मरेऽक्षिविषये किमुतान्यनार्य्यः ४० इति भा· म· द· शंबरवधो नाम पंचपंचाश त्तमोऽध्यायः ॥ ॥

वर्णयति यमिति। पिता श्रीकृष्णः तत्सरूपे प्रद्युम्ने निजं आत्मीयं ईशः स्वामीति सावो सावना यासां तास्तन्मातरः कृष्णपत्न्यो पि रहसि निरू ढभावाः सत्यो यमभजंस्तन्नितियद्दानखलु चित्रं। कथं सति स्मरे स्मर्यमाणे त्वेनैव हेतुः सकेकामे अक्षिविषये सति। किंच। रमास्पदबिंबबिंबे रमास्पदं श्रीकृष्णस्तस्य बिंबं मू र्तिस्तस्य बिंबे प्रतिबिंबे पुनस्तेतदा किमुव क्तव्यं अन्यनार्य्यो भेजुरिति ४० इति दशमे पंचपंचाशमः ॥ ॥

षट्पंचाशत्तमेमिथ्याऽसियोगेमणिमाहरत्। कन्यांजांबवतः प्राप कृष्णः सत्राजितस्तथा॥१॥ पुत्रादिकामसौख्यस्थनिष्ठासुत्स्फाऽतिचंचलां। अर्थस्यानर्थतामाह स्यमंताहर
णादिना॥२॥ सत्यभामाजांबवत्योर्विवाहप्रस्तावायस्यमंतकाख्यानमाह सत्राजित इति। सत्राजित इत्यकारांतः क्वचिन्नकारांतोप्यत्वयाऽनुसारेणद्रष्टव्यः कृतापराध
संछांतयेस्वयमेवोद्यमं कृत्वा मणिना सह प्रादादिति॥१॥ भक्तस्य सत्राजितः सूर्यः स्वाम्यपि सखेवासीदित्यर्थः। स च तुष्टस्तस्मै स्यमंतकं नाम मणिं प्रादात्। प्रीतः स्निग्धः

श्रीशुक उवाच॥ ॥सत्राजितः स्वतनयां कृष्णाय कृतकिल्बिषः। स्यमंतकेन मणिना स्वयमुद्यम्य दत्तवान्॥१॥ ॥राजोवाच॥ ॥सत्राजितः किमकरो
द्ब्रह्मन्कृष्णस्य किल्बिषं। स्यमंतकः कुतस्तस्य कस्माद्दत्ता सुता हरेः॥२॥ श्रीशुक उवाच॥ ॥आसीत्सत्राजितः सूर्यो भक्तस्य परमः सखा। प्रीत
स्तस्मै मणिं प्रादात्सूर्यस्तुष्टः स्यमंतकं॥३॥ स तं बिभ्रन्मणिं कंठे भ्राजमानो यथा रविः। प्रविष्टो द्वारकां राजंस्तेजसा नोपलक्षितः॥४॥ तं विलोक्य
जना दूरात्तेजसा मुष्टदृष्टयः। दीव्यतेऽक्षैर्भगवते शशंसुः सूर्यशंकिताः॥५॥ नारायण नमस्तेस्तु शंखचक्रगदाधर। दामोदरारविंदाक्ष गोविंद यदुनं
द॥६॥ एष आयाति सविता त्वां दिदृक्षुर्जगत्पते। मुष्णन्गभस्तिचक्रेण नृणां चक्षूंषि तिग्मगुः॥७॥ नन्वन्विच्छंति ते मार्गं त्रिलोक्यां विबुधर्षभाः। ज्ञात्वाद्य गूढं
यदुषु द्रष्टुं त्वां यात्यजः प्रभो॥८॥ श्रीशुक उवाच॥ ॥निशम्य बालवचनं प्रहस्यांबुजलोचनः। प्राह नासौ रविर्देवः सत्राजिन्मणिना ज्वलन्॥९॥

३ नोपलक्षितः सत्राजितोसावित्यविज्ञातः॥४॥ दीव्यते क्रीडते सूर्योयमिति शंकिताः संतः कथयामासुरिति॥५॥ सूर्यं नमस्कार्यमागतं कल्पयित्वोदि
त्कसक्रीनांसंबोधनानि नारायणेत्यादीनि॥६॥ गभस्तिचक्रेण रश्मिजालेन। मुष्णन्प्रतिघ्नन् तिग्माः तीक्ष्णा गावो रश्मयो यस्य सः॥७॥ नन्वेदमघटमानमित्याशं
नन्विति। अन्विच्छंति मृगयंते। अजः सूर्यः॥८॥ बालानामज्ञानां वचनं। ज्वलन् विद्योतमानः॥९॥ ॥

द० उ०
१९

कृतानि कौतुकेनोत्सुवेन मंगलानि यस्मिंस्तत् विप्रैः कृत्वा ॥ १० ॥ भारप्रमाणं चावतुर्सिर्व्रीहिभिर्गुंजं गुंजाः पंच पणं पणाष्टौ धरणमष्टौ च कर्षस्तु तांश्चतुरः पलं ।
तुलां पलशतं प्राहुर्भारः स्याद्विंशतिस्तुला इति । मारी नाम महाकालमृत्युः । अरिष्टमभद्रं अशुभा दुःखहेतवः ॥ ११ ॥ क्वापि कदाचित् । अनेन भगवत्यप्रमर्याद्स्वयमयभोजि

सत्राजित्स्वगृहं श्रीमत्कृतकौतुकमंगलं । प्रविश्य देवसदने मणिं विप्रैर्न्यवेशयत् ॥ १० ॥ दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो । दुर्भिक्षमार्यरिष्टानि स
र्पाधिव्याधयोऽशुभाः । न संति मायिनस्तत्र यत्रास्तेऽभ्यर्चितो मणिः ॥ ११ ॥ स याचितो मणिं क्वापि यदुराजाय शौरिणा । नैवार्थकामुकः प्रादाद्याच्ञाभंग
मतर्कयन् ॥ १२ ॥ तमेकदा मणिं कंठे प्रतिमुच्य महाप्रभं । प्रसेनो हयमारुह्य मृगयां व्यचरद्वने ॥ १३ ॥ प्रसेनं सहयं हत्वा मणिमाच्छिद्य केशरी । गिरिं वि
शन्जांबवता निहतो मणिमिच्छता ॥ १४ ॥ सोपि चक्रे कुमारस्य मणिं क्रीडनकं बिले । अपश्यन्भ्रातरं भ्राता सत्राजित्पर्यतप्यत ॥ १५ ॥ प्रायः कृष्णेन
निहतो मणिग्रीवो वनं गतः । भ्राता ममेति तच्छ्रुत्वा कर्णे कर्णेऽजपंजनाः ॥ १६ ॥ भगवांस्तदुपश्रुत्य दुर्यशो लिप्तमात्मनि । मार्ष्टुं प्रसेनपदवीमन्वपद्यत
नागरैः ॥ १७ ॥ हतं प्रसेनमश्वं च वीक्ष्य केशरिणा वने । तं चाद्रिपृष्ठे निहतमृक्षेण ददृशुर्जनाः ॥ १८ ॥ स ऋक्षराजबिलं भीममंधेन तमसावृतं । एको वि
वेश भगवानवस्थाप्य बहिः प्रजाः ॥ १९ ॥ तत्र दृष्ट्वा मणिश्रेष्ठं बालक्रीडनकं कृतं । हर्तुं कृतमतिस्तस्मिन्नवतस्थेऽर्भकांतिके ॥ २० ॥ तमपूर्वं नरं दृष्ट्वा
धात्री चुक्रोश भीतवत् । तच्छ्रुत्वाऽभ्यद्रवत्क्रुद्धो जांबवान्बलिनां वरः ॥ २१ ॥ स वै भगवता तेन युयुधे स्वामिनात्मनः । पुरुषं प्राकृतं मत्वा कुपि
तो नानुभाववित् ॥ २२ ॥

नः सर्वानिष्टनिवर्तकमपि अनिष्टहेतुरेव सवतीति सूचितं ॥ १२ ॥ तदेव दर्शयितुमाह । तमेकदेति । प्रतिमुच्य बध्वा प्रसेनः सत्राजि
त्भ्राता ॥ १३ ॥ आच्छिद्य आकृष्य गृहीत्वा ॥ १४ ॥ १५ ॥ अजपन् उपांशु वोचन् ॥ १६ ॥ २२ ॥ ॥ ॥ १ ॥

रा २

राम
१९

कृत्यार्थेऽभिषार्थे २३ अष्टविंशाहं। अष्टचविंशतिश्चअहानियस्मिंस्तत्। अष्टाविंशत्यहं विंशतिशब्देतिलोपश्चार्षः। वज्रस्यनिःपेषोनिर्घातः तद्वत्परुषैर्निष्ठुरैः २४
श्रीकृष्णस्य मुष्टीनां विनिःपातैराघातैर्विनिष्पिष्टानिविश्लथान्यंगानामुरूणि बंधनानि संश्लिष्टस्थानानियस्यसः॥२५॥ लोकेकोवाऽयंमत्तोवलीयानितिविस्मितःस
विष्टथाहज्ञानेइति। सर्वभूतानांयःप्राणस्तत्त्वयदोजःसहोबलंचइंद्रियहृदयदेहबलानितत्सर्वंत्वमित्यहंजानेकथंतथात्वमतआह। विष्णुमित्यादि २६ पुराण
त्वेहेतुःत्वंहीति। स्रष्टानिमित्तं। यश्चसत्उपादानं अतःपुराणःप्रभविष्णुत्वेहेतुः। कालइति। अधीश्वरस्त्वमप्यतएवेत्याहईशःपरइति। नचतटस्थइत्याहआत्मना

द्वंद्वयुद्धंसुतुमुलमुभयोर्विजिगीषतोः। आयुधाश्मद्रुमैर्दोर्भिः कृत्यार्थेश्येनयोरिव॥२३॥ आसीत्तदष्टाविंशाहमितेरतरमुष्टिभिः। वज्रनिःपेषपरुषै
रविश्रममहर्निशं॥२४॥ कृष्णमुष्टिविनिःपातनिष्पिष्टांगोरुबंधनः। क्षीणसत्वःस्विन्नगात्रस्तमाहातीवविस्मितः॥२५॥ जानेत्वांसर्वभूतानांप्राणओजः
सहोबलं। विष्णुंपुराणपुरुषंप्रभविष्णुमधीश्वरं॥२६॥ त्वंहिविश्वसृजांस्रष्टासृष्टानामपियच्चसत्। कालःकलयतामीशःपरमात्मातथात्मनां
॥२७॥ यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशत्क्षुभितनक्रतिमिंगिलोऽब्धिः। सेतुःकृतःस्वयशउज्ज्वलितावलंकारक्षःशिरांसिभुविपेतु
रिषुक्षतानि॥२८॥ इतिविज्ञातविज्ञानमृक्षराजानमच्युतः। व्याजहारमहाराजभगवान्देवकीसुतः॥२९॥

मात्मेति २७ यतएवंभूतोऽतोममेष्टदेवंरघुनाथएवत्वमित्याहयस्येति। ईषदुत्कलितउद्दीपितोयोरोषस्तेनयेकटाक्षमोक्षास्तैःक्षुभिता। नक्राग्राहास्तिमिंगिला
महामत्स्याश्चयस्मिन्सोऽब्धिर्वर्त्मादिशत्दत्तवान्। तथापितस्मिन्येनस्वयशएवसेतुःकृतः। उज्ज्वलितावदग्धायस्येषुभिःकृतानिछिन्नानिरक्षसोदशग्रीवस्य।
शिरांसिभुविपेतुःसएवतत्त्वमितिजाने २८ इतिविज्ञातंविज्ञानंयेनतं। विज्ञानशब्दःकरणसाधनःकर्मसाधनोवाऋक्षराजंप्रत्युक्तवान् २९

३० वयं हि वह्वो विलद्वारं प्राप्ताः तत्र मिथ्याभिशापमृजनामणिना प्रष्टजनं प्रमार्ष्टुं अहमंतर्विलं प्राप्त इत्यर्थः ३१ सहमणिना समर्पयामास ३२ ३४ श्रीकृष्ण प्राप्तये चंडभागानामडर्गामभजन् ३५ सचकृष्णस्तेषां प्रादुर्बभूव असवदृतिपाठे। असवइंद्रियाणि तेषां प्रेष्ठ इत्यर्थः। कदा देव्या उपस्थानात् तयानान्यति आदिष्टा

अरिमृष्टश्पारविंदाकृः पाणिना शंकरेण तां कृपया परया सक्तं प्रेमगंभीरया गिरा ३० मणिहेतोरिह प्राप्ता वयमृक्षपते बिलं। मिथ्याभिशापं प्रमृ
जन्नात्मनो मणिनाऽमुना ३१ इत्युक्तः स्वां दुहितरं कन्यां जांबवतीं मुदा। अर्हणार्थं समणिना कृष्णायोपजहार ह ३२ अदृष्ट्वा निर्गमं शौरेः प्र
विष्टस्य बिलं जनाः। प्रतीक्ष्य द्वादशाहानि दुःखिताः स्वपुरं ययुः ३३ निशम्य देवकी देवी रुक्मिण्यानकदुंदुभिः। सुहृदो ज्ञातयोऽशोचन्बिलात्
कृष्णमनिर्गतं ३४ सत्राजितं शपंतस्ते दुःखिता द्वारकौकसः। उपतस्थुर्महामायां दुर्गां कृष्णोपलब्धये ३५ तेषां तु देव्युपस्थानात्प्रत्यादिष्टा
शिषा सह। प्रादुर्बभूव सिद्धार्थः सदारो हर्षयन्हरिः ३६ उपलभ्य हृषीकेशं मृतं पुनरिहागतं। सहपत्न्या मणिग्रीवं सर्वे जातमहोत्सवाः ३७
सत्राजितं समाहूय सभायां राजसन्निधौ। प्राप्तिं चाख्याय भगवान्मणिं तस्मै न्यवेदयत् ३८ सचातिव्रीडितो रत्नं गृहीत्वाऽवाङ्मुखस्ततः। अनु
तप्यमानो भवनमगमत्स्वेन पाप्मना ३९ सोऽनुध्यायंस्तदेवाघं बलवद्विग्रहाकुलः। कथं मृज्याम्यात्मरजः प्रसीदेद्वाऽच्युतः कथं ४० किं कृ
त्वा साधु मह्यं स्यान्न शपेद्वा जनो यथा। अदीर्घदर्शनं क्षुद्रं मूढं द्रविणलोलुपं ४१

दत्ताया आशीः कृष्णं इकृथेति तया सह वै ३६ यदि लोके जनाः कथंचिन्मृतं बंधुं पुनरागतं उपलभंते तद्वदुपलभ्य सर्वे जातमहोत्सवा आसन्निति ३७ पाप्म
ना अपराधेनानुतप्यमानः ३९ अघं दोषं। आत्मनो रजः मलं अपराधमिति ४० किं कृत्वा कस्मिन्कृते इत्यर्थः। साधु मह्यं अदीर्घदर्शनं अविचारकं मां क्षुद्रं कृप
णं मूढं मंदमतिं ४१ ॥

एवं ध्यायंस्तूपायं निश्चिनोति दास्य इति श्रीरत्नं दुहितरं तावद्दास्यामि तदनंतरं परिवर्हत्वेन रत्नमपीति ॥ ४२ ॥ ४३ ॥ वज्ञसिः कृतवर्मादिभिः ॥ ४४ ॥ मणिं न प्रतीच्छामः
नष्टी कुर्मः । देवः सूर्यः तद्भक्तश्चेति कटाक्षः फलभागिन इति तवापुत्रत्वात्त्वदीयं धनमस्माकमेवेति गूढोभिप्रायः ॥ ४५ ॥ इति दशमे षट्पंचाशत्तमः ॥ सप्तपं
चाशत्तमे तु पुनः शतधनुर्वधे । प्राप्तं स्यमंतकं शोभार्ष्टिं कृष्णोऽक्रूराद्धृतान्मणेः ॥ १ ॥ अक्रूरमुररीकृत्य मणेः पात्रमथाच्युतः । उपमंत्र्यत मे कांते सरामो गाङ्गजाहृतं ॥ २

दास्ये दुहितरं तस्मै स्त्रीरत्नं रत्नमेव च । उपायोयं समीचीनस्तस्य शांतिर्न चान्यथा ॥ ४२ ॥ एवं व्यवसितो बुद्ध्या सत्राजित्स्वसुतां शुभां । मणिं च स्वयमुद्य
म्य कृष्णायोपजहार ह ॥ ४३ ॥ तां सत्यभामां भगवानुपयेमे यथाविधि । बहुभिर्याचितां शीलरूपौदार्यगुणान्वितां ॥ ४४ ॥ भगवानाह न मणिं प्रती
च्छामो वयं नृप । तवास्तां देवभक्तस्य वयं तु फलभागिनः ॥ ४५ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे स्यमंतकोपाख्याने षट्पंचाशत्तमोऽध्या
यः ॥ ॥ श्रीशुक उवाच ॥ विज्ञातार्थोपि गोविंदो दग्धानाकर्ण्य पांडवान् । कुंतीं च कुल्यकरणे सहरामो ययौ कुरून् ॥ १ ॥ भीष्मं कृपं सविदुरं गां
धारीं द्रोणमेव च । तुल्यदुःखौ च संगम्य हा कष्टमिति होचतुः ॥ २ ॥ लब्ध्वैतदंतरं राजन् शतधन्वानमूचतुः । अक्रूरकृतवर्माणौ मणिः कस्मान्न गृह्यते
॥ ३ ॥ योस्मभ्यं संप्रतिश्रुत्य कन्यारत्नं विगर्ह्य नः । कृष्णायादान्न सत्राजित्कस्माद्भ्रातरमन्वियात् ॥ ४ ॥ एवं भिन्नमतिस्ताभ्यां सत्राजितमसत्तमः ।
शयानमवधील्लोभात्स पापः क्षीणजीवितः ॥ ५

सत्राजितः कृष्णाज्ञासंगफलं व्यक्तीकर्तुमाह विज्ञातार्थोपीति । पांडवा विलद्वारेण जतुगृहान्निर्गता
इत्येवं विज्ञातार्थो येन सः । कुंतीं च दग्धामाकर्ण्य कुल्यकरणे कुलोचितसंव्यवहारार्थं ॥ १ ॥ अन्येषां तद्बाहुदुःखानां वा गांधार्यादीनां संगम्येत्युक्तं ॥ २ ॥ ३ ॥ ननु
जीवन्सत्राजित्कथं मणिं दास्यति । तत्रोचतुः योऽस्मभ्यमिति । भ्रातरं प्रसेनं दृष्टं कस्मान्नान्वियात् नानुगच्छेत् म्रियतामित्यर्थः ॥ ४ ॥

इ.उ.
२१

जग्मिवान्जगाम ॥ ११ ॥ हेलनंप्रतिकृष्णंचजिनंअपराधं ॥ १२ ॥ अपीतोऽसृतःसप्तदशसंख्याकान्संयुगान् ॥ १३ ॥ ४ तौरामकृष्णौएकमेवतत्वमित्यभिज्ञेत्याहूय

स्त्रीणांविक्रोशमानानांक्रंदतीनामनाथवत् ।हत्वापशून्सौनिकवन्मणिमादायजग्मिवान् ॥ ६ ॥ सत्यभामाचपितरंहतंवीक्ष्यशुचार्पिता ।प्रल
पन्नाततातेतिहाहतास्मीतिमुह्यती ॥ ७ ॥ तैलद्रोण्यांघृतंशास्यजगामगजसाह्वयं ।कृष्णायविदितार्थायतप्ताचख्यौपितुर्वधं ॥ ८ ॥ तदाकर्णेश्व
रौराजन्ननुसृत्यनृलोकतां ।अहोनःपरमंकष्टमित्यस्त्राक्षौविलेपतुः ॥ ९ ॥ आगत्यभगवांस्तस्मात्सभार्यःसाग्रजःपुरं ।शतधन्वानमारेभेहंतुंह
र्तुंमणिंततः ॥ १० ॥ सोपिकृष्णोद्यमंज्ञात्वाभीतःप्राणपरीप्सया ।साहाय्येकृतवर्माणमयाचतसचाब्रवीत् ॥ ११ ॥ नाहमीश्वरयोःकुर्यांहेलनंराम
कृष्णयोः ।कोनुक्षेमायकल्पेततयोर्वृजिनमाचरन् ॥ १२ ॥ कंसःसहानुगोपीतोयद्द्वेषात्त्याजितःश्रिया ।जरासंधःसप्तदशसंयुगान्विरथोगतः
॥ १३ ॥ प्रत्याख्यातःसचाक्रूरंपार्ष्णिग्राहमयाचत ।सोप्याहकोविरुध्येतविद्वानीश्वरयोर्बलं ॥ १४ ॥ यइदंलीलयाविश्वंसृजत्यवतिहंतिच ।चेष्टांवि
श्वसृजोयस्यनविदुर्मोहिताऽजया ॥ १५ ॥ यःसप्तहायनःशैलमुत्पाट्यैकेनपाणिना ।दधारलीलयाबालउछिलींध्रमिवार्भकः ॥ १६ ॥ नमस्तस्मै
भगवतेकृष्णायाद्भुतकर्मणे ।अनंतायादिभूतायकूटस्थायात्मनेनमः ॥ १७ ॥ प्रत्याख्यातःसतेनापिशतधन्वामहामणिं ।तस्मिन्न्यस्याश्व
माह्यरुह्यशतयोजनगंययौ ॥ १८ ॥ गरुडध्वजमारुह्यरथंरामजनार्दनौ ।अन्वयातांमहावेगौरश्वैराजन्गुरुद्रुहं ॥ १९ ॥

इदमिति ।अजयामायया ।मोहिताजयेतिसंधिरार्षः ॥ १५ ॥ ४ अंतर्यामिकृष्णनियुक्तेतस्मिन्क्रूरेमणिंन्यस्यययौपलायत ।गुरुःश्वशुरःतद्धंतारं ॥ १९ ॥ ॥

राम
२१

शतयोजनमात्रगामित्वात्ततः परं गंतुमशक्तस्तत्र पतितः । तं हयं विसृज्य ॥ २० ॥ व्यचिनोत्मृगयामास ॥ २१ ॥ २२ ॥ अक्रूरे मणिरस्तीति सर्वज्ञतया विदित्वापि रामं वंचनाय
तथाकृतवानिति भावः । अत्र वेषा अविद्ध ॥ २३ ॥ सर्वज्ञश्चैवं चेष्टितं मह्यं न दापयेति मत्वा गूढमन्युराह अहमिति ॥ २४ ॥ ५ ॥ कतिचित्समाः संवत्सरान् प्रासंगिकमाह ततइ

मिथिलायामुपवने विसृज्य पतितं हयं । पद्भ्यामधावत्संत्रस्तः कृष्णोऽप्यन्वद्रवद्रुषा ॥ २३ ॥ पदातेर्भगवांस्तस्य पदातिस्तिग्मनेमिना । चक्रेण शि
र उत्कृत्य वाससोर्व्यचिनोन्मणिं ॥ २४ ॥ अलब्धमणिरागत्य कृष्ण आहाग्रजांतिकं । वृथा हतः शतधनुर्मणिस्तत्र न विद्यते ॥ २५ ॥ तत आह बलो नू
नं स मणिः शतधन्वना । कस्मिंश्चित्पुरुषे न्यस्तस्तमन्वेष पुरं व्रज ॥ २६ ॥ अहं विदेहमिच्छामि द्रष्टुं प्रियतरं मम ॥ इत्युक्त्वा मिथिलां राजन्विवेश यदुनं
दनः ॥ २७ ॥ तं दृष्ट्वा सहसोत्थाय मैथिलः प्रीतमानसः । अर्हयामास विधिवदर्हणीयं समर्हणैः ॥ २८ ॥ उवास तस्यां कतिचिन्मिथिलायां समा विभु
ः । मानितः प्रीतियुक्तेन जनकेन महात्मना ॥ २९ ॥ ततोऽशिक्षद्गदां काले धार्तराष्ट्रः सुयोधनः । केशवो द्वारकामेत्य निधनं शतधन्वनः । अप्रा
प्तिं च मणेः प्राह प्रियायाः प्रियकृद्विभुः ॥ ३० ॥ ततः स कारयामास क्रिया बंधोर्हतस्य वै । साकं सुहृद्भिर्भगवान्या याः स्युः सांपरायिकाः ॥ ३१ ॥
अक्रूरः कृतवर्मा च श्रुत्वा शतधनोर्वधं । व्यूषतुर्भयवित्रस्तौ द्वारकायाः प्रयोजकौ ॥ ३२ ॥

ति ॥ २६ ॥ सत्यभामामप्येवं वंचयदिति सूचयन्नाह केशव इति ॥ २८ ॥ बंधोः सत्राजितः सांपरायिकाः पारलौकिक्यः ॥ २९ ॥ व्यूषतुः द्वारकायाः सकाशात्क्वापि पलायि
तौ । प्रयोजकौ मणिहरणे शतधन्वनः प्रवर्त्तकौ । तत्राक्रूरः कृष्णानुमतेनैव गतः कृतवर्मा तु भक्तपक्षपातप्राकट्यभयाद्विवोपेक्षित इति गम्यते । कथमन्यथा सर्व
ज्ञेश्वरयोर्वंचनं तयोः संभवतीति ॥ ३२ ॥

भा० उ०
२२

तदेवंश्रीवाराणस्यांदानपतिसमाख्ययामणिहस्तेऽक्रूरेरुक्मवेदिकैर्महाध्वरैर्यजमानेनिवसतिसतिपुनःकृष्णेनैवप्रेषितोऽक्रूरइतिकर्णोकर्णेजनपतिजनेसत्य
सामारामादीनामप्यविश्वासेजनसंग्रहायाक्रूरमाहूयसारूपंश्रीकृष्णःप्राह।इदंचभगवन्मतंसंगोप्यकेचनर्षयोऽन्यकारणमक्रूरानयनेवर्णयंति।तद्य
थाश्रुतंदूषयितुमनुवदतिअक्रूरेप्रोषितइति ॥ ३१ ॥ दूषयतिइतीति।अंगहेराजन्श्रीकृष्णमाहात्म्यंविस्मृत्येति।तदेवाहमुनिवासनिवासइति।मुनीनांनिवासो
यस्मिन्समुनिवासःश्रीकृष्णःतस्यनिवासेसतिअक्रूरापगममात्रेणरिष्टदर्शनंकिंघटेत।तद्दिष्टंविनानघटेतेत्यर्थः ॥ ३१ ॥ पुनस्तन्मतमेवानुवर्णयति।का

श्रु

अक्रूरेप्रोषितेरिष्टान्यासन्वैद्वारकौकसां।शारीरामानसास्तापामुहुर्दैविकभौतिकाः ॥ ३० ॥ इत्यंगोपदिशंत्येकेविस्मृत्यप्रागुदाहृतं।
मुनिवासनिवासेकिंघटेतारिष्टदर्शनं ॥ ३१ ॥ देवेऽवर्षतिकाशीशःश्वफल्कायागतायवै।स्वसुतांगांदिनींप्रादात्ततोऽवर्षत्स्मकाशिषु
॥ ३२ ॥ तत्सुतस्तत्प्रभावोऽसावक्रूरोयत्रयत्रह।देवोऽभिवर्षतेतत्रनोपतापानमारिकाः ॥ ३३ ॥ इतिवृद्धवचःश्रुत्वानैतावदिहकारणं।इति
मत्वासमानाय्यप्राहाक्रूरंजनार्दनः ॥ ३४ ॥ पूजयित्वाऽभिभाष्यैनंकथयित्वाप्रियाःकथाः।विज्ञाताखिलचित्तज्ञःस्मयमानउवाचह ॥ ३५ ॥
ननुदानपतेन्यस्तस्त्वय्यास्तेशतधन्वना।स्यमंतकोमणिःश्रीमान्विदितःपूर्वमेवनः ॥ ३६ ॥ ॥

शिदेशेषुदेवेमघवतिअवर्षतिसति ॥ ३२ ॥ ३३ ॥ इत्येवंभूतमक्रूरमहिमप्रतिपादनपरंवृद्धानांवाक्यंश्रुत्वासत्यमेवंतथाप्येतावदेवकारणंनसर्वं।किं
तु।मणेरप्युपगमइतिमत्वेत्येतदंतंपरमतं ॥ ३४ ॥ विज्ञातमखिलंयेनसचासौअतएवचित्तज्ञश्च।अयंभावः।महाभागवतस्याप्यस्यमयादत्तेपिमणावपे
क्षानास्त्येव।यस्मादाहूतोमणिनासहैवागतइतिज्ञात्वेति ॥ ३५ ॥ ३६ ॥ ॥

राम
२२

ततःकिमतआहसत्राजितइति।अपिंडांश्चनिनीयदत्वाऋणंचविमुच्यापाकृत्यशेषितमवशिष्टंदायंदुहितुःसत्यभामायाःसुताहरीयुरितिशास्त्रात्तथाचस्मरंति॥
पत्नीदुहितरश्चैवपितरौभ्रातरस्तथा।तत्सुतागोत्रजाबंधुःशिष्यास्सब्रह्मचारिणइति॥३७॥अग्रजोपिनप्रत्येतिनविश्वसतीति॥३८॥नाज्ञीतिनवक्तव्यंयतःअव्युच्छिन्नःसंत
तामखावर्त्तंतइति॥३९॥आलब्धउरुक्रमःहृदिस्पृष्टइतिवा॥४०॥रजःमिथ्याभिशापंसंमृज्य।अन्वैर्ईहिरइत्यादिमिषेणज्ञात्वाअक्रूरस्स्वस्मैप्रत्यर्पितवानिति॥४१॥दुःकीर्त्तिंनिर्मूलं

सत्राजितोनपत्यत्वाद्गृह्णीयुर्दुहितुःसुताः।दायंनिनीयापःपिंडान्विमुच्यर्णंचशेषितं॥३७॥तथापिदुर्धरस्त्वन्यैस्त्वय्यास्तांसुव्रतेमणिः।किंतुमामग्रज
:सम्यङ्नप्रत्येतिमणिंप्रति॥३८॥दर्शयस्वमहाभागबंधूनांशांतिमावह।अव्युच्छिन्नामखास्तेऽद्यवर्त्तंतेरुक्मवेदयः॥३९॥एवंसामभिरालब्धःश्वफल्क
तनयोमणिं।आदायवाससाच्छन्नंददौसूर्यसमप्रभं॥४०॥स्यमंतकंदर्शयित्वाज्ञातिभ्योरजआत्मनः।विमृज्यमणिनाभूयस्तस्मैप्रत्यर्पयत्प्रभुः॥४१॥
यस्त्वेतद्भगवतईश्वरस्यविष्णोर्वीर्याढ्यंवृजिनहरंसुमंगलंच।आख्यानंपठतिशृणोत्यनुस्मरेद्वादुःकीर्त्तिंदुरितमपोह्ययातिशांतिं॥४२॥इतिश्रीभा
गवतेमहापुराणेदशमस्यमंतकोपाख्यानेसप्तपंचाशत्तमोध्यायः॥ ॥श्रीशुकउवाच॥ ॥एकदापांडवान्द्रष्टुंप्रतीतान्पुरुषोत्तमः।इंद्रप्रस्थंगतः
श्रीमान्युयुधानादिभिर्वृतः॥१॥दृष्ट्वातमागतंपार्थामुकुंदमखिलेश्वरं।उत्तस्थुर्युगपद्वीराःप्राणामुख्यमिवागतं॥२॥ ॥

दुरितंचेति॥४२॥इतिदशमेसप्तपंचाशत्तमः॥ ॥अष्टपंचाशत्तमेतुकृष्णःपंचकरेऽग्रहीत्।कालिंदींमित्रविंदांचसत्यांभद्रांचलक्ष्मणां॥१॥कालिंदीनिजलाभाय
तपःपरमुपेयुषी।परिणेष्यन्स्त्रियावान्समिंद्रप्रस्थमथागमत्॥२॥प्रतीतान्दृष्टानपिद्रुपदगेहेपुनस्सर्वैर्दृष्टान्युयुधानःसात्यकिः॥१॥प्राणाइंद्रियाणिमुख्यंपंचवृ
त्तिंप्राणमिव॥२॥

ऽ न्पष्ठयोः प्रणामं कृत्वा समेनालिंगितः कनिष्ठाभ्यामभिवंदितो बभूव ४ कृष्णा द्रौपदी। बद्धस्तार्या सत्यपि निंदारहिता। पार्थैर्नवं अचिरमूढापरिणीता प च अति
हार्देन स्नेहेन आर्द्रे सजले दृशौ यस्याः तया परिष्वक्तः। तया परिदृष्टा बांधवा यस्य सः। ७ प्रेमणा वैक्लव्यं तेन रुद्धः कंठो यस्याः। क्लेशापाये आत्मनिदर्शनं यस्य तं। सजतां क्लेशा

परिष्वज्याश्रुतं वीराश्लेषं गसंगहतैन सः। सानुरागस्मितं वक्त्रं वीक्ष्य तस्य मुदं ययुः। ४ युधिष्ठिरस्य तीमत्य कृत्वा पादाभिवंदनं। अर्जुनं परिरभ्य।
थयमाभ्यां चाभिवादितः। ५ परमासनमासीनं कृष्णा कृष्णमनिंदिता। नवोढा व्रीडिता किंचित् छन्नैरेत्याभ्यवंदत। तथैव सात्यकिः पार्थैः पूजि
तश्चाभिनंदितः। निषसादासनेऽन्येऽपि च पूजिताः पर्युपासत ६ पृथां समागत्य कृताभिवादनस्त्वया तिहार्दार्द्रदृशाऽभिरंभितः। आपृष्टवांश्च।
कुशलं सह स्नुषां पितृष्वसारं प रिदृष्टबांधवः। ७ तमाह प्रेमवैक्लव्यरुद्धकंठाश्रुलोचना। स्मरंती तान् बहून् क्लेशान् क्लेशापायात्मदर्शनं
८ तदैव कुशलं नो भूत् सनाथास्ते कृता वयं। ज्ञातीन्नः स्मरता कृष्ण भ्राता मे प्रेषितस्त्वया। ९ न तेऽस्ति स्वपरभ्रांतिर्विश्वस्य सुहृदात्मनः। तथा
पि स्मरतां शश्वत् क्लेशान् हंसि हृदि स्थितः। १० युधिष्ठिर उवाच। किं न आचरितं श्रेयो न वेदाहमधीश्वर। योगेश्वराणां दुर्दर्शो यन्नो दृष्टः कुमे
धसां। ११ इति वै वार्षिकान्मासान् राज्ञा सोऽभ्यर्थितः सुखं। जनयन्नयनानंदमिंद्रप्रस्थौकसां विभुः। १२

पायं आत्मानं दर्शयतीति वा ८ ज्ञातीत्वं धूम्रस्व नो स्मान् यदा भ्राताऽक्रूरः ९ ज्ञातीनिति। वचनात्प्राप्तं मोहं वारयंती स्मो तिन नतेस्तीति तत्र हेतुः विश्वस्यात्मनि सुहृद
त। आत्मा च तस्य हं हंसि नाशयसि १० कुमेधसां विषयासक्तचित्तानां दृष्टोसि ११ सुखमवसदिति शेषः। सुखमभ्यर्थित इति वा क्रियासमाप्तिः १२

कालिंदीदर्शनप्रसंगमाहएकदेति।अक्षय्यासायकाययोस्तौतूणौइषुधी १३ १५ राज्ञेयुधिष्ठिरायामेध्याक्रमीहिराज्ञ्यावीत्सस्त्वर्जुनः १६ १७ सख्याश्रीकृष्णेन १८
२० अयंमांकामयेदितिशंकायामाह।नान्यमिति २१ २ आदावेवतद्विद्वान् २३ प्रसंगात्कालिंदीनंचरित्रांतरमाहयदैवेति।पार्थैर्यदैवसंदिष्टोविज्ञापितः

एकदारथमारुह्यविजयोवानरध्वजं।गांडीवंधनुरादायतूणौचाक्षय्यसायकौ॥१३॥ साकंकृष्णेनसंनद्धोविहर्तुंविपिनंवनं।बहुव्यालमृगा
कीर्णंप्राविशत्परवीरहा॥१४॥ तत्राविध्यच्छरैर्व्याघ्रान्सूकरान्महिषान्रुरून्।शरभान्गवयान्खड्गान्हरिणान्शशशल्लकान्॥१५॥ तान्निन्युःकिंकरा
राज्ञेमेध्यान्पर्वण्युपागते।तृट्परीतःपरिश्रांतोबीभत्सुर्यमुनामगात्॥१६॥ तत्रोपस्पृश्यविशदंपीत्वावारिमहारथौ।कृष्णौददृशतुःकन्यांचरं
तींचारुदर्शनां॥१७॥ तामासाद्यवरारोहांसुद्विजांरुचिराननां।पप्रच्छप्रेषितःसख्याफाल्गुनःप्रमदोत्तमां॥१८॥ कात्वंकस्यासिसुश्रोणिकुतो
वाकिंचिकीर्षसि।मन्येत्वांपतिमिच्छंतींसर्वंकथयशोभने॥१९॥ कालिंद्युवाच॥ अहंदेवस्यसवितुर्दुहितापतिमिच्छती।विष्णुंवरेण्यंव
रदंतपःपरममास्थिता॥२०॥ नान्यंपतिंवृणेवीरतमृतेश्रीनिकेतनं।तुष्यतांमेसभगवान्मुकुंदोऽनाथसंश्रयः॥२१॥ कालिंदीतिसमाख्या
तावसामियमुनाजले॥निर्मितेभवनेपित्रायावदच्युतदर्शनं॥२२॥ तथावदद्गुडाकेशोवासुदेवायसोपितां।रथमारोप्यतद्विद्वान्धर्मराज
मुपागमत्॥२३॥ यदैवकृष्णःसंदिष्टःपार्थानांपरमाद्भुतं।कारयामासनगरंविचित्रंविश्वकर्मणा॥२४॥ भगवांस्तत्रनिवसन्स्वानांप्रिय
चिकीर्षया।अग्नयेखांडवंदातुमर्जुनस्याससारथिः॥२५॥

श्रीकृष्णःतदैवतेषांविश्वकर्मणादेवशिल्पिनानगरंकारयामास २४ किंच।तत्र
वान्निरतिशयैश्वर्यगुणवानपिअर्जुनस्यधनुरादिनास्वयसारथिरास।खांडवंनामेंद्रवनं २५

श्रकृयौ अकृपसायकौ ॥ ३६ ॥ खांडवदाहकाइकैः । सख्येऽर्जुनाय । यस्मिन्निति सामान्यतो निर्देशः यस्यामित्यर्थः । जलस्थलयोर्दृशौ दृष्टे भ्रमः । यद्वा जलेस्थलवत्
दृक् दृष्टिर्यस्मिन् तत् जलस्थलदृक् तस्मिन् भ्रमस्त्र आसीदिति ॥ २७ ॥ ८ ॥ सुधुएषं कृतुर्नर्क्षं चयस्मिन् ॥ २९ ॥ पंचमं मित्रविंदोवाहमाहविं दानुविंदाविति द्वाभ्यां

सोग्निस्तुष्टो धनुरदाद्धयान् श्वेतान् रथं नृपार्जुनायाक्षय्यौ तूणौ वर्म चास्त्रैरभेद्यमिति ॥ २६ ॥ मयश्च मोचितो वह्नेः सभां सख्य उपाहरत् ।
यस्मिन् दुर्योधनस्यासीज्जलस्थलदृशि भ्रमः ॥ २७ ॥ स तेन समनुज्ञातः सुहृद्भिश्चानुमोदितः । आययौ द्वारकां भूयः सात्यकिप्रमुखैर्वृतः ॥ २८ ॥
अथोपयेमे कालिंदीं सुपुण्यर्त्वृक्ष ऊर्जिते । वितन्वन् परमानंदं स्वानां परममंगलः ॥ २९ ॥ विंदानुविंदावावंत्यौ दुर्योधनवशानुगौ । स्वयंवरे
स्वसारं भगिनीं कृष्णे सक्तां न्यषेधतां ॥ ३० ॥ राजाधिदेव्यास्तनयां मित्रविंदां पितृष्वसुः । प्रसह्य हृतवान् कृष्णो राजन् राज्ञां प्रपश्यतां ॥ ३१ ॥ नग्नजि
न्नाम कौशल्य आसीद्राजातिधार्मिकः । तस्य सत्याभवत् कन्या देवी नाग्नजिती नृप ॥ ३२ ॥ न तां शेकुर्नृपा वोढुमजित्वा सप्त गोवृषान् । तीक्ष्णशृं

नव २

गान्सुदुर्धर्षान्वीरगंधासहान्खलान् ॥ ३३ ॥ तां श्रुत्वा वृषजिल्लभ्यां भगवान्सात्वतांपतिः । जगाम कौशल्यपुरं सैन्येन महता वृतः ॥ ३४ ॥ स कोश
लपतिः प्रीतः प्रत्युत्थानासनादिभिः । अर्हणेनापि गुरुणा पूजयन्प्रतिनंदितः ॥ ३५ ॥ वरं विलोक्याभिमतं समागतं नरेंद्रकन्या चकमे रमाप
तिं । भूयादयं मे पतिराशिषोऽमलाः करोतु सत्या यदि मे हितो व्रतैः ॥ ३६ ॥

आवंत्यौ अवंतीराजानौ ॥ ३० ॥ ३१ ॥ षष्ठमाह्वान नग्नजिदिति । कौशल्यः अयोध्या
पतिः । सत्यानामकन्याऽभवत् देवी कांतिमती नाग्नजिती पितृनाम्ना प्रसिद्धेत्यर्थः ॥ ३२ ॥ वीरस्य गंधमपि न सहंत इति तथा तान् खलान् दुर्दांतान् ॥ ३३ ॥ वृषा
न् जयति यस्तेन लभ्यां प्रतिनंदितः संप्रतिनंदितवान् श्रीकृष्णेन वा सप्रतिनंदितः ॥ ३४ ॥ ३५ ॥

३९ हेनरेंद्रराजन्यबंधोःक्षत्रियस्याशुल्कदाइत्यादिप्रदाः ४० गुणानामेकमेवधामस्थानंत्वंतथाभूतस्ययस्यतवांगे ४० दुर्दांताअशिक्षिताःदुरवग्रहाःअपराय

अर्चितंपुनरित्याहनारायणजगत्पते।आत्मानंदेनपूर्णस्यकरवाणिकिमल्पकः॥ ३८ यत्पादपंकजरजःशिरसाबिभर्तिश्रीरब्जजःसगिरिशः सहलोकपालैः।लीलातनुःस्वकृतसेतुपरीप्सयेशःकालेदधत्सभगवान्ममकेनतुष्येत् ३९ ॥ श्रीशुक उवाच॥ तमाहभगवान्हृष्टःकृतास नपरिग्रहः।मेघगंभीरयावाचासस्मितंकुरुनंदन ३९ श्रीभगवानुवाच॥ नरेंद्रयाच्ञाकविभिर्विगर्हितारजन्यबंधोर्निजधर्मवर्त्तिनः।तथा पियाचेतवसौहृदेच्छयाकन्यांत्वदीयांनहिशुल्कदावयं ४० राजोवाच॥ कोन्यस्तेभ्यधिकोनाथकन्यावरइहेप्सितः।गुणैकधाम्नोयस्यांगे श्रीर्वसत्यनपायिनी ४१ किंत्वस्माभिःकृतःपूर्वंसमयःसात्वतर्षभ।पुंसांवीर्यपरीक्षार्थंकन्यावरपरीप्सया ४२ सप्तैतेगोवृषावीरदुर्दां तादुरवग्रहाः।एतैर्भग्नाःसुबहवोभिन्नगात्रानृपात्मजाः ४३ यदिमेनिगृहीताःस्युस्त्वयैवयदुनंदन।वरोभवानभिमतोदुहितुर्मेश्रियःपते ४४ एवंसमयमाकर्ण्यबद्ध्वापरिकरंप्रभुः।आत्मानंसप्तधाकृत्वान्यगृह्णाल्लीलयैवतान् ४५ बबंधतान्दामभिःशौरिर्भग्नदर्पान्हतौजसः। व्यकर्षल्लीलयाबद्धान्बालोदारुमयान्यथा ४६ ततःप्रीतःसुतांराजाददौकृष्णायविस्मितः।तांप्रत्यगृह्णाद्भगवान्विधिवत्सदृशींप्रभुः ४७

न्नाःकुतःतदाहएतैरिति।भग्नाःसंगंभापिताःएतान्यःयोनिगृह्णातितस्यकन्येतिसमयःकृतः ४३ यत्स्यदिइमेगोवृषाः ४४ सप्तधाकृत्वेतिवद्धीनांयो षितांसंपूर्णएताहंसंभोगयोग्यःस्यामितिसत्याप्रत्यसापत्न्यप्रदर्शनार्थमात्मनःसप्तधाकरणं ४५

॥ ४४ ॥ निष्कग्रीवाश्चताः सुवाससश्चतासांयुवतीनांचदासीनां ॥ ५० ॥ नागात्नागेभ्यः शतगुणान्नवलक्षाणि रथात्रथेभ्यः शतगुणान्नवकोटीः अश्वात्अश्वेभ्यः
शतगुणान्नवपद्मानि ॥ ५१ ॥ ५२ ॥ यदुभिर्गोवृषैश्चसप्तवीर्याअपिसुदुर्मर्षाः रुरुधुः ॥ ५३ ॥ अस्यतः क्षिपतः प्रयुंजानानितियावत् ॥ ५५ ॥ सप्तमंविवाहमाहश्रुतकीर्तेरिति ॥

राजपत्न्यश्चदुहितुः कृष्णंलब्ध्वाप्रियंपतिं । लेभिरेपरमानंदंजातश्चपरमोत्सवः ॥ ४८ ॥ शंखभेर्यानकानेदुर्गीतवाद्यद्विजाशिषः । नरानार्यःप्रमुदिताः सु-
वासः स्रगलंकृताः ॥ ४९ ॥ दशधेनुसहस्राणिपारिबर्हमदाद्विभुः । युवतीनांत्रिसाहस्रंनिष्कग्रीवसुवाससां ॥ ५० ॥ नवनागसहस्राणिनागाच्छतगुणान्र-
थान् । रथाच्छतगुणानश्वानश्वाच्छतगुणान्नरान् ॥ ५१ ॥ दंपतीरथमारोप्यमहत्यासेनयावृतौ । स्नेहविक्लिन्नहृदयोयापयामासकोशलः ॥ ५२ ॥ श्रुत्वैत-
द्रुरुधुर्भूपानयंतंपथिकन्यकां । भग्नवीर्याः सुदुर्मर्षायदुभिर्गोवृषैः पुरा ॥ ५३ ॥ तानस्यतः शरव्रातान्बंधुप्रियकृदर्जुनः । गांडीवीकालयामाससिं-
हः क्षुद्रमृगानिव ॥ ५४ ॥ पारिबर्हमुपागृह्यद्वारकामेत्यसत्यया । रेमेयदूनामृषभोभगवान्देवकीसुतः ॥ ५५ ॥ श्रुतकीर्तेः सुतांभद्रामुपयेमेपि-
तृष्वसुः । कैकेयींभ्रातृभिर्दत्तांकृष्णः संतर्दनादिभिः ॥ ५६ ॥ सुतांचमद्राधिपतेर्लक्ष्मणांलक्षणैर्युतां । स्वयंवरेजहारैकः ससुपर्णः सुधामिव ॥ ५७ ॥
अन्याश्चविविधाभार्याः कृष्णस्यासन्सहस्रशः । भौमंहत्वातन्निरोधादाहृताश्चारुदर्शनाः ॥ ५८ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेअष्ट-
महिष्युद्वाहोनामाष्टपंचाशत्तमोध्यायः ॥ ॥ ॥

श्रुतकीर्तिर्नामयापितृष्वसातस्याः सुतांभद्रांनाम । कैकेयींतद्देशजां ॥ ५६ ॥ अष्टममाहसुतांचेति । एकएवश्रीकृष्णोलक्ष्मणांजहार ॥ ५७ ॥ तन्निरोधांतः पुरंतस्मा-
त् ॥ ५८ ॥ रुक्मिणीजांबवतीभामासत्याभद्रासलक्षणा । कालिंदीमित्रविंदाचेत्यष्टौपट्टमहास्त्रियः ॥ ५८ ॥ इतिदशमेऽष्टपंचाशत्तमः ॥ ॥ ॥

ऊनषष्टितमेसौमंहत्वातेनाहृताहरिः।कन्याःसहस्रशःश्चाप्यपारिजातंदिवोऽहरत्॥१॥परिणीयततस्तास्तिस्मन्मनोरथपूरणैः।आत्मारामोप्यसौरेमेतद्गृहेषुगृहस्थवत्
॥२॥येनताःस्त्रियोनिरुद्धाःसभौमःचकारात्येनकारणेनहतःतदाचष्टेति॥१॥इंद्रेणभौमचेष्टितंविज्ञापितःसत्राशज्योतिषपुरंभौमनगरंयथावित्यन्वयः।कथंभूतेन
हृतंछत्रंयस्यतेन।लोकपालप्रधानत्वादिंद्रस्यवरुणच्छत्रहरणेपितस्यैवमानभंगइतितथोक्तं।हृतेकुंडलेयस्याःसाअदितिर्वंधुर्मातायस्यतेन।हृतममराद्रेस्थानंमणिप
र्वतलक्षणंयस्यतेन।सत्यभार्यामोहेभगवंतमिंद्रआगत्यविज्ञापितवान्।तदातस्याःकौतुकायतयाभार्ययासहययाविति।यद्वात्वदनुज्ञयैवत्वन्मुत्रंहनिष्यामीति

राज्ञोवाच॥ ॥यथाहतोभगवताभौमोयेनचताःस्त्रियः।निरुद्धाएतदाचक्ष्वविक्रमंशार्ङ्गधन्वनः॥१॥शुकउवाच॥ ॥इंद्रेणहृतछत्रेणहृतकुं
डलबंधुना।हृतामराद्रिस्थानेनज्ञापितेभौमचेष्टितं।सभार्योगरुडारूढःप्राग्ज्योतिषपुरंययौ॥२॥गिरिदुर्गैःशस्त्रदुर्गैर्जलाग्न्यनिलदुर्गमं।मु
रपाशायुतैर्घोरैर्दृढैःसर्वतआवृतं॥३॥गदयानिर्बिभेदाद्रीछस्त्रदुर्गाणिसायकैः।चक्रेणाग्निंजलंवायुंमुरपाशांस्तथासिना॥४॥शंखनादेनयंत्रा
णिहृदयानिमनस्विनां।प्राकारंगदयागुर्व्यानिर्बिभेदगदाधरः॥५॥पांचजन्यध्वनिंश्रुत्वायुगांताशनिभीषणं।मुरःशयानउत्तस्थौदैत्यःपंच
शिराजलात्॥६॥

तिहासोक्तंसैवरंदत्तंसत्यंकर्तुंसत्यभामायाःस्पर्शवाञ्छयासहययौ।यद्वानारदानीतपारिजातेकक्रुद्धभेरुक्मिण्यैदत्तेसतिकुपितांसत्यभामांसांत्वयता।मु
ख्यंपारिजातमेवदास्यामीतिश्रीकृष्णेनप्रतिश्रुतमितिहरिवंशेप्रसिद्धं।तदर्थंतानीतवानितिज्ञेयं।गरुडेनयानेकारणंगिरिदुर्गैरित्यादि।तैरुपलक्षितं।जलाग्न्य
निलैश्चसर्वतोवर्तमानैर्दुर्गमं॥३॥५॥युगांताशनेर्वह्निर्निवद्भीषणं।परिखायाजलात्॥६॥

द०उ०
२६

७ आविध्य भ्रातोल्बणस महान्नादइत्यन्वयः ॥ ८ ॥ तस्मै कृष्णाय गदां च मुमुंचत ॥ ९ ॥ इंद्रतेजसा वज्रेण ॥ १० ॥ प्रतिक्रियया हेतुभूतया अमर्षजुषः ॥ ११ ॥ पीठं पीठनामानं

त्रिशूलमुद्यम्य सुदुर्निरीक्ष्णो युगांतसूर्यानलरोचिरुल्बणः ॥ ग्रसंस्त्रिलोकीमिव पंचभिर्मुखैरभ्यद्रवत्तार्क्ष्यसुतं यथोरगः ॥ ७ ॥ आविध्य शूलं तरसा गरुत्मते निरस्य वक्त्रैर्व्यनदत्स पंचभिः ॥ स रोदसी सर्वदिशोंऽतरं महान्नापूरयन्नंडकटाहमावृणोत् ॥ ८ ॥ तदापतद्वै त्रिशिखं गरुत्मते हरिः शराभ्यामभिनत्त्रिधौजसा ॥ मुखेषु तं चापि शरैरताडयत्तस्मै गदां सोपि रुषा व्यमुंचत ॥ ९ ॥ तामापतंतीं गदया गदां मृधे गदाग्रजो निर्विभिदे सहस्रधा ॥ उद्यम्य बाहूनभिधावतोऽजितः शिरांसि चक्रेण जहार लीलया ॥ व्यसुः पपातांभसि कृत्तशीर्षो निकृत्तशृंगोऽद्रिरिवेंद्रतेजसा ॥ १० ॥ तस्यात्मजाः सप्त पितुर्वधातुराः प्रतिक्रियामर्षजुषः समुद्यताः ॥ ताम्रोंऽतरिक्षः श्रवणो विभावसुर्वसुर्नभस्वानरुणश्च सप्तमः ॥ ११ ॥ पीठं पुरस्कृत्य चमूपतिं मृधे भौमप्रयुक्ता निरगान्धृतायुधाः ॥ प्रायुंजतासाद्य शरानसीन्गदाः शक्त्यृष्टिशूलान्यजिते रुषोल्बणाः ॥ १२ ॥ तच्छस्त्रकूटं भगवान्स्वमार्गणैरमोघवीर्यस्तिलशश्चकर्त ह ॥ तान्पीठमुख्याननयद्यमालयं निकृत्तशीर्षोरुभुजांघ्रिवर्मणः ॥ १३ ॥ स्वानीकपानच्युतचक्रसायकैस्तथा निरस्तान्नरको धरासुतः ॥ निरीक्ष्य दुर्मर्षण आस्रवन्मदैर्गजैः पयोधिप्रभवैर्निरक्रमत् ॥ १४ ॥ दृष्ट्वा सभार्यं गरुडोपरि स्थितं सूर्योपरिष्टात्सतडि " द्घनं यथा ॥ कृष्णं स तस्मै व्यसृजच्छतघ्नीं योधाश्च सर्वे युगपत्स्म विव्यधुः ॥ १५ ॥

निरगान्निरगमन् ॥ १२ ॥ निकृत्तानि शीर्षादीनि येषां तान् ॥ १३ ॥ शतघ्नीं शक्तिविशेषं ॥ १४ ॥ १५ ॥ रामकृष्ण ॥ ॥ रामकृष्णगोपालमाधव ॥ ॥ राम ॥ ॥

राम
२६

विचित्रा वाजाः पत्राणि येषां तैर्बाणैः निकृत्ता बाहवः ऊरवः शिरोधाः कंधराः विग्रहाश्च देहा यस्य तत् तथा तर्ह्येव तं यदा विद्यधुः तस्मिन्नेव क्षणे ॥ १६ ॥ अत्याश्चर्यं कुरू
द्वहेति संबोधनं । तथाहि तैर्यानि प्रयुक्तानि शस्त्रास्त्राणि तन्नाशेः पूर्वमेव तत्सैन्यं सर्वं हत्वा पश्चात्तानि शस्त्राण्यस्त्राणि चच्छिदे । तत्राप्येकैकं शस्त्रमस्त्रं च त्रिभिः त्रिभिः

तद्भौमसैन्यं भगवान्गदाग्रजो विचित्रवाजैर्निशितैः शिलीमुखैः । निकृत्तबाहूरुशिरोध्रविग्रहं चकार तर्ह्येव हताश्वकुंजरं ॥ १६ ॥ यानि योधैः प्र
युक्तानि शस्त्रास्त्राणि कुरूद्वह । हरिस्तान्यच्छिनत्तीक्ष्णैः शरैरेकैकशस्त्रिभिः । उह्यमानः सुपर्णेन पक्षाभ्यां निघ्नता गजान् ॥ १७ ॥ गरुत्मता हन्यमा
नास्तुंडपक्षनखैर्गजाः । पुरमेवाविशन्नार्त्ता नरको युध्ययुध्यत ॥ १८ ॥ दृष्ट्वा विद्रावितं सैन्यं गरुडेनार्दितं स्वकं । तं भौमः प्राहरच्छक्त्या वज्रः प्रतिहतो
यतः ॥ १९ ॥ नाकंपत तया विद्धो मालाहत इव द्विपः । शूलं भौमोऽच्युतं हंतुमाददे वितथोद्यमः ॥ २० ॥ तद्विसर्गात्पूर्वमेव नरकस्य शिरो हरिः । अपा
हरद्गजस्थस्य चक्रेण क्षुरनेमिना ॥ २१ ॥ सकुंडलं चारुकिरीटभूषणं बभौ पृथिव्यां पतितं समुज्वलत् । हा हेति साध्वित्यृषयः सुरेश्वरा माल्यैर्मुकुं
दं विकिरंत ईडिरे ॥ २२ ॥ ततश्च भूः कृष्णमुपेत्य कुंडले प्रतप्तजांबूनदरत्नभास्वरे । सवैजयंत्या वनमालयार्पयत्प्राचेतसं छत्रमथो महामणिं ॥ २३ ॥
अस्तौषीदथ विश्वेशं देवी देववरार्चितं । प्रांजलिः प्रणता राजन्भक्तिप्रवणया धिया ॥ २४ ॥ भूमिरुवाच ॥ नमस्ते देवदेवेश शंखचक्रगदा
धर । भक्तेच्छोपात्तरूपाय परमात्मन्नमोऽस्तु ते ॥ २५ ॥

शरैरित्याश्चर्यं ॥ १७ ॥ किंच गरुत्मतेति ॥ १८ ॥ यतः यया शक्त्या वज्रः प्रतिहत आस ॥ १९ ॥ गरुडस्कंनाकंपत ॥ २० ॥ गरुडे वितथोद्यमः सन् ॥ २१ ॥ २२ ॥ प्रतप्तेजांबूनदेय
निरत्नानि तैर्भास्वरे । मेरुवंशभूतमंदरशिखरं महामणिं चार्पयदिति ॥ २३ ॥ २४ ॥ ऐश्वर्यं ज्ञात्वा भूमिः स्तौति । नमस्त इति । परमात्मन्देवा अंतर्यामिन् ॥ २५ ॥

द० ३०
२२

येन मंत्रेण कुंत्या प्रसन्नः पूर्वमासीत्तेन मंत्रेण नमस्यति नमइति। पंकजं नाभौ यस्य तस्मै जगत्कारणायेत्यर्थः। अत एव सकीर्त्तिमयी पंकजानां माला विद्यते यस्य तस्मै। एवंभूतं ध्यायतां पंकजवत्सुप्रसन्नेन तापोपशमनेन नेत्रे यस्य तस्मै। पंकजवत्सुसेव्यौ पंकजांकितौ वांघ्री यस्य तस्मै नमः इति २६ किंच। भगवते निरतिशयैश्वर्याय। वासुदेवाय सर्वभूताश्रयाय। अत एव विष्णवे व्यापिने। नहि सर्वभूताश्रयत्वं परिछिन्नस्य संभवतीति कुतः सर्वाश्रयत्वं तत्राह पुरुषाय। सर्वस्मात्कार्यात्पूर्वमेवसते। पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वमिति श्रुतेः। एतदपि कुतः आदिबीजाय आदेर्जगत्कारणस्यापि कारणाय। एवमपि नष्टादिवज्जाड्यमित्याह पूर्णबोधायेति ॥ २७ ॥ नन्वेवमपि ब्रह्मकारणात्पूर्वत्वं न स्यादत आह अजायेति। स्वयमजाय श्रैष्ठ्यं च जनयित्रे। उभयत्रापि क्रमेणा हेतुद्वयं ब्रह्मणे इहते। अनंतश

नमः पंकजनाभाय नमः पंकजमालिने। नमः पंकजनेत्राय नमस्ते पंकजांघ्रये ॥ २६ ॥ नमो भगवते तुभ्यं वासुदेवाय विष्णवे। पुरुषायादिबीजाय पूर्णबोधाय ते नमः ॥ २७ ॥ अजाय जनयित्रेऽस्य ब्रह्मणेऽनंतशक्तये। परावरात्मभूतात्मन्परमात्मन्नमोऽस्तु ते ॥ २८ ॥ त्वं वै सिसृक्षू रज उत्कटं प्रभो तमो निरोधाय बिभर्ष्यसंवृतः। स्थानाय सत्त्वं जगतो जगत्पते कालः प्रधानं पुरुषो भवान्परः ॥ २९ ॥

क्तय इति वा बृहत्त्वाद्ब्रह्मत्वं। अनंतशक्तित्वाज्जनयितृत्वमित्यर्थः। ननु पितामहः पुत्रादीनां जनकाः तेषां च तत्पूर्वत्वं तेषां च भूतानि तेषां च स्वकर्मद्वारेण जीवाः किमत्राहं तत्राह परावरात्मन्नित्यादि। पित्राद्यात्मत्वात्त्वमेव जनक इत्यर्थः ॥ २८ ॥ ननु गुणा विष्ण्वात्पत्त्यादिहेतवः। तेषु च प्रधानस्यैव तत्र च दप्रपुरुषः क्षोभकः। तत्र च कालो निमित्तमिति प्रसिद्धं किमत्राहं तत्राह। त्वं वा इति तमसो धारणे अप्यसंवृत एव। स्थानाय पालनाय। जगतः सृष्ट्याद्यर्थं उत्कटं रज आदित्वमेव बिभर्षि प्रसृजसीत्यर्थः। कालप्रधानपुरुषाश्च त्वद्व्यतिरिक्ता न संति। त्वं तु परः सर्वव्यतिरिक्तः अतस्त्वमेव जनयितेत्यर्थः ॥ २९ ॥

राम
२३

कार्यकारणस्य प्रपंचस्य तद्व्यतिरेकं तस्य च सर्वव्यतिरेकमुपपादयति अहमिति। अहं भूमिः मात्राणि देवा मन इंद्रियाणीति च त्रिविधाहंकारकार्याणि कर्त्ता अ
हंकार ३० एवं स्तुत्वा प्रार्थयते तस्येति। हे प्रपन्नार्त्तिहर तस्य नरकस्यायं भगदत्तो नाम सुतः अत एव मया तव पादपंकजमुपसादितः ३१ अभयं दत्वा। ३२ शता
धिकामित्यपि ज्ञातव्यं यथाह श्रीपराशरः। कन्यापुरे स कन्यानां षोडशातुल्यविक्रमः। शताधिकानि ददृशे सहस्राणि महामते इति। राजन्यः इत्युपलक्षणं सिद्धादी

अहं पयो ज्योतिरथानिलो नभो मात्राणि देवा मन इंद्रियाणि। कर्त्ता महानित्यखिलं चराचरं त्वय्यद्वितीये भगवन्नयं भ्रमः॥ ३० तस्यात्मजोऽयं
तव पादपंकजं भीतः प्रपन्नार्त्तिहरोपसादितः। तत्पालयैनं कुरु हस्तपंकजं शिरस्यमुष्याखिलकल्मषापहं॥ ३१ श्रीशुक उवाच॥ इति भूम्या॥
र्थितो वाग्भिर्भगवान् भक्तिनम्रया। दत्वाऽभयं भौमगृहं प्राविशत्सकलर्द्धिमत्॥ ३२॥ तत्र राजन्यकन्यानां षट्सहस्राधिकायुतं। भौमाहृतानां वि
क्रम्य राजभ्यो ददृशे हरिः॥ ३३॥ तं प्रविष्टं स्त्रियो वीक्ष्य नरवीरं विमोहिताः। मनसा वव्रिरेऽभीष्टं पतिं दैवोपसादितं॥ ३४॥ भूयात्पतिरयं मह्यं धाता
तदनुमोदतां। इति सर्वाः पृथक् कृष्णे भावेन हृदयं दधुः॥ ३५॥ ताः प्राहिणोद्द्वारवतीं सुमृष्टविरजोंबराः। नरयानैर्महाकोशान् रथाश्वान् द्रविणं मह
त्॥ ३६॥ ऐरावतकुलेभांश्च चतुर्दंतांस्तरस्विनः। पांडुरांश्च चतुःषष्टिं प्रेषयामास केशवः॥ ३७॥ गत्वा सुरेंद्रभवनं दत्वाऽदित्यै च कुंडले। पूजितस्त्रिद
शेंद्रेण महेंद्राण्या च सप्रियः॥ ३८॥ नोदितो भार्यया उत्पाट्य पारिजातं गरुत्मति। आरोप्य सेंद्रान् विबुधान्निर्जित्योपानयत्पुरं॥ ३९॥

नाम पीतिं तथा हिते नैवोक्तं देवसिद्धासुरादीनां नृपाणां च जनार्दन। हत्वाहि सोऽसुरः कन्या रुरोध निजमंदिरे इति ३२ प्राहिणोत्प्रस्थापयामास सुमृ
ष्टाः कमनीयाश्च ताः विरजांबराश्च ताः। नरयानैः शिविकाभिः अपि च महाकोशानिति ३६ । ७ सप्रियः सत्यभामासहितः ३८

द॰ उ॰
२८

गृहोद्यानं निष्कुटं तदुपशोभयतितमाः ४० सेंद्रा इति विबुधान्निर्जित्येतीद्रकृष्णयोः संग्रामः उक्तः तत्र न तु कथं प्रसाधितमनोरथेन श्रीकृष्णेन सहेंद्रस्य संग्राम इत्या
शंक्याह। यथा च इति। अच्युतं अर्थसाधनमिति च कर्मद्वयं याचतिधातोः। विगृह्यते विग्रहं करोति महानपि। तमः क्रोधः आद्यं तां धनिकतां ॥ ४१ यथा वत्
अनेन नदेवकार्यादिबंधुजनसमागमोपि घ्नति गृहं योगपद्येन सूचितः। अद्ययः सर्वत्रापि संपूर्णा एव ४२ अहो भाग्यं नारीणामित्याहत्रिभिः। गृहेष्विति। अतः क्ली

स्थापितः सत्यभामाया गृहोद्यानोपशोभनः। अन्वयुर्भ्रमराः स्वर्गात्तद्गंधासवलंपटाः ४० ययाच आनम्य किरीटकोटिभिः पादौ स्पृशन्नच्युत
मर्थसाधनं। सिद्धार्थ एतेन विगृह्यते महानहो सुराणां च तमो धिगाढ्यतां ॥ ४१ अथो मुहूर्त एकस्मिन्नानागारेषु ताः स्त्रियः। यथोपयेमे भगवां
स्तावद्रूपधरोव्ययः ॥ ४२ गृहेषु तासामनपाय्यतर्क्यकृन्निरस्तसाम्यातिशयेष्ववस्थितः। रेमे रमाभिर्निजकामसंप्लुतो यथेतरो गार्हमेधिकां
श्चरन् ॥ ४३ इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोपि न विदुः पदवीं यदीयां। भेजुर्मुदाविरतमेधितयानुरागहासावलोकनवसंगमज
ल्पलज्जाः ॥ ४४ प्रत्युद्गमासनवरार्हणपादशौचतांबूलविश्रमणवीजनगंधमाल्यैः। केशप्रसारशयनस्नपनोपहार्यैर्दासीशता अपि वि
भोर्विदधुः स्म दास्यं ॥ ४५ ॥ इति दशमस्कंधे पारिजातहरणनरकादिवधो नामैकोनषष्टितमोध्यायः ॥ ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥

णि कर्माणि करोतीति तथा सः निरस्तं साम्यमतिशयश्च यैरन्येषां तेषु गृहेषु अनपायी अवस्थितः रमाभिः लक्ष्म्या अंशभूताभिः। निजकाम संप्लुतः अष्ट नंद
परिपूर्णः। गार्हमेधिकान् गृहस्थधर्मान् ४३ अनुरागहाससहितमवलोकं च। तत्पूर्वकं नवसंगमं च। तद्गतं जल्पं च। तस्मिंल्लज्जां च भेजुः ४४ विश्रम
णं संवाहनं केशप्रसारः केशसाधनं। दासीनां शतानि विद्यंते यासां तथाभूता अपि स्वयं विभोर्दास्यं विदधुरिति ४५ ॥ दशमे एकोनषष्टितमः

ए॰ म॰
२८

अथषष्टितमेकृष्णःपरिहासेनरुक्मिणीं।कोपयित्वाततःप्रेमकलहेतामसांत्वयत्॥रामरामजनानंदमहोदयविडंबनैः।रुक्मिण्याप्रेमकलहछद्मनैश्वर्यमीर्यते॥२
स्वतल्पस्थंस्वपर्यंकस्थं॥१॥वक्ष्यमाणंरुक्मिण्याःश्रियःश्रीकृष्णेनपरमंप्रेमसंभावयितुंतच्छ्लोकमेवतल्पमनुस्मरयतियस्मिन्निति॥२॥आदौतावत्त्रिभिःश्लोकैर्मंदिरमनुवर्ण
यतितस्मिन्निति।तच्छ्वेनातिप्रसिद्धमाह।भ्राजंतिमुक्तादामानितेषांविलंबाःसंतियस्मिंस्तेनवितानेनविराजिते।तृतीयांतानांविराजितपदेनान्वयः॥३॥सुगंधतयद्वि

श्रीशुकउवाच॥ ॥कर्हिचित्सुखमासीनंस्वतल्पस्थंजगद्गुरुं।पतिंपर्यचरद्भैष्मीव्यजनेनसखीजनैः॥१॥यस्त्वेतल्लीलयाविश्वंसृजत्यत्त्यवतीश्वरः।स
हिजातःस्वसेत्वनांगोपीथाययदुष्वजः॥२॥तस्मिन्नंतर्गृहेभ्राजन्मुक्तादामविलंबिना।विराजितेवितानेनदीपैर्मणिमयैरपि॥३॥मल्लिकादामभिःपुष्पै
र्द्विरेफकुलनादिते।जालरंध्रप्रविष्टैश्चगोभिश्चंद्रमसोमलैः॥४॥पारिजातवनामोदवायुनोद्यानशालिना।धूपैरगुरुजैराजन्जालरंध्रविनिर्गतैः॥५॥
पयःफेननिभेशुभ्रेपर्यंकेकशिपूत्तमे।उपतस्थेसुखासीनंजगतामीश्वरंपतिं॥६॥वालव्यजनमादायरत्नदंडंसखीकरात्।तेनवीजयतीदेवीउपासां
चक्रईश्वरं॥७॥सोपाच्युतंक्वणयतीमणिनूपुराभ्यांरेजेंगुलीयवलयव्यजनाग्रहस्ता।वस्त्रांतगूढकुचकुंकुमशोणहारभासानितंबधृतयाचपरार्घ्य
कांच्या॥८॥

रेफकुलैर्नादिते॥४॥प्रविशद्भिश्चंद्ररश्मिभिः।निर्गच्छद्भिःअगुरुसंभवैर्धूपैश्चातिमनोहरत्वंदर्शितं॥५॥पयसःक्षीरस्यफेनइवस्वच्छंउन्निपर्यंकस्थेकशिपूत्तमेहंसतू
लिकायांउपतस्थेअसेवत॥६॥तदेवाहतेनयतिवालव्यजनमिति॥७॥उपाच्युतंअच्युतस्यसमीपेसामणिनूपुराभ्यांरेजे।क्वणयतीमणिमयौनूपुरौकूजयंती।तथां
गुलीयवलयव्यजनानिअग्रहस्तेहस्ताग्रेयस्याःसा।वस्त्रांतेनगूढौस्थगितौकुचौतयोःकुंकुमंतेनशोणोहारस्तस्यभासा।तथानितंबेधृतयापरार्घ्ययाअमूल्या
कांच्याचविरेजे॥८॥

ह.उ.
२९

तांनिरीक्ष्यप्रीतःसंस्मयमानोहरिराबभाषेकथंभूतांयालीलयाधृतनरतनोःस्वस्य अनुरूपंरूपंयस्याःतांयथोक्तंश्रीपराशरेण।देवत्वेदेवदेहेयंमनुष्यत्वेचमानु
षी।विष्णोर्देहानुरूपांवैकरोत्येषात्मनस्तनुमिति।किंच।अलकैःकुंडलाभ्यांनिष्केणपदकेनचा॰कृतकंठेनचचतुर्दिक्षुशोभितेवक्त्रेउल्लसंतीस्मितसुधायस्याःसातां
९ सर्वगुणयुक्तायाअर्पितवत्बुद्धिर्मेइत्याशयेनाहराजपुत्रीत्याद्येकादशभिः।हेराजपुत्रिलोकपालानामिवविभूतिरैश्वर्यंयेषांतैः।तथामहाप्रभावैराद्यैरूपा

तांरूपिणींश्रियमनन्यगतिंनिरीक्ष्ययालीलयाधृततनोरनुरूपरूपा।प्रीतःस्मयन्नलककुंडलनिष्ककंठवक्त्रोल्लसत्स्मितसुधांहरिराबभाषे ९ ॥
श्रीभगवानुवाच ॥ राजपुत्रीप्सिताभूपैर्लोकपालविभूतिभिः।महानुभावैःश्रीमद्भीरूपौदार्यबलोर्जितैः ॥ १० ॥ तांस्त्वाप्राप्तानर्थिनोहित्वाचैद्यादी
स्मरदुर्मदान्।दत्ताभ्रात्रास्वपित्राचकस्मान्नोववृषेऽसमान् ॥ ११ ॥ राजभ्योबिभ्यतःसुभ्रुसमुद्रंशरणंगतान्।बलवद्भिःकृतद्वेषान्प्रायस्त्यक्तनृपास
नान् १२ अस्पष्टवर्त्मनांपुंसामलोकपथमीयुषां।आस्थिताःपदवींसुभ्रुप्रायःसीदंतियोषितः ॥ १३ ॥ निःकिंचनावयंशश्वन्निःकिंचनजनप्रियाः
।तस्मात्प्रायेणनह्याढ्यामांभजंतिसुमध्यमे ॥ १४ ॥ ययोरात्मसमंवित्तंजन्मैश्वर्याकृतिर्भवः।तयोर्विवाहोमैत्रीचनोत्तमाधमयोःक्वचित् ॥ १५ ॥ वै
दर्भ्येतदविज्ञायत्वयाऽदीर्घसमीक्षया।वृतावयंगुणैर्हीनाभिक्षुभिःश्लाघितामुधा ॥ १६ ॥

दिभिरूर्जितैःस्वपूर्वमीप्सितासि १० तान्हित्वाऽनोऽस्मान्अत्रअसमान्कस्माद्वृणीषेवृतवतीत्वं ११ किंच।आश्रयशः।राजभ्योराजसंघादिभ्योविभ्यतः।संप्राप्तवंत. १२
अस्पष्टवर्त्मनामविज्ञाताचाराणां।अलोकपथं।अलौकिकंपारतंत्र्यं।पदवींमार्गंआस्थिताःअनुश्रिताः १३ किंच।निःकिंचनाइति १४ आत्मसमंपरस्परमनुरूपं।
जन्मैश्वर्यादीनांसहिताआकृतिःरूपंजातिर्वासमा।भवआयतिः १५ नदीर्घासमीक्षाविचारोयस्यास्तया। १६

राम
२९

अथंइदानीमपि १७ तर्हिकिमित्यानीताहमितिवेदित्याशंक्याह वैधेयेति।ममभांद्विषंति १८ स्मयउन्नयेगर्वापनयनाय १९ स्त्रीणामतिदुःसहमौदासीन्यम
कामत्वंचाहउदासीनाइति।गेहयोःदेहगेहयोरुदासीनाः।अतएवज्योतिरक्रियाःज्योतिःप्रदीपादितद्वत्साक्षिमात्रतयाक्रियारहिताआत्मदेहेवत्नीमहइति

अथात्मनोऽनुरूपंवैसजस्वक्षत्रियर्षभंयेनत्वमाशिषःसत्याइहामुत्रचलप्स्यसे २० चैद्यशाल्वजरासंधदंतवक्रादयोनृपाःममद्विषंतिवामो
रुरुक्मीचापितवाग्रजः॥ १८ ॥ तेषांवीर्यमदांधानांदृप्तानांस्मयनुत्तये।आनीतासिमयाभद्रेतेजोऽपहरतांसतां॥ १९ ॥ उदासीनावयंनूनंनस्त्र्यपत्या
र्थकामुकाः।आत्मलब्ध्यास्महेपूर्णागेहयोर्ज्योतिरक्रियाः॥ २० ॥ श्रीशुकउवाच॥ ॥ एतावदुक्त्वाभगवानात्मानंवल्लभामिव।मन्यमानामविश्लेषा
त्तद्दर्पघ्नउपारमत्॥ २१ ॥ इतित्रिलोकेशपतेस्तदात्मनःप्रियस्यदेव्यश्रुतपूर्वमप्रियं।आश्रुत्यभीताहृदिजातवेपथुश्चिंतांदुरंतांरुदतीजगामह॥
२२ ॥ पदासुजातेननखारुणश्रियाभुवंलिखंत्यश्रुभिरंजनासितैः।आसिंचतीकुंकुमरूषितौस्तनौतस्थावधोमुख्यतिदुःखरुद्धवाक्॥ २३ ॥ त
स्याःसुदुःखभयशोकविनष्टबुद्धेर्हस्तात्श्लथद्वलयतोव्यजनंपपात।देहश्चविक्लवधियःसहसैवमुह्यन्रंभेववातविहताप्रविकीर्यकेशान्॥ २४ ॥
तद्दृष्ट्वाभगवान्कृष्णःप्रियायाःप्रेमबंधनं।हास्यप्रौढिमजानंत्याःकरुणःसोऽन्वकंपत॥ २५ ॥

२० अविश्लेषाद्धेतोरात्मानंवल्लभामेवेत्येवार्थेइवशब्दः॥ २१ ॥ या चिन्हालक्षणमाह।पदेति।नखेररुणाश्रीःकांतिर्यस्यतेन।सुजातेनसुकोमलेनपदा २३
दुःखमप्रियश्रवणात्।भयंत्यागशंकया।शोकःअनुतापःतैर्विनष्टाबुद्धिर्यस्याःतस्याः।श्लथंतिपतंतिवलयानियस्माद्धस्तात्तस्मात्।देहश्चपपात।विक्ल
वाअवशीधीर्यस्याःतस्याः २४ हास्यस्यप्रौढिंगांभीर्यं २५

द.उ.
३०

चतुर्भुज इति उत्थापनाक्षेपणवक्त्रपरिमार्जनाद्यर्थमाविःकृतचतुर्भुज इत्यर्थः ।समूह्य निवध्य ॥ २६ ॥ अश्रुकले अश्रुभिः शोचिते शुचा शोकाऽश्रुभिः ॥ २७ ॥ सांत्व
यामास अनुनीतवान् ॥ २८ ॥ मा मां ।त्वद्वचः किंतु वदिष्यसीति श्रोतुकामेन श्रोतुमिच्छता क्ष्वेल्या नर्म[illegible]एवमाचरितमुक्तं ।न तत्वतः हे अंगने सुंदरि ॥ २९ ॥ प्रे
मसंरंभेण प्रणयकोपेन स्फुरितः कंपितोऽधरो यस्मिन् तत् कटाक्षेन कटाक्षाः तैराक्षेपैः अरुणावपांगौ यस्मिन् तत् ।अतएव सुंदरं भ्रुकुटिलं भ्रुकुटीतटं य
स्मिन् तत् ॥ ३० ॥ ननु कलहे किं कौतुकं सुखं वाऽत आह अयं हीति ।नर्मैर्नर्मभिः यामः कालः ॥ ३१ ॥ २ ॥ भगवतस्तस्यैश्वर्यमुक्तं सुखं सव्रीडहासेन रुचिरेण स्निग्धे

पर्यंकादवरुह्याशु तामुत्थाप्य चतुर्भुजः ।केशान् समूह्य तद्वक्त्रं प्रामृजत्पद्मपाणिना ॥ २६ ॥ प्रमृज्याश्रुकले नेत्रे स्तनौ चोपहतौ शुचा ।आश्लिष्य बा
हुना राजन्ननन्यविषयां सतीं ॥ २७ ॥ सांत्वयामास सांत्वज्ञः कृपया कृपणां प्रभुः ।हास्यप्रौढिभ्रमच्चित्तामतदर्हां सतां गतिः ॥ २८ ॥ श्रीभगवानुवाच ॥
मा मा वैदर्भ्यसूयेथा जाने त्वां मत्परायणां ।त्वद्वचः श्रोतुकामेन क्ष्वेल्याचरितमंगने ॥ २९ ॥ मुखं च प्रेमसंरंभस्फुरिताधरमीक्षितुं ।कटाक्षेपारुणा
पांगं सुंदरभ्रुकुटीतटं ॥ ३० ॥ अयं हि परमो लाभो गृहेषु गृहमेधिनां ।यन्नर्मैर्नीयते यामः प्रियया भीरु भामिनि ॥ ३१ ॥ श्रीशुक उवाच ॥ सैवं भगवता
राजन्वैदर्भी परिसांत्विता ।ज्ञात्वा तत्परिहासोक्तिं प्रियत्यागभयं जहौ ॥ ३२ ॥ बभाष ऋषभं पुंसां वीक्षंती भगवन्मुखं ।सव्रीडहासरुचिरस्निग्धापांगे
न भारत ॥ ३३ ॥

नापांगेन वीक्ष्यमाणा ॥ असमत्वं स्वयं दुर्गाश्रयणं प्रबलैः कलिः ।अराजत्वमविज्ञाता लौकिके ह्यवसादनं ।निःकिंचनत्वं तत्स्त्रीतिराद्याऽना
दरणीयता ।अनौचित्यं निर्गुणत्वं वृथा श्लाघा चरित्रुभिः ।औदासीन्यमकामत्वं च दोषान्षोडश सा सतः ।अज्ञत्वादीर्घदर्शित्वे भैष्मी राज्ञां वहून्गुणान्वाक्ष्मन
मेदिता न भैष्मीन्यषेधन्गुणत्ववैः ।भगवतः स्वनिंदापराणि वचनानि तानि सर्वोत्कर्षपरतया व्याचक्षाणा प्रतिभाषते स्म ॥ ३३ ॥

राम
३०

तत्रयदुक्तंकस्मान्नोवव्रेऽसमानितितत्रासाम्यंसत्यमेवेत्याह।नन्वेवमिति।हेअरविंदविलोचन।त्र्यधीशःत्रयाणांब्रह्मादीनामप्यधीशोनियंतात्वंक्क।क्काहंगुणप्रकृ
तिःत्रिगुणस्वभावाप्राकृतागुणमयीप्रकृतिर्वा।ननुत्वमेवाधीश्वरीश्रीः।सर्वैर्नृपास्त्यक्तादितिअतआह।अज्ञैःसकामैर्गृहीतौपादौयस्याःसा ३४ यदुक्तंराजभ्योविभ्य
तःसमुद्रंशरणंगतानितितत्राह।सत्यमिति।हेउरुक्रमेतिभयाभावंदर्शयति।गुणाःशब्दादयएवराजानःतइतिराजानस्तेभ्योभयादिवेति।अंतःहृदयेसमुद्रेतद्वदगा
धे।विषयाकारैरपरिच्छिन्नइत्यर्थः।शेतेनिश्चलतयाप्रकाशते।उपलंभनमात्रःचैतन्यघनआत्माभवानिति।बलवद्भिःकृतद्वेषानितियदुक्तंतदपिसत्यमित्याहनि

रुक्मिण्युवाच ॥ नन्वेवमेतदरविंदविलोचनाहयद्वैभवान्भगवतोऽसदृशीविभूम्नः।क्कस्वेमहिम्न्यभिरतोभगवांस्त्र्यधीशःक्काहंगुणप्रकृतिर
ज्ञगृहीतपादा ३४ सत्यंभयादिवगुणेभ्यउरुक्रमांतःशेतेसमुद्रउपलंभनमात्रआत्मा।नित्यंकदिंद्रियगणैःकृतविग्रहस्त्वंत्वत्सेवकैर्नृपपदंवि
धुतंतमोंधं ३५ त्वत्पादपद्ममकरंदजुषांमुनीनांवर्त्मास्फुटंनृपशुभिर्ननुदुर्विभाव्यं।यस्मादलौकिकमिवेहितमीश्वरस्यभूमंस्तवेहितमथोअनु
येभवंतं ॥ ३६ ॥

त्यमिति।कदिंद्रियगणैः।दुष्टत्वप्रायेणबहुवचनं।कुत्सितइंद्रियगणोयेषामितिवातैस्त्वन्नित्यंकृतविग्रहः।तेषुतवाप्रतीतेः।यदुक्तंत्यक्तनृ
पासनानितितत्सत्यमेवेत्याहत्वत्सेवकैरिति।नृपाणांपदमासनंअंधंगाढंतमएवतत्।अविवेकबहुलत्वात्त्वत्सेवकैरेवतत्त्यक्तं।किंपुनर्वक्तव्यंत्वयात्यक्तमिति।अ
स्पष्टवर्त्मनांपुंसामलोकपथमीयुषामितियदुक्तंतदपितथैवेत्याहत्वत्पादेति।नृपशुभिर्नराकारैःपशुभिः।किंपुनर्वक्तव्यंतववर्त्मास्फुटमिति।किंचयस्माद्येभ
वंतमनुवर्तंतेतेषांअपीहितमलौकिकमिव।अथोअतः।किमुवक्तव्यंतवेश्वरस्येहितंअलौकिकमित्यर्थः।आस्थिताःपदवींसुभ्रुप्रायःसीदंतियोषितइत्यस्यप
रिहारंवक्तुतियद्वांछयेतिपंचमश्लोके ॥ ३६ ॥

द. उ.
३१

निःकिंचनावयंशश्वन्निःकिंचनजनप्रियाः।तस्मात्प्रायेणनह्याद्यामांसज्जंतिसुमध्यमेइत्येतत्श्लोकोक्तंदोषत्रयंपरिहरतिनिःकिंचनइति।दरिद्रतालक्षणंनिः
किंचनत्वंनुतवनघटइत्याह।यस्मादिति।अन्यतोवलिभुजःइन्द्राअपिब्रह्मादयोयस्मैभवतेवलिंहरंति।तस्यसर्वेश्वरस्यभवतोदरिद्रतानघटतइत्यर्थः।निःकिंचन
जनप्रियाइत्यत्रतत्स्वरूपेणवहुव्रीहिणावानिंदाख्यादितिस्वयमसुभयथाप्यसौतिश्रेष्ठोभवानिति।वलिभुजांब्रह्मादीनांलोकेश्वराणांत्वंश्रेष्ठःतेपितुभ्यंनवेति।त
स्मात्प्रायेणनह्याद्यामांभजंतीत्यस्योत्तरंनत्वाविदंतीति।आद्यतयांऽधाप्त्वात्वांअंतकंनविदंतिअतस्तेऽप्यन्यैस्तुपः।अन्यैर्नेवतर्पयंतिनत्वांभजंतीत्यर्थः॥३७॥वलिभुजा
मपिभवान्श्रेष्ठःइत्यत्रहेतुंवदंतीयद्योरेवसमंवित्तमित्यनेनोक्तमनौचित्यंपरिहरतित्वंवाइति।फलात्मापरमानंदरूपः।एतस्यैवानंदस्यान्यानिभूतानिमात्रामुप

निःकिंचनोननुसवान्नयतोस्मिकिंचिद्यस्मैवलिंवलिभुजोपिहरंत्यजाद्याः।नत्वाविदंत्यसुतृपोंतकमाद्यतांघाःश्रेष्ठोत्सवाद्वलिभुजामपितेपिनु
ष्यं॥३७॥त्वंवैसमस्तपुरुषार्थमयःफलात्मायद्वांछयासुमतयोविसृजंतिकृत्स्नं।तेषांविभोसमुचितोभवतःसमाजःपुंसःस्त्रियाश्चरतयोःसुखदुः
खिनोर्न॥३८॥त्वंन्यस्तदंडमुनिभिर्गदितानुभावआत्मात्मदश्चजगतामितिमेवृतोसि।हित्वाभवद्भ्रुवउदीरितकालवेगध्वस्ताशिषोऽब्जभवनाकपतीन्
कुतोऽन्ये॥३९॥

जीवंतीतिश्रुतेः।समाजःसेव्यसेवकलक्षणसंवंधः।ननुपुंसःस्त्रियाश्चमिथोरतयोःअतएवतत्कृतसुखदुःखिनोःतदाकुलयोरित्यर्थः॥३८॥सि
क्षुभिःश्लाघितानुचेत्यस्यपरिहारःत्वमितितिभिःकृपदस्याख्यानंन्यस्तदंडैर्मुनिभिरिति।अनुचेत्यस्यपरिहारश्चआत्मेति।यदर्थंसर्वंप्रियंभवतितत्सर्वजगतामात्मनस्त्ववव
र्पणेनंनवृथेत्यर्थः॥किंच।आत्मदइतिवैदर्भ्यतदविज्ञायत्वयादीर्घसमीक्ष्येतिसूचितमिन्नुक्तंदोषद्वयंपरिहरतिहित्वेति।ज्ञात्वैवमेमयावृतोसीत्यज्ञानपरिहारः।हि
त्वेतिदीर्घसमीक्षापरिहारः।भवतोभ्रुवःसकाशादुदीरितोयःकालःतस्यवेगःतेनध्वस्ताआशिषोयेषांतान्ब्रह्मादीनपिविहायकुतोऽन्येवराकाइत्यर्थः॥३९॥

राम
३१

स्वाज्ञानं परिहृत्य प्रस्तुतं तस्य गुणवर्णनप्रदीप्तकोपसंरंभेण तस्मिन्नेवाज्ञानमापादयति। जाड्यमिति। सिंहो यथा पशून्विद्राव्य स्वबलिं हरति तथा शार्ङ्गधनुर्निनादेनै
व जरासंधादीन्विद्राव्य मां स्वभागं श्रियं यस्त्वं हृतवानसि। तस्य तव राजभ्यो भयादुदधिं प्रपन्न इति यद्वचो भाषणं तज्जाड्यं मौढ्यं न घटत इत्यर्थः। ४० यच्चान्यदस्पष्टवर्त्मना
मित्यादिनाऽर्थो ऽत्र त्वां भजंतः सीदंतीत्यवसादनं श्रमावहत्वमुक्तं तदपि मंदमेवेत्याह यद्वांछयेति यस्य तव सज्जनवांछया नृपोत्तमाः अंगो वेनस्य पिता। वैन्यः पृथुः जायं
तो भरतः। नाहुषो ययातिः गयश्चादिर्येषां ते यथा एते तव पदवीं मार्गं आस्थिताः ते किं सीदंति न सीदंत्येव। अपि तु त्वत्पदं प्राप्ता इत्यर्थः। एवं च कोपावेशेनावसादनस्य प

जाड्यं वचस्तव गदाग्रज यस्तु भूपान्विद्राव्य शार्ङ्गनिनदेन जहर्थ मां त्वं। सिंहो यथा स्वबलिमीश पशून्स्वभागं तेभ्यो भयाद्यदुदधिं शरणं प्रपन्नः। ४०।
यद्वांछया नृपशिखामणयोंगवैन्यजायंतनाहुषगयादय ऐकपत्यं। राज्यं विसृज्य विविशुर्वनमंबुजाक्ष सीदंति तेनुपदवीं त इहास्थिताः किं। ४१।
कान्तं श्रयेत तव पादसरोजगंधमाघ्राय सन्मुखरितं जनतापवर्गं। लक्ष्म्यालयं त्वविगणय्य गुणालयस्य मर्त्या सदोरुभयमर्थविविक्तदृष्टिः। ४२।
तं त्वानुरूपमभजं जगतामधीशमात्मानमत्र च परत्र च कामपूरं। स्यान्मे तवांघ्रिररणं सृतिभिर्भ्रमंत्या यो वै भजंतमुपयात्यनृतापवर्गः। ४३।

रिहारादस्पष्टवर्त्मनामित्येतदानंतर्यं विहायात्रोक्तम्। ४१ यदुक्तं अथात्मनोऽनुरूपमिति तत्राह। कान्तमिति श्लोकद्वयेन। गुणानामालयस्य तव पादसरोज
गंधं। जनताया अपवर्गं मोक्षरूपं। लक्ष्म्या आलयं तत्सेव्यं। सद्भिर्मुखरितं वर्णितमाघ्राय तमविगणय्य मर्त्या मरणधर्मिका। सदा उरुभयं यस्य तं मर्त्यं का स्त्री
श्रयेत सेवेत अर्थे विविक्ता दृष्टिर्यस्याः सा गुणालयस्येत्यनेन त्वगुणैर्हीना इति यदुक्तं तदपास्तं। ४२ अतस्त्वामेवाहमभजमित्याह। तं त्वेति प्रार्थयते स्यादिति।
अरणं शरणं सृतिभिर्देवतिर्यगादिभिर्जन्मभिः प्रांतरे त्वर्थवादवत्फलकर्मश्रवणैरित्यर्थः। कथंभूतस्य तव यस्त्वं अनृतस्य संसारस्यापवर्गो नाशो यस्मा
त्सः भजंतमुपयाति आत्मसात्करोति तस्य तवांघ्रिरिति भृत्या शरणमेवानुरूपं जनयोग्यं अतस्त्वामभजमित्यर्थः। ४३

त-

येष्वेन्नाराज्ञांवहवोगुणाःराजपुत्रीस्मिताभूपैलोकपालविभूतिभिरित्यादिनातत्रसेर्घ्यसशापंमांगुलिसंगंवाहद्धास्यांतस्याःस्मरिति।खराइवकेवलंसारवाहाः।
गावोवलीवर्दाइवनित्यंव्यापारक्लिष्टाः।श्वानइवावमताः।विडालाइवरूपणाहिंस्राश्च।भृत्याइवकिंकराः।नृपास्तस्याडुर्भागायाःपतयःस्युः।यस्याःकर्णपथं
त्वत्कथानप्राप्नुयादिति॥४४॥तथाहितेपदाब्जमकरंदमजिघ्रतीसतीयाश्रीविमूढासा।कांतोयमितिमतिर्यस्याःसाकांतमतिर्जीवच्छवंभजति।त्वगादिभिर्व
हिःपिनद्धां।अंतर्मांसादिमयमिति॥४५॥यद्वक्तमुदासीनावयमित्यादितत्राह।अस्त्विति।यद्यपित्वंनिरपेक्षस्तथापिममतेचरणानुरागोस्ति।मयिचमयापिना

तस्याःस्फुरच्युतनृपास्तवतोपदिष्टाःश्रीणांगृहेषुखरगोश्वविडालभृत्याः।यत्कर्णमूलमरिमर्षणनोपयायाद्युष्मत्कथामृडविरिंचसभासुगीता॥४४॥त्वक्श्मश्रुरोमनखकेशपिनद्धमंतर्मांसास्थिरक्तकृमिविट्कफपित्तवातं।जीवच्छवंभजतिकांतमतिर्विमूढायातेपदाब्जमकरंदमजिघ्रतीस्त्री॥४५॥अस्त्वंबुजाक्षममतेचरणानुरागआत्मन्रतस्यमयिचानतिरिक्तदृष्टेः।यर्ह्यस्यवृद्धयउपात्तरजोतिमात्रोमामीक्षसेतदुहनःपरमानुकंपा॥४६॥नैवालीकमहंमन्येवचस्तेमधुसूदन।अंबायाइवहिप्रायःकन्यायाःस्याद्रतिःक्वचित्॥४७॥

निरिक्ता।अतिशयवतीदृष्टिर्यस्यतस्यते।आत्मनस्त्वात्मन्येवरतस्यात्तर्हितवतेनकोलासः।त्वच्चरणानुरागएवमहांल्लाभः।किंचायर्हिअस्यविश्वस्यवृद्धयेउ
पात्तरजसोअतिमात्राश्रीकंदर्पयेनसः।तथाभूतःसन्मांसमीक्षतेउएवार्थे।हहर्षेतदेवनःपरमानुकंपाअत्यनुग्रहइति॥४६॥तदेवंतदुक्तंसर्वंप्रतिव्याख्या
यप्रसन्नचित्तामंत्रमुपदिशंत्याह।द्वाभ्यांनैवेति।अथात्मनोऽनुरूपमित्यादितेवचःअलीकंमिथ्येतिनैवमन्ये।यतोलोकेकन्यायाएककचिद्रतिर्भवति।
यथाकाशिराजकन्यानांअंबाअंबिकाअंबालिकानांतिसृणांमध्येअंबायाःकन्यायाएवशाल्वेरतिर्जातातद्वत्॥४७॥

वृढायाःपरिणीतायाश्चपीति।उतयस्मादिहपरलोकद्वयाच्च्युतःभ्रष्टइति ४८ चलंस्मितात्उपहसितात्सि।अन्वाऽनुअन्वाख्यातवती ४९ मयिएकांतसक्तायाःसेकामा।
संत्येवाअकामायकामानिवृत्तयेमेरूपर्यवसायिनइत्यर्थः ५० अनुवादेनवरान्दत्वातामभिनंदतिउपलब्धमिति।यद्यस्मान्मयिअवर्तमानाधीनीपकर्षितानान्यवि
षयाजाता ॥ ५१ एकांतभक्तिमभिनंद्यतामेवदृढीकर्तुंसकामानक्तान्निंदतियेमामिति।दांपत्येदंपत्युपभोग्यसुखार्थी ॥ ५२ मायामोहितत्वमेवोपपादयति।मांप्राप्ये

वृढायाश्चापिपुंश्चल्यामनोस्येतिनवंनवं।बुधोसतीनविसृयात्तांबिभ्रदुभयच्युतः ॥ ४८ श्रीकृष्णउवाच ॥ ॥ साध्व्येतच्छ्रोतुकामैस्त्वंराजपुत्रिप्रलंभि
ता।ममोदितंयदन्वात्थसर्वंतत्सत्यमेवहि ॥ ४९ यान्याकामयसेकामान्मय्यकामायभामिनि।संतिह्येकांतभक्तायास्तवकल्याणिनित्यदा ॥ ५० उ
पलब्धंपतिप्रेमपातिव्रत्यंचतेऽनघे।यद्वाक्यैश्चाल्यमानायानधीर्मय्यपकर्षिता ॥ ५१ येमांभजंतिदांपत्येतपसाव्रतचर्यया।कामात्मनोऽपवर्गेशं
मोहितामममायया ॥ ५२ मांप्राप्यमानिन्यपवर्गसंपदंवांछंतियेसंपदएवतत्पतिं।तेमंदभाग्यानिरयेपियेनृणांमात्रात्मकत्वान्निरयःसुसंगमः
॥ ५३ ॥ दिष्ट्यागृहेश्वर्यसकृन्मयित्वयाकृताऽनुवृत्तिर्भवमोचनीखलैः।सुदुःकरासौसुतरांदुराशिषोह्यसुंभरायानिकृतिंजुषःस्त्रियः ॥ ५४ ॥

ति।अपवर्गेणसहसंपदोयस्मिन्नतंमांप्राप्यप्रसाद्ययेकेवलंसंपदएवविषयान्वांछंतिनतुमां।तत्पतिंतासांसंपदांयोहयमेवपतिस्तं।येविषयानिरयेपिपितिनिरू
प्येनावपिस्युःतान्।किंच।तेषांमात्रात्मकत्वात्विषयात्मकत्वान्निरयःसुसंगमःशोभनसंगमएवस्यादतोमंदभाग्याइत्यर्थः ॥ ५३ तस्मात्हेगृहेश्वरि।त्वयामयि
भवमोचनीनिःकामाऽनुवृत्तिःकृताएतद्दिष्ट्याभद्रं।कथंभूताखलैःसुदुःकराडराशिषोदुरभिप्रायायाः।अतएवासुंभरायाः।प्राणतर्पणपरायाः।निकृतिंजुषोवंच
नापरायाःस्त्रियोसुतरामसावनुवृत्तिर्दुःकरेति ॥ ५४ ॥

भा॰द॰उ॰
३२

किंवासंतिनिःकामाःप्रेमोवमय्यत्तुवर्त्तमानावह्याः।किंतुत्वयासदृशीक्वापिनपश्यामीतितस्याशक्तिंवद्धमानेनास्तिनंदतिनत्वादृशीतित्रिभिः।उपश्रुताःसत्याःकथाय
श्चमे ॥५५॥ प्राङ्वाहपर्वणिअनिरुद्धविवाहेअक्षगोष्ठ्यांद्यूतसभायांतस्यभ्रातुर्वधंतस्मिन्कालेकालांतरेतद्नुस्मरतःपुनःपुनःसमुद्भूतंदुःखमस्मात्सिरयोगोवियोगस्तद्रीत्या
ऽसह्यःसोढवत्यसि।अनेनैवानिरुद्धविवाहानंतर्यमस्यज्ञातव्यं ॥५६॥ अपिच।इतइति।आत्मलसनेमत्वाऽस्मर्थांमयिविरायतिश्चोत्साविनिविवाहेश्चारांतव्यमितिहृतेसम
येकथंचिदप्राप्सवतिसतिएतद्विश्वंशून्यंमत्वाइदमनन्ययोगपमंगांजिहासेत्यकुमिह्यामित्यद्ग्यामीत्येवंदूतःप्रस्थापितः।तथाप्युक्तंत्वया।यर्ह्यंबुजाक्षनलभेयभवत्प्रसा

नत्वादृशींप्रणयिनींगृहिणींगृहेषुपश्यामिमानिनियया स्वविवाहकाले।प्राप्तान्नृपानवगणय्यरहोहरोमेप्रस्थापितोद्विजउपश्रुतसत्कथस्य
॥५५॥ भ्रातुर्विरूपकरणंयुधिनिर्जितस्यप्रोद्वाहपर्वणिचतद्वधमक्षगोष्ठ्यां।दुःखंसमुद्धमसहोस्मदयोगभीत्यानैवाब्रवीःकिमपितेनवयंजि
तास्ते ॥५६॥ दूतस्त्वयात्मलभनेसुविविक्तमंत्रःप्रस्थापितोमयिचिरायतिशून्यमेतत्।मत्वाजिहासइदमंगमनन्ययोग्यंतिष्ठेतत्त्वयिचदं
प्रतिनंदयामः ॥५७॥ श्रीशुकउवाच ॥ ॥एवंसौरतसंलापैर्भगवान्जगदीश्वरः।स्वरतोरमयारेमेनरलोकंविडंबयन् ॥५८॥ तथान्यासाम
पिविभुर्गृहेषुगृहवानिव।आस्थितोगृहमेधीयान्धर्माॅल्लोकगुरुर्हरिः ॥५९॥ ॥इतिश्रीभा॰म॰पु॰दशमस्कंधेकृष्णरुक्मिणीसंवादेषष्टि
तमोध्यायः ॥ ॥६०॥

दंजह्यामसूक्ष्वतत्कृशाऽस्शतजन्मभिःस्यादितियद्वाअजिहासइतिच्छेदःत्यक्तुमेवतइत्यर्थः।तन्नचकर्मत्वय्यवतिष्ठेवतन्नतत्प्रतिक
त्वंशिकामित्यर्थः।किंतु।केवलंत्वांप्रतिनंदयामः।हर्षयामइति ॥५७॥ सौरतसंलापैःसुरतनर्मगोष्ठीभिः ॥५९॥ ॥दशमेषष्टितमः ॥ ॥एकषष्टितमेशौरेःपुत्रपौ
त्रादिसंततिः।अनिरुद्धविवाहेचरुक्मिणोरामतोवधः ॥१॥ अष्टाधिकशतद्व्यष्टसहस्रस्त्रीसमुद्भवान्।कोटिशःपुत्रपौत्रादीन्हरिर्दारैरयोजयत् ॥२॥

राम
३२

तदेववक्तुमाह। एकैकश इति। कृष्णस्य अबलास्तार्याः सर्वाया आत्मनि संपत्तया पितुः सकाशादनवमान् ॥१ प्रेष्ठं न्यमंसत। अच्युतस्य प्रियतमं प्रत्येकं स्वं मेनिरे। न तत्स
तत्वमात्मारामत्वं विदंतिता॥ २ आत्मारामत्वं व्यनक्ति द्वयेन चार्वि इति। चार्वब्जकोशवद्वदनं च। आयतानि बाहू नेत्राणि च सप्रेम्णा हासरसेन वीक्षितानि च वल्गुज
ल्पाश्च। भगवत एतैः संमोहिता वनिताः स्वैः स्वैरनेकैर्विभ्रमैस्तस्य मनो विजेतुं हर्तुं न समशकन् शक्ता बभूवुः। भूम्नः परिपूर्णस्य ॥ ३ तासां विभ्रमान्वर्णयन्नेतद्विवृणो

॥श्रीशुक उवाच॥ ॥एकैकशस्ताः कृष्णस्य पुत्रान्दशदशाबलाः। अजीजनन्ननवमान्पितुः सर्वात्मसंपदा ॥१॥ गृहादनपगं वीक्ष्य राजपुत्र्यो ऽच्युतं
स्थितं। प्रेष्ठं न्यमंसत स्वं स्वं न तत्तत्त्वविदः स्त्रियः॥ २ चार्वब्जकोशवदनायतबाहुनेत्रसप्रेमहासरसवीक्षितवल्गुजल्पैः। संमोहिता भगवतो न मनो वि
जेतुं स्वैर्विभ्रमैः समशकन्वनिता विभूम्नः॥ ३ स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः। पत्न्यस्तु षोडशसहस्रमनंगबा
णैर्यस्येंद्रियं विमथितुं करणैर्न शेकुः॥ ४ इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोपि न विदुः पदवीं यदीयां। भेजुर्मुदा ऽविरतमेधितयानु
रागहासावलोकनवसंगमलालसाद्यम्॥ ५॥

स्मायेति। स्मायो गूढहसितं तद्युक्ताः अवलोकलवाः कटाक्षाः तैर्दर्शितः सूचितो भावो ऽभिप्रायः तेन हारि मनोहरं शीलं यद्भ्रूमंडलं तेन प्रहिताः प्रस्था
पिता ये सौरता मंत्राः तेषु शौंडैः प्रगल्भैरनंगस्य बाणैः शरैः अन्यैश्च करणैः कामशास्त्रप्रसिद्धैः यस्येंद्रियं मनो मथितुं क्षोभयितुं षोडशसहस्रमपि पत्न्यो न शेकु
रिति ४ अनुरागेण हासो ऽवलोकश्च नवसंगमे लालसं औत्सुक्यं च तैराद्याद्यथ विभ्रमकदंबश्च तं भेजुः। अनुरागहासावलोकनवसंगमलालसाद्यं भेजुः तस्य मनो विजेतुं न शेकुरिति वा ॥५

द॰ उ॰
३४

किंवा चत्वक्रमादिभिर्विलोभ्यं स्यद्रास्यं नित्यं विदधुरिति । प्रौढराविपिनवसंगमाद्यभिधानं अग्रतः स्वैर्नौत्सुक्येन च तथा प्रतीतेः । तेषामेव स्त्रीकानां प्रभावांतरेषु
नः पुनराह्वत्तिरिति सौंदर्यात् ॥ ६ ॥ प्रासंगिकमुक्त्वा प्रस्तुतमाह तासामिति । दशदशपुत्रा यासां ताः तासां मध्ये अष्टौ महिष्यो याः प्रागुक्तास्तत्पुत्रानिति ॥ ७ ॥ ११ ॥ श्री

चत्वक्रमासनवरार्हणपादशौचतांबूलविश्रमणवीजनगंधमाल्यैः । केशप्रसाधशयनस्नपनोपहार्यैर्दासीशता अपि विभोर्विदधुः स्मदास्यं
॥ ६ ॥ तासां या दशपुत्राणां कृष्णस्त्रीणां पुरोदिताः । अष्टौ महिष्यस्तत्पुत्रान्प्रद्युम्नादीन्गृणामि ते ॥ ७ ॥ चारुदेष्णः सुदेष्णश्च चारुदेहश्च वीर्यवान् ।
सुचारुश्चारुगुप्तश्च भद्रचारुस्तथापरः ॥ ८ ॥ चारुचंद्रो विचारुश्च चारुश्च दशमो हरेः । प्रद्युम्नप्रमुखा जाता रुक्मिण्यां नावमाः पितुः ॥ ९ ॥ भानुः
सुभानुः स्वर्भानुः प्रभानुर्भानुमांस्तथा । चंद्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः । श्रीभानुः प्रतिभानुश्च सत्यभामात्मजा दश ॥ १० ॥ सांबः सुमित्रः पुरु
जिच्छतजिच्च सहस्रजित् । विजयश्चित्रकेतुश्च वसुमान्द्रविडः क्रतुः । जांबवत्याः सुता ह्येते सांबाद्याः पितृसंमताः ॥ ११ ॥ वीरश्चंद्रोऽश्वसेनश्च चित्र
गुर्वेगवान्वृषः । आमः शंकुर्वसुः श्रीमान्कुंतिर्नाग्नजितेः सुताः ॥ १२ ॥ श्रुतः कविर्वृषो वीरः सुबाहुर्भद्र एकलः । शांतिर्दर्शः पूर्णमासः कालिं
द्याः सोमकोऽवरः ॥ १३ ॥ प्रघोषो गात्रवान्सिंहो बलः प्रबल ऊर्ध्वगः । माद्र्याः पुत्रा महाशक्तिः सह ओजोऽपराजितः ॥ १४ ॥ वृको हर्षोऽनिलो गृध्रो वर्ध
नोऽन्नाद एव च । महांशः पावनो वह्निर्मित्रविंदात्मजाः क्षुधिः ॥ १५ ॥

मानिति वसोः कुंतेर्वा विशेषणं ॥ १२ ॥ सद्रो नाम एकलः एकः । सोमकः अवरजः कनीया
न् । एते कालिंद्याः सुता इति ॥ १३ ॥ माद्र्याः लक्ष्मणायाः ॥ १४ ॥ क्षुधिर्दशमः । एते मित्रविंदात्मजाः ॥ १५ ॥ श्रीरामश्रीकृष्णश्रीरामरामश्रीरामरामश्री ॥ ॥

राम
३४

संग्रामजितं प्रमुखाः सत्यकांतास्तु भद्रायाः सुताः शैब्या नाम्न्यपि मित्रविन्दा रोहिण्याः सुता नामुक्तिस्त्वासां सुपलक्षणार्थं ॥१६॥१७॥ एतेषां चेति । अन्येषामपि श्रीकृष्णपुत्राणां शतसंख्याश्चाष्टौ पुत्राः पौत्राश्च कोटिशो बभूवुः । तत्र हेतुत्वेन श्रीकृष्णपत्नीनां बाहुल्यमनुस्मारयति । मातरः कृष्णजातानामिति । चशब्देनाधिकाश्चेत्युक्तं ॥१८॥ यः कृष्णं हंतुं रंध्रं प्रतीक्षते स कथं प्रादादिति । वैवाहिकं विवाहनिमित्तं ॥१९॥ ननु रुक्मिणोऽभिप्रायं कथं जानासि इति चेत्तत्राह । अनागतमिति । अतींद्रियं अस्मदादींद्रियागोच

संग्रामजिद्बृहत्सेनः शूरः प्रहरणोऽरिजित् । जयः सुभद्रो भद्राया वाम आयुश्च सत्यकः ॥ दीप्तिमांस्ताम्रतप्ताद्या रोहिण्यास्तनया हरेः ॥१६॥ प्रद्युम्नाच्चानिरुद्धोऽभूद्रुक्मवत्यां महाबलः । पुत्र्यां तु रुक्मिणो राजन्नाम्ना भोजकटे पुरे ॥१७॥ एतेषां पुत्रपौत्राश्च बभूवुः कोटिशो नृप । मातरः कृष्णजातानां सहस्राणि च षोडश ॥१८॥ राजोवाच ॥ कथं रुक्म्यरिपुत्राय प्रादाद्दुहितरं युधि । कृष्णेन परिभूतस्तं हंतुं रंध्रं प्रतीक्षते । एतदाख्याहि मे विद्वन्द्विषोर्वैवाहिकं मिथः ॥१९॥ अनागतमतीतं च वर्तमानमतींद्रियं । विप्रकृष्टं व्यवहितं सम्यक्पश्यंति योगिनः ॥२०॥ श्रीशुक उवाच ॥ वृतः स्वयंवरे साक्षादनंगोऽगयुतस्तया । राज्ञः समेतान्निर्जित्य जहारैकरथो युधि ॥२१॥ यद्यप्यनुस्मरन्वैरं रुक्मी कृष्णावमानितः । व्यतरद्भागिनेयाय सुतां कुर्वन्स्वसुः प्रियं ॥२२॥ रुक्मिण्यास्तनयां राजन्कृतवर्मसुतो बली । उपयेमे विशालाक्षीं कन्यां चारुमतीं किल ॥२३॥

रं विप्रकृष्टं दूरस्थं व्यवहितं कुड्याद्यंतरितं ॥२०॥ तत्रोत्तरं । स्वयंवरे रुक्मवत्या वृतः सन् राज्ञो निर्जित्य जहारेति ॥२१॥ यद्यपि श्रीकृष्णावमानितः तथापि वैरमनुस्मरन्नपि व्यतरत् दत्तवान् । अनुमोदते इत्यर्थः ॥२२॥ सर्वासामप्येकैका कन्या तत्सर्वविवाहोपलक्षणार्थं ज्येष्ठकन्याविवाहमाह रुक्मिण्या इति ॥२३॥

यौनंविवाहःतद्यौनमधर्मंजानन्निति।द्विषदन्नंनसंभोक्तव्यंद्विषंतंनैवभोजयेदिति।लोकविरोधात्।अस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नत्विति निषेधाच्चेत्यर्थः॥२४

दौहित्रायानिरुद्धायपौत्रींरुक्म्याददाद्धरेः।रोचनांबद्धवैरोपिस्वसुःप्रियचिकीर्षया।जानन्नधर्मंतद्यौनंस्नेहपाशानुबंधनः॥२४॥ तस्मिन्नभ्युदये रा
जन्रुक्मिणीरामकेशवौ।पुरंभोजकटंजग्मुःसांबप्रद्युम्नकादयः॥२५॥ तस्मिन्निवृत्तउद्वाहेकालिंगप्रमुखान्नृपाः।दृप्तास्तेरुक्मिणंप्रोचुर्बलमक्षै
र्विनिर्जय।अनक्षज्ञोह्ययंराजन्नपितद्व्यसनंमहत् २६॥ इत्युक्तोबलमाहूयतेनाक्षैरुक्म्यदीव्यत।शतंसहस्रमयुतंरामस्तत्राददेपणं॥२७॥ तं
तुरुक्म्यजयत्तत्रकालिंगःप्राहसद्बलं।दंतान्संदर्शयन्नुच्चैर्नामृष्यत्तद्धलायुधः॥२८॥ ततोलक्षंरुक्म्यगृह्णाद्ग्लहंतत्राजयद्बलः।जितवानहमित्याह
रुक्मीकैतवमाश्रितः॥२९॥ मन्युनाक्षुभितःश्रीमान्समुद्रइवपर्वणि।जात्यारुणाक्षोतिरुषान्यर्बुदंग्लहमाददे॥३०॥ तंचापिजितवान्रामो
धर्मेणछलमाश्रितः।रुक्मीजितंमयात्रेमेवदंतुप्राश्निकाइति॥३१॥ तदाऽब्रवीन्नभोवाणीबलेनैवजितोग्लहः।धर्मतोवचनेनैवरुक्मीवदति
वैमृषा॥३२॥ तामनादृत्यवैदर्भोदुष्टराजन्यचोदितः।संकर्षणंपरिहसन्बभाषेकालचोदितः॥३३॥ नैवाक्षकोविदायूयंगोपालावनगोचराः।
अक्षैर्दीव्यंतिराजानोबाणैश्चनभवादृशाः॥३४॥

लोकविरुद्धाचरणफलंवक्तुमाहतस्मिन्निति २५ २६ अदीव्यतक्रीडितवान् २७ २८ निष्काणांलक्षंग्लहंपणंकृतवान्कैतवंकपटं २९ न्यर्बुदंदशकोटीर्ग्लहंकृ।
सितोरामश्चाददे ३० छलमाश्रितोरुक्मीमयाजितमित्याह ३१ ३३ ३४॥

नृपसंसदि मंगलसत्तायां ३५ ८ सूर्ययानवोढ्या। सिद्धा अखिलाअर्थाः अभ्युदयशत्रुवधाद्योयेषांते ३९ दशमे एकषष्टितमः ॥ द्विषष्टितमेऽत्र क्रमनिरुद्ध

सरोधनं। कथ्यया रममाणस्य बाणेन वज्रबाहुना १ अनिरुद्धोद्वहेन्यस्मिन्बाणयादवसंयुगे। श्रीकृष्णः श्रीहरं जित्वा बाणबाहूनथाच्छिनत् २ पुराधिपं पुरपा

रुक्मिणे एवमधिक्षिप्तो राजसिश्चोपहासितः। क्रुद्धः परिघमुद्यम्य जघ्नेतं नृपसंसदि ३५ कलिंगराजंतरसा संगृहीत्वादशमेपदे। दंतानपातयत्क्रुद्धो

योऽहसद्विवृतैर्द्विजैः ३६ अन्येनिर्भिन्नवाहूरुशिरसोरुधिरोक्षिताः। राजानोदुद्रुवुर्भीता बलेन परिघार्दिताः ३७ निहतेरुक्मिणि श्याले नाब्र

वीत्साध्वसाधुवा। रुक्मिणीबलयोराजंस्नेहभंगभयाद्धरिः ३८ ततोऽनिरुद्धं सह सूर्यया वरं रथं समारोप्य ययुः कुशस्थलीं। रामादयोभोजकटाद्द

शार्हाः सिद्धाऽखिलार्थामधुसूदनाश्रयाः ३९ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे रुक्मिवधोनाम एकषष्टितमोध्यायः ॥ ॥ राजोवाच ॥

वाणस्यतनयामूषामुपयेमेयदूत्तमः। तत्रयुद्धमभूद्धोरं हरिशंकरयोर्महत्। एतत्सर्वं महायोगिन्समाख्यातुं त्वमर्हसि ॥ ॥ शुक उवाच ॥ बा

णः पुत्रशतज्येष्ठोबलेरासीन्महात्मनः। येन वामनरूपाय हरयेऽदायि मेदिनी २ तस्यौरसः सुतोबाणः शिवभक्तिरतः सदा। मान्योवदान्योधी

मांश्च सत्यसंधोदृढव्रतः ३ शोणिताख्ये पुरेरम्ये सराज्यमकरोत्पुरा। तस्य शंभोः प्रसादेन किंकराइवतेऽमराः। सहस्रबाहुर्वाद्येन तांडवेऽतोष

यन्मृडं ४ भगवान्सर्वभूतेशः शरण्यो भक्तवत्सलः। वरेण छंदयामास सतं वव्रे पुराधिपं ५ सएकदाहगिरिशं पार्श्वस्थं वीर्यदुर्मदः। किरीटेना

र्कवर्णेन संस्पृशंस्तत्पदांबुजं ६ नमस्येत्वां महादेव लोकानां गुरुमीश्वरं। पुंसाम पूर्णकामानां कामपूरामरांघ्रिपं ७ दोःसहस्रं त्वया दत्तं

परंभाराय मेऽभवत्। त्रिलोक्यां प्रतियोद्धारं नलभे त्वदृते समं ८

लकं ५ कामान्नुस्मरयतीतिकामपूरः सचासावमरांघ्रिपः कल्पतरुः तं त्वां ७ ८

हेआद्यनिरस्तैर्सरित्तैर्दोर्लिरिडीं चूर्णयन् । अयं अगच्छं ९।१० स्ववीर्यस्य नशनं नाशनं केतुसंगं प्रतीक्षमाणः ११ श्रीमहेशादिष्टसंग्राममध्यप्रसंगमाह ।
तच्चोषेति । प्राद्युम्निना अनिरुद्धेन १२ तत्रापि स्वप्ने । तं कांतमपश्यंती साऽतन्वष्टौ १३ ततः किं दृष्टं तं तदाह बाणस्येति १४ हसन्नाह सन्नीरं १५ ६ त्वया दृष्ट

कं दृत्या निश्चैतैर्दोर्लिर्वियुत्सुर्दिग्गजानहं । अस्पर्ययां चूर्णयन्नडीन्नीतास्तेपि पद्डुदुवुः ९ तच्छ्रुत्वा भगवान्रुद्रः केतुस्ते संपतेयदा । त्वद्दर्प
घ्नं सवेन्मूढ संयुगं मत्समेन ते १० इत्युक्तः कुमतिर्हृष्टः स्वगृहं प्राविशन्नृप । प्रतीक्षन्गिरिशादेशं स्ववीर्यनशनं कुधीः ११ तस्योषा नाम
दुहिता स्वप्ने प्राद्युम्निना रतिं । कन्याऽलभत कांतेन प्रागदृष्टश्रुतेन सा १२ सा तत्र तमपश्यंती क्वासि कांतेति वादिनी । सखीनां मध्य उत्
स्थौ विह्वला व्रीडिता भृशं १३ बाणस्य मंत्री कुंभांडश्चित्रलेखा च तत्सुता । सख्यपृच्छत्सखीमूषां कौतूहलसमन्विता १४ कं त्वं मृगयसे
सुभ्रु कीदृशस्ते मनोरथः । हस्तग्राहं न तेऽद्यापि राजपुत्र्युपलक्षये १५ उषोवाच ॥ दृष्टः कश्चिन्नरः स्वप्ने श्यामः कमललोचनः । पीतवा
सा बृहद्बाहुर्योषितां हृदयंगमः १६ तमहं मृगये कांतं पाययित्वाऽधरं मधु । क्वापि यातः स्पृहयतीं क्षिप्त्वा मां वृजिनार्णवे १७ चित्र
लेखोवाच ॥ व्यसनं तेऽपकर्षामि त्रिलोक्यां यदि भाव्यते । तमानेष्ये नरं यस्ते मनोहर्ता तमादिश १८ इत्युक्त्वा देवगंधर्वसिद्धचारणप
न्नगान् । दैत्यविद्याधरान्यक्षान्मनुजांश्च तथाऽलिखत् १९ मनुजेषु च सा वृष्णीन्शूरमानकदुंदुभिं । व्यलिखद्रामकृष्णौ च प्रद्युम्नं वीक्ष्य
लज्जिता २० अनिरुद्धं विलिखितं वीक्ष्योषाऽवाङ्मुखी ह्रिया । सोऽसावसाविति प्राह स्मयमाना महीपते २१

एषां मध्ये को वा स्वेदिति दिवादीन्यथावत्पटेऽलिखत् । प्रद्युम्नं लिखितं वीक्ष्य श्वशुरोयमिति लज्जिता २१

२१ शोणितपुरंनीत्वा २३ पुंसिर्ष्याशेषेष्वेकेपि नशक्ने २४ सचपरार्द्धैरस्मूल्यैर्वस्त्रैः स्रगादिभिः शुश्रूषणापूर्वकमर्चितः सन् २५ तयाऽपहृतेंद्रियोऽहर्गणान्नदिन
मासहायनंबुबुधे २६ आपीतां अतिहृष्टां दुरवच्छेदैः छादयितुमशक्नैः २७ विचेष्टितं विरुद्धाचरणं २८ अनपायिभिः अपायः अपसर्पणं प्रमादो वा तद्रहितैः
नीत्वातं

चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी। ययौ विहायसा राजन्द्वारकां कृष्णपालितां॥ २२॥ तत्र सुप्तं सुपर्यंके प्राद्युम्निं योगमास्थिता। गृहीत्वा
शोणितपुरं सख्यै प्रियमदर्शयत्॥ २३॥ सा च तं सुंदरवरं विलोक्य मुदिताननां। दुःप्रेक्ष्ये स्वगृहे पुंभी रेमे प्राद्युम्निना समं॥ २४॥ परार्ध्यवासःस्रग्गं
धधूपदीपासनादिभिः। पानभोजनभक्ष्यैश्च वाक्यैः शुश्रूषयार्चितः॥ २५॥ गूढः कन्यापुरे शश्वत्प्रवृद्धस्नेहया तया। नाहर्गणान्स बुबुधे उषयाऽ
पहृतेंद्रियः॥ २६॥ तां तथा यदुवीरेण भुज्यमानां हतव्रतां। हेतुभिर्लक्षयांचक्रुरापीतां दुरवच्छदैः॥ २७॥ भटा आवेदयांचक्रू राजंस्ते दुहितुर्वयं॥
विचेष्टितं लक्षयाम कन्यायाः कुलदूषणं॥ २८॥ अनपायिभिरस्माभिर्गुप्तायाश्च गृहे प्रभो। कन्याया दूषणं पुंभिर्दुःप्रेक्ष्याया न विद्महे॥ २९॥ त
तः प्रव्यथितो बाणो दुहितुः श्रुतदूषणः। त्वरितः कन्यकागारं प्राप्तोऽद्राक्षीद्यदूद्वहं॥ ३०॥ कामात्मजं तं भुवनैकसुंदरं श्यामं पिशंगांबरमंबु
जेक्षणं। बृहद्भुजं कुंतलकुंडलत्विषा स्मितावलोकेन च मंडिताननं॥ ३१॥ दीव्यंतमक्षैः प्रिययाऽभिनृम्णया तदंगसंगस्तनकुंकुमस्रजं। बाह्वो
र्दधानं मधुमल्लिकाश्रितां तस्याग्र आसीनमवेक्ष्य विस्मितः॥ ३२॥
॥ ३१॥

पाठांतरे दुष्प्रेक्ष्यास्वकीयस्याः तस्याः पुंभिर्दूषणं कृतो वेति न जानीमहइति॥ २९॥ ३०॥ कामस्यात्मजं देहाज्जातं अभिनृम्णया सर्वमंगलया तस्या अंगसंगेन स्तनकुं
कुमं यस्यां अनुरंजितां बाह्वोर्मध्ये वक्षसि दधानं। मधुमल्लिकाः वसंतसंबंधिमल्लिकाः तदाश्रितां। तस्याग्र इत्यार्षः संधिः। तस्या अग्रइत्यर्थः॥ ३२॥

व्या ३२

आततायिभिरुद्यतशस्त्रैः। माधवोऽनिरुद्धः मौर्वं गुरुर्लोहविशेषः तन्निर्मितं ३१। ४ शोकविषादाभ्यां विह्वला विवशा अश्रूणां कला बिंदवो ययोर्योऽस्रेणाश्रुक्लिणीय श्याःसा ३५ ॥ इति दशमे द्विषष्टितमः ॥ ॥ त्रिषष्टितमे चाद्य बाणयादवसंगरे। कृतिर्ज्वरेण रुद्रेण बाणबाहुच्छिदो हरेः १ कर्मचयुद्धादिकं २ रामकृ

स तं प्रविष्टं वृतमाततायिभिर्भटैरनेकैरवलोक्य माधवः। उद्यम्य मौर्वं परिघं व्यवस्थितो यथांतको दंडधरो जिघांसया ३३ जिघृक्षया तान्परितः प्रसर्पतः शुनो यथा शूकरयूथपोऽहनत्। ते हन्यमाना भवनाद्विनिर्गता निर्भिन्नमूर्द्धोरुभुजाः प्रदुद्रुवुः ३४ तं नागपाशैर्बलिनंदनो बली घ्नंतं स्वसैन्यं कुपितो बबंध ह। उषा भृशं शोकविषादविह्वला बद्धं निशम्याश्रुकलाक्ष्यरौदिषीत् ३५ ॥ इति श्रीभागवते महापुराणे दशमस्कंधेऽनिरुद्धबंधो नाम द्विषष्टितमोऽध्यायः ॥ ॥ श्रीशुक उवाच ॥ अपश्यतां चानिरुद्धं तद्बंधूनां च भारत। चत्वारो वार्षिका मासा व्यतीयुरनुशोचतां ॥ १ ॥ नारदात्तदुपाकर्ण्य वार्त्तां बद्धस्य कर्म च। प्रययुः शोणितपुरं वृष्णयः कृष्णदेवताः ॥ २ ॥ प्रद्युम्नो युयुधानश्च गदः सांबोऽथ सारणः। नंदोपनंदभद्राद्या रामकृष्णानुवर्तिनः ॥ ३ ॥ अक्षौहिणीभिर्द्वादशभिः समेताः सर्वतो दिशं। रुरुधुर्बाणनगरं समंतात्सात्वतर्षभाः ॥ ४ ॥ भज्यमानपुरोद्यानप्राकाराट्टालगोपुरं। प्रेक्षमाणो रुषाविष्टस्तुल्यसैन्योऽभिनिर्ययौ ॥ ५ ॥ बाणार्थे भगवान्रुद्रः ससुतैः प्रमथैर्वृतः। आरुह्य नंदिवृषभं युयुधे रामकृष्णयोः ॥ ६ ॥

ष्णानुवर्तिन इति तौ उरतो निर्गता वित्यर्थः ३ सर्वतो दिशमित्यस्यान्तरेणान्वयः। भज्यमानानि पुरोद्यानादीनि। द्वंद्वैकवद्भावः अट्टालाः प्राकारोपरि नास्तुन्नतस्थानानि। अभिनिर्ययौ बाणः ५ सुतः स्कंदः तत्सहितैः प्रमथैर्गणैः रामकृष्णाभ्यां युयुधे ६

१२ यत्पस्त्राणे वा हद्ब्रह्मास्त्रस्येति नैजं नारायणास्त्रं १३ १४ शिखिना मयूरेण वाहनेन १६ तयोरनीकानि हतो नाथो येषां तानि १७ २० अनिरीक्षमाणस्तिर्य

आसीत्सुतुमुलं युद्धमद्भुतं रोमहर्षणं। कृष्णशंकरयो राजन्प्रद्युम्नगुहयोरपि ८ कुंभांडकूपकर्णाभ्यां बलेन सह संयुगः। सांबस्य बाणपुत्रेण बाणेन सह सात्यकेः। ९ ब्रह्मादयः सुराधीशा मुनयः सिद्धचारणाः। गंधर्वाप्सरसो यक्षा विमानैर्द्रष्टुमागमन्। १० शंकरानुचरान्सौरिर्भूतप्रमथगुह्यकान्। डाकिनीर्यातुधानांश्च वेतालान्सविनायकान्। ११ प्रेतमातृपिशाचांश्च कूष्मांडान्ब्रह्मराक्षसान्। द्रावयामास तीक्ष्णाग्रैः शरैः शार्ङ्गधनुश्च्युतैः। १२ पृथग्विधानि प्रायुंक्त पिनाक्यस्त्राणि शार्ङ्गिणे। प्रत्यस्त्रैः शमयामास शार्ङ्गपाणिरविस्मितः। १३ ब्रह्मास्त्रस्य च ब्रह्मास्त्रं वायव्यस्य च पार्वतं। आग्नेयस्य च पार्जन्यं नैजं पाशुपतस्य च। १४ मोहयित्वा तु गिरिशं जृंभणास्त्रेण जृंभितं। बाणस्य पृतनां शौरिर्जघानासिगदेषुभिः। १५ स्कंदः प्रद्युम्नबाणौघैरर्द्यमानः समंततः। असृग्विमुंचन्गात्रेभ्यः शिखिनाऽपाक्रमद्रणात्। १६ कुंभांडः कूपकर्णश्च पेततुर्मुसलार्दितौ। दुद्रुवुस्तदनीकानि हतनाथानि सर्वतः। १७ विशीर्यमाणं स्वबलं दृष्ट्वा बाणोऽत्यमर्षणः। कृष्णमभ्यद्रवत्संख्ये रथी हित्वैव सात्यकिं। १८ धनूंष्याकृष्य युगपत्बाणः पंचशतानि वै। एकैकस्मिञ्छरौ द्वौ द्वौ संदधे रणदुर्मदः। १९ तानि चिच्छेद भगवान्धनूंषि युगपद्धरिः। सारथिं रथमश्वांश्च हत्वा शंखमपूरयत्। २० तन्माता कोटरा नाम नग्ना मुक्तशिरोरुहा। पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया। २१ ततस्तिर्यङ्मुखो नग्नामनिरीक्षन्गदाग्रजः। बाणश्च तावद्विरथश्छिन्नधन्वाऽविशत्पुरं २२ विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात्। अभ्यधावत दाशार्हं दहन्निव दिशो दश।

मुखो वभूवेति २१ ज्वरस्त्रयोद्धुमसमर्थावदिति। नारायणः स्वज्वरमसृजत् २२ २३

अथ नारायणो देवः तं दृष्ट्वा व्यसृजज्ज्वरं २३

शीतज्वरं

द॰ उ॰
३८

माहेश्वरःसमाक्रंदन्युयुधे ॥२३॥२४॥ आत्मानंपरमशक्तिमंतंमन्यमानःश्रीकृष्णंतापयितुंप्रवृत्तःस्वयमेवतप्तःसन्तंपरमेश्वरंज्ञात्वास्तुवन्नमस्करोति।नमा
मीति।त्वात्वांअनंतशक्तिंनमामि।कुतः।परेशंब्रह्मादीनामीशं।तत्रहेतुः।सर्वात्मानंसर्वस्यात्मानंचेतयितारं।तत्कुतः।केवलंशुद्धंज्ञप्तिमात्रंचैतन्यघनं।तदेवंस
र्वचेतयितृत्वेनपरमेश्वरत्वमुक्तं।किंच।विश्वसृष्ट्यादिहेतुत्वादपीत्याह।विश्वोत्पत्तीति।नन्वेवंभूतंब्रह्मप्रसिद्धंनाहमितितत्राह।यत्तद्ब्रह्मेति।यत्तद्ब्रह्मतदेवत्वमि
त्यर्थः।किंतद्ब्रह्मेत्यतआह।ब्रह्मलिंगं।ब्रह्मणावेदेनलिंग्यतेद्योत्यतेइति।तत्कुतः।प्रशांतंसर्वविक्रियारहितत्वात्।नसाक्षाद्दृश्यमितिभावः॥२५॥ किंचायाव

माहेश्वरोवैष्णवश्चयुयुधातेज्वरावुभौ।माहेश्वरःसमाक्रंदन्वैष्णवेनबलार्दितः॥२३॥ अलब्ध्वाऽभयमन्यत्रभीतोमाहेश्वरोज्वरः।शरणार्थी
हृषीकेशंतुष्टावप्रयतांजलिः॥२४॥ ज्वरउवाच॥ ॥ नमामित्वाऽनंतशक्तिंपरेशंसर्वात्मानंकेवलंज्ञप्तिमात्रं।विश्वोत्पत्तिस्थानसंरोध
हेतुंयत्तद्ब्रह्मब्रह्मलिंगंप्रशांतं॥२५॥ कालोदैवंकर्मजीवःस्वभावोद्रव्यंक्षेत्रंप्राणआत्माविकारः।तत्संघातोबीजरोहप्रवाहस्त्वन्मा
येषातन्निषेधंप्रपद्ये॥२६॥

त्वविशेषंवक्तुंतत्रवयंप्रसवामः।त्वयितुसर्वविशेषातीतेनकस्यापिप्रभुत्वं।किंतु।त्वमेवसर्वप्रभुरिति।ज्ञप्तिमात्रत्वंविवृण्वन्स्तौति।कालइति।कालःक्षोभ
कः।कर्मनिमित्तं।तदेवफलाभिमुखमभिव्यक्तंदैवं।स्वभावः।तत्संस्कारः।जीवस्तद्वान्।द्रव्यंभूतसूक्ष्माणि।क्षेत्रंशरीरं।प्राणःसूत्रं।आत्मात्रअहंकारः।विकारएका
दशेंद्रियाणिमहाभूतानिचेतिषोडशकः।तत्संघातोदेहः।एतस्यचबीजरोहवत्प्रवाहः।रोहोऽंकुरः।देहाद्बीजरूपंकर्म।ततोऽंकुररूपोदेहः।ततःपुनरेवमिति
प्रवाहः।एषात्वन्माया।तस्यनिषेधअपोहोयस्मिन्त्वांनिषेधावधिभूतंप्रपद्येभजइति॥२६॥

राम
३८

ननु देवकीतनयस्य कथमेवंभूतत्वं तत्राह नानावतारैरिति। सर्वोपाधिविनिर्मुक्त एव त्वं यथा लीलया स्वीकृतैर्मत्स्याद्यवतारैर्देवान्बिभर्षि पालयसि। तदर्थं लोक
सेतून् वर्णाश्रमधर्मान्। तदर्थं तदनुष्ठातॄन्साधून्। तदंगत्वेन उन्मार्गान्दैत्यादीन्हंसि संहरसि। एवमेतदपि तव जन्म भूमेर्भारहरणाय लीलावतारोऽयं न कस्या
पित्वं तनय इत्यर्थः॥ २७॥ अतोऽज्ञानतस्त्वदभिभवे प्रवृत्तं मां त्वं रक्षेत्याशयेनाह तप्तोऽहमिति। ते तेजसा त्वत्सृष्टेन ज्वरेण। परसंतापकरस्य युक्त एव ताप इति वै

नानावतारैर्लीलयैवोपपन्नैर्देवान्साधून्लोकसेतून्बिभर्षि। हंस्युन्मार्गान्हिंसया वर्त्तमानान् जन्मैतत्ते भारहाराय भूमेः॥ २७॥ तप्तोऽहं ते
तेजसा दुःसहेन शांतोऽग्रेणात्युल्बणेन ज्वरेण। तावत्तापो देहिनां तेऽङ्घ्रिमूलं नो सेवेरन्यावदाशानुबद्धाः॥ २८॥ श्रीभगवानुवाच
त्रिशिरस्ते प्रसन्नोऽस्मि व्येतु ते मज्ज्वराद्भयं। यो नौ स्मरति संवादं तस्य त्वन्न भवेद्भयं॥ २९॥ इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः। बाणस्तु र
थमारूढः प्रागाद्योत्स्यन्जनार्द्दनं॥ ३०॥ ततो बाहुसहस्रेण नानायुधधरोऽसुरः। मुमोच परमक्रुद्धो बाणांश्चक्रायुधे नृप॥ ३१॥ तस्यास्यतो
ऽस्त्राण्यसकृच्चक्रेण क्षुरनेमिना। चिच्छेद भगवान्बाहूञ्छाखा इव वनस्पतेः॥ ३२॥ बाहुषु छिद्यमानेषु बाणस्य भगवान्भवः॥ भक्तानुकं
प्युपव्रज्य चक्रायुधमभाषत॥ ३३॥

दत्त्वाह। तावदिति। सेवायां प्राप्तानां नामनुचित इति भावः॥ २८॥ हे त्रिशिरः। व्येतु अपयातु। मदाज्ञापालकः सन्सुखं विचर। कासावाज्ञा तामाह य इति॥
नौ आवयोरिमं संवादं यः स्मरेत्तस्य त्वत्तो न भयं भवेत्। त्वया भयं नोत्पादनीयमित्यर्थः॥ २९॥ ३३॥

द॰उ॰
३९

तत्करक्षार्थं श्रीरुद्रो भगवंतं स्तौति। त्वं हीति। अयमर्थः। त्वं अज्ञात्वा ऽयं युध्यत इति न चित्रं। यस्त्वं वाङ्मये ब्रह्मणि शब्दब्रह्मणि अभिधाविषयत्वात्। कुतः परंज्यो
तिः ज्योतिषामपि प्रकाशकत्वाद् अविषय इत्यर्थः। कथं तर्हि प्रतीतिरत आह यमिति। अमलात्मनो मुक्ताः प्रकाशम् इत्यर्थः। ३४ आम्नाता वन्निर्गुणस्य नन्वज्ञान
लीलया ऽधिष्ठितस्त्वया यो विराड्विग्रहः सोपि न ज्ञायते उडुंबरफलांतर्वर्त्तिमशकैरिवोडुंबरफलमित्याशयेन विराड्रूपेण स्तौति द्वाभ्यां नाभिरिति। एवमन
न्ताद्यो नास्याद्यवयवाः सर्वा लोककल्पः पुरुषसूक्तरेणावयः। नलो यस्य नाभिः। अग्निर्मुखं। अंबुरेतः। द्यौः शीर्षं आशाः दिशः श्रुतिः श्रवणौ इयं।

श्रीरुद्र उवाच॥ ॥त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये॥ यं पश्यंत्यमलात्मान आकाशमिव केवलं ३४ नाभिर्नभो ऽग्निर्मुखमं
बुरेतो द्यौः शीर्षमाशाः श्रुतिरंघ्रिरुर्वी। चंद्रो मनो यस्य दृगर्क आत्मा अहं समुद्रो जठरं भुजेंद्रः ३५ रोमाणि यस्यौषधयो ऽंबुवाहाः
केशा विरिंचो धिषणा विसर्गः॥ प्रजापतिर्हृदयं यस्य धर्मः स वै भवान्पुरुषो लोककल्पः॥ ३६ तवावतारो ऽयमकुंठधामन्धर्मस्य
गुप्त्यै जगतो भवाय। वयं च सर्वे भवता ऽनुभाविता विभावयामो भुवनानि सप्त॥ ३७॥

उर्वी अंघ्रिः। चंद्रो मनः। अर्को दृक्। अहं शिवः आत्मा ऽहंकारः। समुद्रो जठरं इंद्रः भुजा बाहुः। इंद्रादयो लोकपाला वा हव इत्यर्थः ३५ औषधयो रोमाणि।
यच्छब्दस्यावृत्तिः स्पष्टतार्था। अंबुवाहाः केशाः। विरिंचो धिषणा बुद्धिः। प्रजापतिर्विसर्गो मेढ्रं। धर्मो हृदयं। लोकैः कल्प्यते अवकल्प्यते इति लोककल्पः
३६ ननु प्रादेशिकशरीरस्य कथं न सो नाभित्वादीन्यत आह तवेति। हे अकुंठधामन् अप्रच्युतस्वरूप भवाय अभ्युदयाय न केवलमेतावत्। किंतु।
अस्मदनुग्रहार्थमपीत्याह वयं चेति। सर्वे लोकपालाः त्वया पालिताः सप्तापि भुवनानि पालयाम इति ३७॥

राम
३९

नत्रयदिविस्तारयितारोऽमूयंविस्ताद्यानिभुवनानिसंति।तर्हिकिमर्थमुक्तंत्वंहिब्रह्मेति।नहिब्रह्मत्वेममसजातीयविजातीयभेदःसंभवतीत्यतआहत्वमिति।
एकःसजातीयरहितः।कुतःआद्यःपुरुषःपुरुषाणामवस्थात्रयवतामाद्यःप्रकृतिभूतःपुरुषःकुतःतुरीयःशुद्धइत्यर्थः।तदपिकुतः।स्वदृक्स्वप्रकाश
ज्ञानरूपः।शुद्धादेवह्युपाधियोगाज्जीवाजायंते।यथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवास्मादात्मनःसर्वएवात्मनोव्युच्चरंतीतिश्रुतेः।अतःसजातीयर
हितः।किंच।अद्वितीयःविजातीयरहितोपि।कुतः।हेतुःसर्वस्य।तथाप्स्वयंहेतुरहेतुश्चेति।कथंतर्हिप्रतिशरीरंजीवभेदःप्रतीयतेअतआह।प्रतीयसइति।
सर्वगुणप्रसिद्ध्यैसर्वविषयप्रकाशनाय॥३८॥तर्हिकिमहमेवसंसारीत्युच्यते।नहिनहीति।दृष्टांतमाहयथैवेति।हेभूमन्स्वछायायामेघलक्षणायाप

त्वमेकआद्यःपुरुषोऽद्वितीयस्तुर्यःस्वदृग्घेतुरहेतुरीशः।प्रतीयसेऽथापियथाविकारंस्वमाययासर्वगुणप्रसिद्ध्यै॥३८॥यथैवसूर्योपिहितश्छा
ययास्वयाछायांचरूपाणिचसंचकास्ति।एवंगुणेनापिहितोगुणांस्त्वमात्मप्रदीपोगुणिनश्चभूमन्॥३९॥यन्मायामोहितधियःपुत्रदारगृ
हादिषु।उन्मज्जंतिनिमज्जंतिप्रसक्तावृजिनार्णवे॥४०॥त्वद्दत्तमिमंलब्ध्वानृलोकमजितेंद्रियः।योनाद्रियेतत्वत्पादौसशोच्योह्यात्मवंचकः॥४१॥

स्वछायापिहितश्छादितोपिसूर्यःछायांमेघंच रूपाणिचमेघांतरितानिघटादीनपिसंचकास्तिप्रकाशयति।एवंगुणेनाहंकारेणस्वकार्येणजीवावरकेण
तद्वच्छापिहितोपिगुणान्सत्वादीनुपाधीन्गुणिनश्चउपहितान्जीवानपिचकास्ति।आत्मदीपःस्वप्रकाशः।अतःसर्वसाक्षिणस्तवनसंसारइत्यर्थः॥३९॥किंच।
मायाश्रयस्यान्यान्मोहयतस्तवकुतःसंसृतिरित्याशयेनाहयन्मायेति।पुत्रादिषुप्रसक्तावृजिनार्णवेदुःखसागरेउन्मज्जंति।देवादियोनिषु।निमज्जंतिस्था
वरादिषु।तदुक्तंवायवीये।विपर्ययश्चभवतिब्रह्मत्वस्थावरत्वयोरिति॥४०॥एवंजीवेश्वरव्यवस्थांनिरूप्येदानीमरतंजनंनिंदति।त्वद्दत्तमिति।त्वद्दत्तंत्वयाकर्मा
ध्यक्षेणदत्तंनृदेहमिमंलब्ध्वापीति॥४१॥

नो

द्.उ. ४०

शोच्यत्वे हेतुः यस्त्वामिति। विपर्यया विपरीताः अनात्मानः प्रियानीश्वरा ये इंद्रियार्थाः पुत्रादयस्तद्दर्शी ४२ अहमन्ये च सुहृन्मनस्त्वामेव तत्कारुण्यादहमहमिति॥ ४३ भगवतो भजनीयत्वे हेतुः त्वद्दंसङ्कं किं प्रार्थयते तं त्वेति। समत्वे हेतुः प्रशांतमिति। सुसेव्यत्वमाह। सुहृदात्मदैवं। सुहृद् बुद्धिप्रवर्तकत्वात्। आत्मा सर्वात्मकत्वात्। एवं भूतं दैवं ईश्वरं त्वां। न चान्यो भजनीयोऽस्तीत्याह। अनन्यमेकं समानासमानजातीयरहितं ततः कृतः। जगतामात्मनां च केतमधिष्ठानं ४४ य

यस्त्वां विसृजते मर्त्य आत्मानं प्रियमीश्वरं। विपर्ययेंद्रियार्थार्थं विषमत्त्यमृतं त्यजन् ॥ ४२ ॥ अहं ब्रह्मा च शर्वश्च धर्मः श्रीर्नयश्चामलाशयाः। सर्वात्मनात्मप्रपन्नास्त्वामात्मानं प्रेष्ठमीश्वरं ॥ ४३ ॥ तत्त्वां जगत्स्थित्युदयांतहेतुं समं प्रशांतं सुहृदात्मदैवं। अनन्यमेकं जगदात्मकेतं भवापवर्गाय भजाम देवं ॥ ४४ ॥ अयं ममेष्टो दयितोऽनुवर्ती मयाऽभयं दत्तममुष्य देव। संपाद्यतां तद्भवतः प्रसादो यथा हि ते दैत्यपतौ प्रसादः ॥ ४५ ॥ श्रीभगवानुवाच ॥ ॥ यदा ब्रह्मन् भगवं स्त्वन्नः करवाम प्रियं तव। भवता यद्व्यवसितं तन्मे साध्वनुमोदितं ॥ ४६ ॥ अवध्योऽयं ममाप्येष वैरोचनसुतोऽसुरः। प्रह्लादाय वरो दत्तो न वध्यो मे तवान्वयः ॥ ४७ ॥ दर्पोपशमनायास्य प्रवृक्णा बाहवो मया। सूदितं च बलं भूरि यच्च भारायितं भुवः ॥ ४८ ॥ चत्वारोऽस्य भुजाः शिष्टा भविष्यंत्यजरामराः। पार्षदमुख्यो भवतो न कुतश्चिद्भयोऽसुरः ॥ ४९ ॥ इति लब्ध्वाऽभयं कृष्णं प्रणम्य शिरसाऽसुरः। प्राद्युम्निं रथमारोप्य सवध्वा समुपानयत् ॥ ५० ॥ अक्षौहिण्या परिवृतं सुवासः समलंकृतं। सपत्नीकं पुरस्कृत्य ययौ रुद्रानुमोदितः ॥ ५१ ॥

यं तत्किमाशास्य तत्कस्यासीष्टमाशास्ते अयमिति दैत्यपतौ प्रह्लादे ४५ वैरोचनो बलिर्मद्भक्तस्तत्सुतत्वादयमवध्यस्तावत्। किंच प्रह्लादाय इति अन्वयो वंशः ४७ तर्हि किमित्येवं कृतं तत्राह दर्पोपशमनायेति ४८ अनुवृक्णा इति चत्वार इति। सवध्वा सह वध्वा ५० रुद्रानुमोदित इति तदभिप्रेतस्यैव बाणभुजभंगस्य कृतत्वात् ५१

॥४९॥ इ

राम ४०

इ नि रुद्द

पौरादिभिरभ्युद्यतः॥ अलिसुखमागत्य सत्कृतः ५२ ५३ ॥ दशमे त्रिषष्टितमः॥ ॥ वक्तुः षष्टितमे कृष्णो नृगं पापाद्मोचयत् ॥ ब्रह्मस्वहारिदोषोक्त्या राज्ञोऽशिक्षानशि
क्षयत् ॥ १ ॥ विभूतिभोगोपभोगादिमदोन्नद्धमनोरथान्॥ अत्र शासद्यदून् कृष्णो नृगोद्धारप्रसंगतः॥ २ ॥ पिपासिताः तृषिताः॥ जलं विचिन्वंतः॥ सत्वं जीवं ॥ २ ॥ तं च कृकला

द्वराजधानीं समलंकृतां ध्वजैः सतोरणैरुक्षितमार्गचत्वरां॥ विवेश शंखानकदुंदुभिस्वनैरभ्युद्यतः पौरसुहृद्द्विजातिभिः॥ ५२ ॥ य एवं कृष्णविजयं
शंकरेण च संयुगं॥ संस्मरेत्प्रातरुत्थाय न तस्य स्यात्पराजयः॥ ५३ ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे अनिरुद्धानयनं नाम त्रिषष्टित
मोध्यायः॥ ॥ श्रीशुक उवाच ॥ ॥ एकदोपवनं राजन् जग्मुर्यदुकुमारकाः॥ विहर्तुं सांबप्रद्युम्नचारुभानुगदादयः॥ १ ॥ क्रीडित्वा सुचिरं तत्र विचि
न्वंतः पिपासिताः॥ जलं निरुदके कूपे ददृशुः सत्वमद्भुतं ॥ २ ॥ कृकलासं गिरिनिभं वीक्ष्य विस्मितमानसाः॥ तस्य चोद्धरणे यत्नं चक्रुस्ते कृपयान्विता
॥ ३ ॥ चर्मजैस्तांतवैः पाशैर्बद्ध्वा पतितमर्भकाः॥ नाशक्नुवन् समुद्धर्तुं कृष्णायाचख्युरुत्सुकाः॥ ४ ॥ तत्रागत्यारविंदाक्षो भगवान्विश्वभावनः॥
वीक्ष्योज्जहार वामेन तं करेण स लीलया॥ ५ ॥ स उत्तमश्लोककराभिमृष्टो विहाय सद्यः कृकलासरूपं॥ संतप्तचामीकरचारुवर्णः स्वर्ग्यद्भुतालं
करणांबरस्रक्॥ पप्रच्छ विद्वानपि तन्निदानं जनेषु विख्यापयितुं मुकुंदः॥ कस्त्वं महाभाग वरेण्यरूपो देवोत्तमं त्वां गणयामि नूनं ॥ ६ ॥ दशामि
मां वा कतमेन कर्मणा संप्रापितोऽस्यतदर्हः सुभद्रः॥ आत्मानमाख्याहि विवित्सतां नो यन्मन्यसे नः क्षममत्र वक्तुं॥ ८ ॥ श्रीशुक उवाच ॥ ॥ इति
स्म राजा संपृष्टः कृष्णेनानंतमूर्तिना॥ माधवं प्रणिपत्याह किरीटेनार्कवर्चसा॥ ९ ॥

संवीक्ष्य ॥ ३ ॥ चर्मजैः चर्ममयैः पाशैः तांतवैः तंतुमयैश्च ॥ ४ ॥ ५ ॥ संतप्तं चामीकरं सुवर्णं तद्वद्वर्णो यस्य सः॥ अद्भुता अलंकारांबरस्रजो यस्य स्वर्गी देवो बभूवेति ॥ ६ ॥ ७ ॥
यत्र यदि क्षमं योग्यं ॥ ८ ॥ ९ ॥

द॰उ॰
४१

यदि ते कर्णमस्पृशमित्यसंदेहे संदेहवचनं यदि वेदाः प्रमाणं स्युरितिवत्। कर्णपथं नूनं प्राप्तः स्यामित्यर्थः १० किं च किंन्विति सर्वेषां भूतानामात्मनो बुद्धेः साक्षिणः ते ऽविदितं किं तु न किंचित् ११ ३ ऋतव्रतेभ्यः अदत्तावारेभ्यः। तपसा श्रुता च्याता श्च ते ब्रह्मणि वदान्याः अन्तुदाराः। अध्यापनशीला श्च ते सन्तश्च तेभ्यः १४ इष्टं वापी कूपादि चरितं कृतं १५ एवं वर्त्तमानस्य मम संकटं किंचिदापन्नं तदित्याह। कस्यचिदिति द्विजमुख्यस्य प्रतिग्रहनिवृत्तस्य। संपृक्ता मिलिता। अविदुषाज्ञा

नृग उवाच ॥ नृगो नाम नरेंद्रोहमिक्ष्वाकुतनयः प्रभो दानिष्वाख्यायमानेषु यदि ते कर्णमस्पृशं १० किं नु ते ऽविदितं नाथ सर्वभूतात्मसाक्षिणः। कालेनाव्याहतदृशो वक्ष्येथापि तवाज्ञया १५ यावत्यः सिकता भूमेर्यावत्यो दिवि तारकाः। यावत्यो वर्षधाराश्च तावतीरददं स्म गाः १२ पयस्विनीस्तरुणीः शीलरूपगुणोपपन्नाः कपिला हेमशृंगीः। न्यायार्जिता रूप्यखुराः सवत्सा दुकूलमालाभरणा ददावहं १३ स्वलंकृतेभ्यो गुणशीलवद्भ्यः सीदत्कुटुंबेभ्य ऋतव्रतेभ्यः। तपःश्रुतब्रह्मवदान्यसद्भ्यः प्रादां युवभ्यो द्विजपुंगवेभ्यः १४ गोभूहिरण्यायतनाश्वहस्तिनः कन्याः सदासीस्तिलरूप्यशय्याः। वासांसि रत्नानि परिच्छदान् रथानिष्टं च यज्ञैश्चरितं च पूर्तं १५ कस्यचिद्द्विजमुख्यस्य भ्रष्टा गौर्मम गोधने। संपृक्ता ऽविदुषा सा च मया दत्ता द्विजातये १५ तां नीयमानां तत्स्वामी दृष्ट्वोवाच ममेति च। ममेति परिग्राह्याह नृगो मे दत्तवानिति १६ विप्रौ विवदमानौ मामूचतुः स्वार्थसाधकौ॥ भवान्दाता ऽपहर्तेति तच्छ्रुत्वा मे ऽभवद्भ्रमः १७ अनुनीतावुभौ विप्रौ धर्मकृच्छ्रगतेन वै॥ गवां लक्षं प्रकृष्टानां दास्याम्येषा प्रदीयतां १९

ब्राह्मणस्येयमित्यजानता १६ १७ प्रतिग्राहिणोक्तं दातेति। स्वामिनोक्तं अपहर्तेति। असवद्भ्रमः व्याकुलो ऽभवमित्यर्थः १८ तदा उभावपि प्रत्येकमनुनीतौ प्रार्थितौ कथं। तदाह गवामिति सार्द्धेन १९ ॥ ॥राम॥रामकृष्ण॥ ॥रामकृष्ण॥ ॥

राम
४१

॥१९॥ अपरः प्रतिग्राही दुरायहोयन्नह्वं त्वयोक्तं अन्यदपि गवामयुतं यद्दित्तदपीमं विहाय नेच्छामीत्युक्त्वा गां त्यक्त्वा ययावित्यर्थः ॥२०॥ एतस्मिन्नंतरइति इतः पूर्वं पापात्तावान्नेव समसमर्थाइति भावः ॥२१॥ उत्ताहोइत्येकपदं अथवा पूर्वं मयुतमिति। नोतमिति। यमदूतवस्य वा कंपशेपपश्यामि ॥२२॥ हे देवयम। पूर्वमयुतं भुंजइति मयोक्ते सय मः। पतेतिप्राह ॥२३॥४॥ दुर्घटेनश्रीकृष्णदर्शनेनविस्मितः सन्नात्मभाग्यमभिनंदति। सत्वमिति। हे विभो सत्वं मम मा रूपथः लोचनगोचरः सकथं साक्षात्त्वत्यक्षो भूत्यर्थः ॥ कि

स्वं तावत्वदृश्हलीतां किंकरस्यो विजानतः। समुद्दरतमां कृत्स्नात्पतंतं निरयेष्वधो ॥१९॥ नाहं प्रतीच्छे वै राजन्नित्युक्त्वा स्वाम्यपाक्रमत्। नान्यद्गवा मप्ययुतमिच्छामीत्यपरोययौ ॥२०॥ एतस्मिन्नंतरे यामैर्दूतैर्नीतोयमालयं। यमेन पृष्टस्तत्राहं देवदेवजगत्पते ॥२१॥ पूर्वं त्वमशुभं भुंक्षे उताहो नृपते शुभं॥ नांतं दानस्य धर्मस्य पश्ये लोकस्य भास्वतः ॥२२॥ पूर्वं देवाशुभं भुंजे इति प्राह पतेति सः। तावदद्राक्षमात्मानं कृकलासं पतन्प्रभो ॥२३॥ ब्रह्मण्यस्य वदान्यस्य तव दासस्य केशव। स्मृतिर्नाद्यापि विध्वस्ता भवत्संदर्शनार्थिनः ॥२४॥ सत्वं कथं मम विभोऽक्षिपथः परात्मा योगेश्वरैः श्रुतिदृशाऽमलहृद्विभाव्यः। साक्षादधोक्षज उरुव्यसनांधबुद्धेः स्यान्मेऽनुदृश्य इह यस्य भवापवर्गः ॥२५॥ देवदेव जगन्नाथ गोविंद पुरुषोत्तम॥ नारायण हृषीकेश पुण्यश्लोकाच्युताव्यय ॥२६॥

मत्वाश्चर्यं तदाह। परः आत्मा। अतएव योगेश्वरैरपि श्रुतिदृशा उपनिषत्सु चक्षुषा अमले हृदि विभाव्यश्चिंत्यः। यतोऽधोक्षजः। अक्षजं मैंद्रियं ज्ञानं तत्तदधः अर्वाग्भ वयस्मात्सः। यस्य इह भवापवर्गो भवेत्तस्य भवाननुदृश्यः स्यात्। उरुव्यसनेन कृकलासभवदुःखेनांधबुद्धेस्तु मम तद्विचित्रमित्यर्थः ॥२५

द.उ.
४२

उद्रिक्तसक्तिर्वद्धयासंवोधयन्ननुज्ञापयति।अनुजानीहीति।देवलोकेऽपिवर्तमानस्यात्मनोमनसः संनिधिंप्रार्थयतेयत्रक्वापीति।त्वत्पदमाश्रदंविषयोयस्यतथाभूतं भूयादिति॥२८॥ यांश्चनमतिनमइति।सर्वभावायसर्वेषुभावोजन्मयेनतस्मै।ब्रह्मणेकर्तृत्वेऽप्यविकारायकुतः अनंतशक्तयेअनंतामायाख्याशक्तिर्यस्यतस्मै।वासुदेवायसर्वेश्वरताश्रयायेत्युपादानत्वमुक्तं।श्रीकृष्णायसदानंदरूपायेतिपुरुषार्थत्वमुक्तं।कृषिर्भूवाचकःशब्दोणश्चनिर्वृतिवाचकः॥तयोरैक्यंपरंब्रह्मकृष्णइत्यभिधीयतेइतिस्मृतेः॥किंच।योगानांइष्टापूर्तादिकर्मणांपतयेफलदात्रे।अयंभावः एवंभूतंत्वांविहाय।गंतुमनिच्छुरपिगमिष्यामित्वद्दत्तकर्मफलभोगायेति॥२९॥

अनुजानीहिमांकृष्णयांतंदेवगतिंविभो।यत्रक्वापिसतश्चेतोभूयान्मेत्वत्पदास्पदं॥२८॥ नमस्तेसर्वभावायब्रह्मणेऽनंतशक्तये।कृष्णायवासुदेवाययोगानांपतयेनमः॥२९॥ इत्युक्त्वातंपरिक्रम्यपादौस्पृष्ट्वास्वमौलिना।अनुज्ञातोविमानाग्र्यमारुहत्पश्यतांनृणां॥३०॥ कृष्णःपरिजनंप्राहभगवान्देवकीसुतः।ब्रह्मण्यदेवोधर्मात्माराजन्याननुशिक्षयन्॥३१॥ दुर्जरंवतब्रह्मस्वंभुक्तमग्नेर्मनागपि।तेजीयसोऽपिकिमुतराज्ञामीश्वरमानिनां॥३२॥ नाहंहालाहलंमन्येविषंयस्यप्रतिक्रिया॥ब्रह्मस्वंहिविषंप्रोक्तंनास्यप्रतिविधिर्भुवि॥३३॥ हिनस्तिविषमत्तारंवह्निरद्भिःप्रशाम्यति।कुलंसमूलंदहतिब्रह्मस्वारणिपावकः॥३४॥ ब्रह्मस्वंदुरनुज्ञातंभुक्तंहंतित्रिपूरुषं॥प्रसह्यतुबलाद्भुक्तंदशपूर्वान्दशापरान्॥३५॥

मनाक्ईषदपिभुक्तंसत्।अग्नेरग्निसदृशस्यतेजीयसः॥अतितेजस्विनोऽपिदुर्जरं॥३२॥ किंच।विषादपिघोरमित्याहहिनस्तीति।संसर्गिसंसर्गेणमारकत्वादग्नितुल्यतास्यात्तदपिनेत्याह।वह्निरिति।अपिच।समूलमिति।वह्निर्मूलान्यवशेषयति।ब्रह्मस्वलक्षणारणिजःपावकःकुलंतदपिसमूलमिति॥३४॥ दुरनुज्ञातंयथावदननुज्ञातं।त्रिपूरुषंकुलंस्वयंपुत्रंच।प्रसह्यहठात्।बलात्राजाद्याश्रयात्॥३५॥

राम
४२

मपैः

येब्रह्मस्वमसिमन्यंतेवांछंतितेनिरयमेवासिमन्यंते॥अतोवालिशाअज्ञाः॥आत्मपातंनयत्कृतइति॥३५॥अपिचयद्धंतीति॥३६॥यद्वाशिकांक्षा॥३७॥४१॥प्रा
मेनमासि॥४०॥नकेवलमर्थवादविलीपिकेयंकिंतुप्रत्यक्षमित्याहब्राह्मणार्थइति॥४२॥इतिदशमेचतुःषष्टितमः॥॥पंचषष्टितमेरामस्यकेगोकुलमागतः॥२

राजानोराजलक्ष्म्याचनात्मपातंप्रचक्षते॥निरयंयेऽभिमन्यंतेब्रह्मस्वंसाधुबालिशाः॥३५॥गृह्णंतियावतःपांशून्क्रंदतामश्रुबिंदवः॥विप्राणांहृ
तवृत्तीनांवदान्यानांकुटुंबिनां॥३६॥राजानोराजकुल्याश्चतावंतोब्दान्निरंकुशाः॥कुंभीपाकेषुपच्यंतेब्रह्मदायापहारिणः॥३७॥स्वदत्तांपरदत्तां
वाब्रह्मवृत्तिंहरेच्चयः॥षष्टिंवर्षसहस्राणिविष्ठायांजायतेकृमिः॥३८॥नमेब्रह्मधनंभूयाद्यद्गृध्वाल्पायुषोनराः॥पराजिताश्च्युताराज्याद्भवंत्यु
द्वेजिनोहयः॥विप्रंकृतागसमपिनैवद्रुह्यतमामकाः॥घ्नंतंबहुशपंतंवानमस्कुरुतनित्यशः॥३९॥यथाहंप्रणमेविप्राननुकालंसमाहि
॥तथानमतयूयंचयोन्यथामेसदंडभाक्॥४०॥ब्राह्मणार्थोह्यपहृतोहर्तारंपातयत्यधः॥अजानंतमपिह्येनंनृगंब्राह्मणगौरिव॥४१॥एवं
विश्राव्यभगवान्मुकुंदोद्वारकौकसः॥पावनःसर्वलोकानांविवेशनिजमंदिरं॥४२॥इतिश्रीभा॰महा॰द॰नृगोपाख्यानंनामचतुःषष्टि
तमोध्यायः॥॥श्रीशुकउवाच॥॥बलभद्रःकुरुश्रेष्ठभगवान्रथमास्थितः॥सुहृद्दिदृक्षुरुत्कंठःप्रययौनंदगोकुलं॥१॥परिष्वक्तश्चिरोत्कंठै
र्गोपगोपीभिरेवच॥रामोभिवाद्यपितरावाशीर्भिरभिनंदितः॥२॥चिरन्नःपाहिदाशार्हसानुजोजगदीश्वर॥इत्यारोप्यांकमालिंग्यनेत्रैःसि
शिचतुर्ज्जलैः॥३

ममाणक्षगोपीभिःकालिंद्याःकर्षणंमदात॥१॥रामस्यचरितंचित्रंकालिंद्याःकर्षणादियत॥पौंड्रकांतादिकृष्णस्यघ्रष्टथयुक्तमतःपरं॥२॥
आशीर्भिरभिनंदितोवभूव॥२॥तदाहचिरमिति॥३॥

ह०उ०
४३

गोपवृद्धांश्च विधिवदभिवंद्य यविष्ठैरभिवंदितो वयोवृद्धैरित्यर्थः अपि वा यथावयः इति ४ ते सर्वे विष्ठ्या यादवेषु तं रामं स्वनामग्रस्या रोग्यं पप्रच्छुः ५ ते च तेन पृष्टा इति । कृष्णे कृष्णगामार्थं संन्यस्ताखिलराधसः त्यक्तसर्वविषयाः ६ ८ रामस्य संदर्शने आदृताः सादराः ९ ११ तर्हि तद्गमनेयुष्माभिः प्रतिबंधः किं न कृतः । तद्वाक्यविश्वासा । दिति चेत् न नु विश्वासः किमिति कृतः तत्राह्रः कथं न्विति । वक्रं वक्तुर्वाङ्ना नाविधानि वाक्यानि १३ तत्रान्या ऊचुः । कथं नु गृह्णंती ति । अन्या ऊचुः गृह्णंति आइति ।

गोपवृद्धांश्च विधिवद्यविष्ठैश्चाभिवंदितः । यथावयो यथासख्यं यथासंबंधमात्मनः ४ समुपेत्याथ गोपालान् हास्यहस्तग्रहादिभिः । विश्रांतं सुख-मासीनं पप्रच्छुः पर्युपागताः ५ पृष्टाश्चानामयं स्वेषु प्रेमगद्गदया गिरा । कृष्णे कमलपत्राक्षे संन्यस्ताखिलराधसः ६ कच्चिन्नो बांधवा राम सर्वे कुशलमासते । कच्चित्स्मरथ नो राम यूयं दारसुतान्विताः ७ दिष्ट्या कंसो हतः पापो दिष्ट्या मुक्ताः सुहृज्जनाः । निहत्य निर्जित्य रिपून् दिष्ट्या दुर्गं समाश्रिताः ८ गोप्यो हसंत्यः पप्रच्छू रामसंदर्शनादृताः । कच्चिदास्ते सुखं कृष्णः पुरस्त्रीजनवल्लभः ९ कच्चित्स्मरति वा बंधून्पितरं मातरं च सः । अप्यसौ मातरं द्रष्टुं सकृदप्यागमिष्यति । अपि वा स्मरतेऽस्माकमनुसेवां महाभुजः १० मातरं पितरं भ्रातॄन्पतीन्पुत्रान्स्वसॄनपि । यदर्थे जहिम दाशार्ह दुस्त्यजान्स्वजनान्प्रभो ११ ता नः सद्यः परित्यज्य गतः संछिन्नसौहृदः । कथं नु तादृशं स्त्रीभिर्न श्रद्धीयेत भाषितं १२ कथं नु गृह्णंत्यनवस्थितात्मनो वचः कृतघ्नस्य बुधाः पुरस्त्रियः । गृह्णंति वै चित्रकथस्य सुंदरस्मितावलोकोच्छ्वसितस्मरातुराः १३ किं नस्तत्कथया गोप्यः कथाः कथयतापराः । यात्यस्माभिर्विना कालो यदि तस्य तथैव नः १४

राम
४३

त्र कृष्णस्य चित्रकथाकथनकोविदस्य किं वा सुंदरं स्मितं यस्मिन् तेन अव लोकनेन उच्छ्वसितः क्षुभितो यः स्मरः तेन आतुराः १३ अपरा ऊचुः । किं न इति । कालस्यावगमस्य चास्माकं च यात्येव किं तु तस्य सुखेनास्माकं तु दुःखेनेत्येतावानेव विशेषः इति ध्वनितं १४

१५ नानाविधेष्वनुनयेषु कोविदः ॥ १६ ॥ मधुं चैत्रं माधवं वैशाखं गोपीनां रतिमिति श्रीकृष्णक्रीडासमयेऽनुत्पन्नानामतिबालानां चान्यासामित्यस्य तु नाशस्तिह्यिः १७
पूर्णचन्द्रस्य कलाभिर्मरीचिभिर्मृष्टे उज्ज्वले । कौमुदीगन्धवायुना कुमुद्वतीनां गन्धवातेन सेविते । यद्वा कौमुदीशब्देन तद्विकासिता निकुमुदानि लक्ष्यन्ते । कुमुदं चन्द्रे ...

इति प्रहसितं शौरेर्जल्पितं चारुवीक्षितं । गतिं प्रेमपरिष्वङ्गं स्मरन्त्यो रुरुदुः स्त्रियः ॥ १५ ॥ संकर्षणस्ताः कृष्णस्य संदेशैर्हृदयंगमैः । सांत्वयामास भग
वान्नानानुनयकोविदः ॥ १६ ॥ द्वौ मासौ तत्र चावात्सीन्मधुं माधवमेव च । रामः क्षपासु भगवान्गोपीनां रतिमावहन् ॥ १७ ॥ पूर्णचंद्रकला
मृष्टे कौमुदीगंधवायुना । यमुनोपवने रेमे सेविते स्त्रीगणैर्वृतः ॥ १८ ॥ वरुणप्रेषिता देवी वारुणी वृक्षकोटरात् । पतंती तद्वनं सर्वं स्वगंधेना
ध्यवासयत् ॥ १९ ॥ तं गंधं मधुधारायावायुनोपहृतं बलः । आघ्रायोपगतस्तत्र ललनाभिः पपौ समं ॥ २० ॥ उपगीयमानचरितो वनिताभि
र्हलायुधः । वनेषु व्यचरत्क्षीवो मदविह्वललोचनः ॥ स्रग्व्येककुंडलो मत्तो वैजयंत्या च मालया । बिभ्रत्स्मितमुखांभोजं स्वेदप्रालेयभूषितं ॥ २२ ॥
स आजुहाव यमुनां जलक्रीडार्थमीश्वरः । निजं वाक्यमनादृत्य मत्त इत्यापगां बलः । अनागतां हलाग्रेण कुपितो विचकर्ष ह ॥ २३ ॥ पापे त्वं मा
मवज्ञाय यन्नायासि मयाहुता । नेष्ये त्वां लांगलाग्रेण शतधा कामचारिणीं ॥ २४ ॥ एवं निर्भर्त्सिता भीता यमुना यदुनंदनं । उवाच चकिता वाचं
पतिता पादयोर्नृप ॥ २५ ॥ राम राम महाबाहो न जाने तव विक्रमं । यस्यैकांशेन विधृता जगती जगतः पते ॥ २६ ॥

नेत्यर्थः ॥ १८ ॥ वारुणी सुधया सहोत्पन्ना मदिरा ॥ १९ ॥ २० ॥ क्षीवो मत्तः ॥ २१ ॥ स्वेदप्रालेयं हिमं तेन भूषितं ॥ २२ ॥ मत्तोऽयमित्यनादृत्यानागतां आपगां नदीं ॥ २३ ॥ आ
हूता आहूता । यद्यस्मान्नागच्छसि तस्मान्नेष्ये गमयिष्यामि ॥ २४ ॥ चकिता । कंपिता एकांशेन शेषाख्येन ॥ २६ ॥

२७ विजगाह। अवगाहनं कृतवान् २८ उन्नीणीयनिर्गताय असितांबरादीनि कांतिर्दद्दौ। कांतिर्लक्ष्मीः॥ यथोक्तं वैष्णवे। वरुणप्रहितां चास्मै मालामम्लानपंक
जां। समुद्राभे तथा वस्त्रे नीले लक्ष्मी रयच्छतेति। हरिवंशे च वलं प्रति लक्ष्मी वाक्यं। जातरूपमयं चैकं कुंडलं वज्रभूषणं। आदिपद्मं च पद्माख्यं दिव्यं श्रवणभूषणं। देवेम्ला

परं सार्वं भगवतो भगवन्मामजानतीं। मोक्तुमर्हसि विश्वात्मन्प्रपन्नां भक्तवत्सल॥ २७ ततो व्यमुंचद्यमुनां याचितो भगवान्बलः॥ विजगाह
जलं स्त्रीभिः करेणुभिरिवेभराट्॥ २८ कामं विहृत्य सलिलादुत्तीर्णायासितांबरे। भूषणानि महार्हाणि ददौ कांतिः शुभां स्रजं॥ २९ वसित्वा
वाससी नीले मालामामुच्य कांचनीं। रेजे स्वलंकृतो लिप्तो माहेंद्र इव वारणः॥ ३० अद्यापि दृश्यते राजन्यमुनाकृष्टवर्त्मना। बलस्यानंतवी
र्यस्य वीर्यं सूचयतीव हि॥ ३१ एवं सर्वा निशा याता एकेव रमतो व्रजे। रामस्याक्षिप्तचित्तस्य माधुर्यैर्व्रजयोषितां॥ ३२ ॥ इति श्रीभागवते म
पुराणे दशमस्कंधे बलदेवविजये यमुनाकर्षणं नाम पंचषष्टितमोऽध्यायः॥ ॥ श्रीशुक उवाच॥ ॥ नंदव्रजं गते रामे करूषाधिपतिर्नृप
वासुदेवोऽहमित्यज्ञो दूतं कृष्णाय प्राहिणोत्॥ १ त्वं वासुदेवो भगवानवतीर्णो जगत्पतिः॥ इति प्रस्तोभितो बालैर्मेन आत्मानमच्युतं॥ २ दूतं
च प्राहिणोन्मंदः कृष्णायाव्यक्तवर्त्मने। द्वारकायां यथा बालो नृपो बालकृतोऽबुधः॥ ३ दूतस्तु द्वारकामेत्य सभायामास्थितं प्रभुं। कृष्णं कम
लपत्राक्षं राजसंदेशमब्रवीत्॥ ४

तिष्ठ स्त्रीषु पौराणां भूषणक्रियामित्यादि २९ वसित्वा परिधाय आमुच्य कंठे निधाय। चंदनादिभिः लिप्तः
३० एकेव एकैव निशा यथा तथा। माधुर्यैर्विलासैः ३२ दशमे पंचषष्टितमः॥ ॥ षट्पुंड्रस्थितमेकाशीं गत्वाऽहन्पौंड्रकं हरिः। तन्मित्रं च ततो दूतं सुदक्षिण
वधादिकं ११ प्रस्तोभितः स्तुत्या प्रोत्साहितः॥ बालैरज्ञैः २ बालकृतो नृपः। बालैर्नृपत्वेन क्रीडायां परिकल्पितः ३ ४

१ हेमूढ उत्स्रक्ष्ये त्वयि प्रक्षेप्स्यामि यैः सह त्वमेवं विकत्थसे तेष्वपीत्यर्थः। यद्वा यैः कृत्रिमैः सुदर्शनादिचिह्नैरेवं श्लाघसे तान् उत्स्रक्ष्ये त्याजयिष्यामीत्यर्थः ॥ ८ ॥ माश[illegible]
मेहीत्वा छोत्तरं सुखमिति। वटाः कंकादिवत्पक्षिविशेषाः। तत्र तदा शुनां शरणमाश्रयो भवितासि ॥ ९ ॥ काशीमिति पौंड्रकस्यापि तदा मित्रपुरे ऽवस्थानात् ॥ १० ॥

वासुदेवोवतीर्णोहमेकएवनचापरः। भूतानामनुकंपार्थं त्वंतु मिथ्याऽभिधांत्यज ॥ ५ ॥ यानित्वमस्मच्चिह्नानि मौढ्याद्बिभर्षि सात्वत। त्यक्त्वैहि मां त्वं शरणं नो चेद्देहि ममाहवं ॥ ६ ॥ श्रीशुक उवाच ॥ कत्थनं तदुपाकर्ण्य पौंड्रकस्याल्पमेधसः। उग्रसेनादयः सभ्या उच्चकैर्जहसुस्तदा ॥ ७ ॥ उवाच दूतं भगवान्परिहासकथामनु। उत्स्रक्ष्ये मूढ चिह्नानि यैस्त्वमेवं विकत्थसे ॥ ८ ॥ मुखं तदपिधायाज्ञ कंकगृध्रवटैर्वृतः। शयिष्यसे हतस्तत्र भविता शरणं शुनां ॥ ९ ॥ इति दूतस्तदाक्षेपं स्वामिने सर्वमाहरत्। कृष्णोपि रथमास्थाय काशीमुपजगाम ह ॥ १० ॥ पौंड्रकोपि तदुद्योगमुपलभ्य महारथः। अक्षौहिणीभ्यां संयुक्तो निश्चक्राम पुरात्द्रुतं ॥ ११ ॥ तस्य काशिपतिर्मित्रं पार्ष्णिग्राहोऽन्वयान्नृप। अक्षौहिणीभिस्तिसृभिरपश्यत्पौंड्रकं हरिः ॥ १२ ॥ शंखार्यसिगदाशार्ङ्गश्रीवत्साद्युपलक्षितं। बिभ्राणं कौस्तुभमणिं वनमालाविभूषितं ॥ १३ ॥ कौशेयवाससी पीते वसानं गरुडध्वजं। अमौल्यमौल्याभरणं स्फुरन्मकरकुंडलं ॥ १४ ॥ दृष्ट्वा तमात्मनस्तुल्यं वेषं कृत्रिममास्थितं। यथा नटं रंगगतं विजहास भृशं हरिः ॥ १५ ॥ शूलैर्गदाभिः परिघैः शक्त्यृष्टिप्रासतोमरैः। असिभिः पट्टिशैर्बाणैः प्राहरन्नरयो हरिं ॥ १६ ॥ कृष्णस्तु तत्पौंड्रककाशिराजयोर्बलं गजस्यंदनवाजिप

पार्ष्णिग्राहः पृष्ठतो रक्षकः ॥ १२ ॥ ३ गरुडः कृत्रिमो ध्वजे यस्य तं। अमूल्यो ऽनर्घ्यो मौलि
रा भरणं च यस्य तं ॥ १४ ॥ १५ ॥ गजस्यंदनादि चतुरंगबलमर्दितवान्। पृथक् प्रजाः चतुर्विधं भूतग्रामं यथा युगांताग्निरिति ॥ १६ ॥ १७ ॥ ॥राम॥ ॥राम॥ ॥

त्तिमत्। गदासिचक्रेषुभिरार्दयद्भृशं यथा युगांते हुतभुक्पृथक्प्रजाः ॥ १७ ॥

इत्यमाकीर्णमिति विस्
आयोधनं रणस्थानं अरिणा चक्रेण वितं आकीर्णं आक्रीडनमिव कल्पांते रुद्रस्य क्रीडास्थानमिव १९ २० गिरेः शृंगं यथेति २१४
यं कस्थ्यवेति संशिशिपिरे संशयं कृतवंत इति २५ ६ संस्थानविधिं उत्तरक्रियां। अपचितिं निःकृतिं २७ आत्मनाऽभिसंधाय बुध्वाऽव्यवस्य २८ सुदक्षिणा। अन्त्

आयोधनं तदश्ववाजिकुंजरद्विपत्वरो[ष्ट्रैः] रथैः अरिणा ऽवखंडितैः। वसौ वितं मोदवहं मनस्विनामाक्रीडनं भूतपतेरिवोल्बणं १९ अथाह पौंड्रकं शौ
रिः सोऽपि पौंड्रकयद्भवान्। इतवाक्येन मामाह ताश्च ब्राह्मणपुत्र जानामि ते १९ त्याजयिष्येऽभिधानं मे यत्त्वया ऽज्ञ प्रघाध्रुतं। वज्रामिशरणं तेऽद्य य
दिनेच्छामि संयुगं २० इति क्षिप्ता शितैर्बाणैर्विरथीकृत्य पौंड्रकं। शिरो ऽवृश्चद्रथांगेन वज्रेणेंद्रो यथा गिरेः २१ तथा काशिपतेः कायाच्छिरउत्क्षि
त्य पत्रिभिः। न्यपातयत्काशिपुर्यां पद्मकोशमिवानिलः २२ एवं मत्सरिणं हत्वा पौंड्रकं ससखं हरिः। द्वारकामाविशत्सिद्धैर्गीयमानकथामृतः
२३ स नित्यं भगवद्ध्यानप्रध्वस्ताऽखिलबंधनः। बिभ्राणश्च हरे राजन्स्वरूपं तन्मयोऽभवत् २४ शिरः पतितमालोक्य राजद्वारे सकुंडलं। किमि
दं कस्य वा वक्त्रमिति संशिशिपिरे जनाः २५ राज्ञः काशिपतेर्ज्ञात्वा महिष्यः पुत्रबांधवाः। पौराश्च हा हता राजन्नाथ नाथेति प्रारुदन् २६ सुदक्षि
णस्तस्य सुतः कृत्वा संस्थाविधिं पितुः। निहत्य पितृहंतारं यास्याम्यपचितिं पितुः २७ इत्यात्मनाभिसंधाय सोपाध्यायो महेश्वरं। सुदक्षिणोऽर्चयामा
स परमेण समाधिना २८ प्रीतोऽविमुक्ते भगवांस्तस्मै वरमदाद्विभुः। पितृहंतुर्वधोपायं स वव्रे वरमीप्सितं। २९ दक्षिणाग्निं परिचर ब्रा
ह्मणैः सममृत्विजं। अभिचारविधानेन स चाग्निः प्रमथैर्वृतः। साधयिष्यति संकल्पमब्रह्मण्ये प्रयोजितः ३०

दाः २९ वरमदात् तष्टणी चेत्युक्तवानित्यर्थः २९ ऋत्विजं ऋत्विजमिव स्वनियोगकारिणं। यद्वा स्वदेवमृत्विजमिति श्रुतेः। अब्रह्मण्ये प्रयोजित इति क्रूरप्रयोगे
विपरीतो भविष्यतीति सूचितं

उ. ५५

म ५५

अभिचरन्। अभिचारं कुर्वन्। व्रती गृहीतनियमः। तप्तताम्रमिव शिखाश्मश्रूणि यस्य सः। अंगारोद्गारीणि लोचनानि यस्य सः ॥ ३२ ॥ दंष्ट्राभिरुग्रे भ्रुकुटीदंडैश्च कठो
रं क्रूरं आस्यं यस्य सः। त्रिशिखं त्रिशूलं ॥ ३३ ॥ दिशः प्रदहन् ॥ ३४ ॥ ५ ॥ त्राहि त्राहीत्याद्युक्तिरिति शेषः ॥ ३६ ॥ अहमविता अस्मि रक्षिष्यामीति ॥ ३७ ॥ ८ ॥ रोदसी च प्रकाशयदिति शे

इत्यादिष्टस्तथा चक्रे कृष्णायाभिचरन् व्रती। ततोऽग्निरुत्थितः कुंडान्मूर्त्तिमानतिभीषणः। तप्तताम्रशिखाश्मश्रुरंगारोद्गारिलोचनः ॥ ३२ ॥ दंष्ट्रो
ग्रभ्रुकुटीदंडकठोरास्यः स्वजिह्वया। आलिहन् सृक्विणी नग्नो विधुन्वंस्त्रिशिखं ज्वलत् ॥ ३३ ॥ पद्भ्यां तालप्रमाणाभ्यां कंपयन्नवनीतलं। सोऽभ्यधावद्वृ
तो भूतैर्द्वारकां प्रदहन् दिशः ॥ ३४ ॥ तमाभिचारदहनमायांतं द्वारकौकसः। विलोक्य तत्रसुः सर्वे वनदाहे यथा मृगाः ॥ ३५ ॥ अक्षैः सभायां क्रीडंतं भ
गवंतं भयातुराः। त्राहि त्राहि त्रिलोकेश वह्नेः प्रदहतः पुरं ॥ ३६ ॥ श्रुत्वा तज्जनवैक्लव्यं दृष्ट्वा स्वानां च साध्वसं। शरण्यः संप्रहस्याह मा भैष्टेत्यवितास्
म्यहं ॥ ३७ ॥ सर्वस्यांतर्बहिःसाक्षी कृत्यां माहेश्वरीं विभुः। विज्ञाय तद्विघातार्थं पार्श्वस्थं चक्रमादिशत् ॥ ३८ ॥ तत्सूर्यकोटिप्रतिमं सुदर्शनं जाज्व
ल्यमानं प्रलयानलप्रभं। स्वतेजसा खं ककुभोऽथ रोदसी चक्रं मुकुंदास्त्रमथाग्निमार्दयत् ॥ ३९ ॥ कृत्यानलः प्रतिहतः स रथांगपाणेरस्त्रौजसा
स नृप भग्नमुखो निवृत्तः। वाराणसीं परिसमेत्य सुदक्षिणं तं सर्त्विग्जनं समदहत्स्वकृतोऽभिचारः ॥ ४० ॥ चक्रं च विष्णोस्तदनुप्रविष्टं वाराणसीं
साट्टसभालयापणां। सगोपुराट्टालककोष्ठसंकुलां सकोशहस्त्यश्वरथान्नशालिकां ॥ ४१ ॥

षः। यद्वा। स्वतेजसा खादीन् प्रति ज्वाज्वल्यमानं अत्यर्थं प्रकाशमानमित्यर्थः। आर्दयत्। अपीडयत् ॥ ३९ ॥ अर्दितोऽग्निर्यत्कृतवान् तदाह कृत्यानल इति। सर्त्वि
ग्भिः जनैश्च वर्त्तमानं। अभिचर्यतेऽनेनेत्यभिचारः कृत्यानलः ॥ ४० ॥ अट्टादिसहितां अट्टा मंचाः ॥ ४१ ॥

उ. ४६

॥४३॥ ॥ इति दशमे षट्षष्टितमः ॥ ॥ सप्तषष्टितमे रामो गिरौ रैवतके मदात्। वैरं स्मुवति सिद्धीर्ज्ञं वधीद्द्विविदं खलं ॥ ॥ कालिंदीविदारणानंतरं समर्थ्य

तंहि द्विविदवधादिसंगतमप्युक्त्वा तत्पूर्वभावित्वेन पौंड्रकवधादि निरूप्येदानीं तदेव प्रश्नोत्तरि भूयोहमित्यादिना। रामचरितश्रवणेच्छायामद्भुतकर्मत्वं हेतुः। तत्र च

नंतत्वं। तत्राप्यप्रमेयत्वमिति ॥१॥ नरकस्य सखेति हरिणा वैरकारणं। सुग्रीवसचिव इति तस्य मंत्रबलं मैंदस्य भ्रातेति रामायणेऽतिप्रसिद्धत्वेन वीर्याधिक्यमुक्तं

दग्धा वाराणसी सर्वा विष्णोश्चक्रं सुदर्शनं। भूयः पार्श्वमुपातिष्ठत्कृष्णस्याक्लिष्टकर्मणः॥ ४२॥ य एनं श्रावयेन्मर्त्य उत्तमश्लोकविक्रमं। समाहि

तो वा शृणुयात्सर्वपापैः प्रमुच्यते ॥४३॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पौंड्रकादिवधाख्यः षट्षष्टितमोध्यायः ॥ ॥ राजोवाच

भूयोहं श्रोतुमिच्छामि रामस्याद्भुतकर्मणः। अनंतस्याप्रमेयस्य यदन्यत्कृतवान्प्रभुः॥१॥ श्रीशुक उवाच ॥ ॥ नरकस्य सखा कश्चिद्द्विविदो

नाम वानरः। सुग्रीवसचिवः सोथ भ्राता मैंदस्य वीर्यवान् ॥२॥ सख्युः सोपचितिं कुर्वन्वानरो राष्ट्रविप्लवं। पुरग्रामाकरान्घोषानदहद्वह्निमु

त्सृजन् ॥३॥ क्वचित्स शैलानुत्पाट्य तैर्देशान्समचूर्णयत्। आनर्तान्सुतरामेव यत्रास्ते मित्रहा हरिः॥४॥ क्वचित्समुद्रमध्यस्थो दोर्भ्यामुद्धृत्य त

ज्जलं। देशान्नागायुतप्राणो वेलाकूले न्यमज्जयत् ॥५॥ आश्रमानृषिमुख्यानां कृत्वा भग्नवनस्पतीन्। अदूषयच्छकृन्मूत्रैरग्नीन्वैतानिकान्खलः॥ ६

मिति॥२॥ सख्युर्नरकस्य अपचितिं। आनृण्यं। राष्ट्रविप्लवो नाशो यथा भवति। तथा पुरादीनदहदिति ॥३॥ किंच क्वचिदिति। कदाचित्स द्विविदः मित्रहा सखिहं

ता ॥४॥ तस्य समुद्रस्य जलं बाहुभ्यामुत्क्षिप्य वेलायाः कूले वर्त्तमानान्देशान्प्लावयामासेति ॥५॥ आश्रमस्थान्वनस्पतीन्। संस्कार्यानाहवनीयाद्यग्नीन्मूत्रादि नदा ॥६॥

[OrderDescription]
,CREATED=17.06.20 10:47
,TRANSFERRED=2020/06/17 at 11:11:42
,PAGES=169
,TYPE=STD
,NAME=S0003161
,Book Name=M-2955-SHRIMAD BHAGWAT EKADASH SKANDH TO DWADASH S
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF

FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF

FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF

FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF

FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF

FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF

FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,